
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥श्रीगणेशाय नमः॥ ॥ॐ॥ ॥अग्निमीळे॥ अहं होता। अग्निनामकं देवं ईळे स्तोमि॥ कीदृशं यज्ञ
स्य पुरोहितं यथा राज्ञः पुरोहितः तदभीष्टं संपादयति तथा अग्निरपि यज्ञस्यापेक्षितं होमं संपादयति देवं
दानादिगुणयुक्तं। होतारं ऋत्विजं देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। रत्नधातमं। यागफलरूपाणां रत्ना
नां अतिशयेन धारयितारं पोषयितारं वा। अग्निः पूर्वेभिः॥ पूर्वेभिः भृग्वंगिरःप्रतिभिः इह यज्ञे देवान् ऋभुर्ज आव
क्षति आवहतीत्यर्थः। अग्निना रयिं॥ अग्निना निमित्तभूतेन यजमानो रयिं धनं अश्नवत् प्राप्नोति पोषमेव प्रतिदि
नं पुष्यमाणतया वर्धमानं॥ वीरवत्तमं अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं सति धने संपद्यते॥ अग्ने यं यज्ञं॥ वि
श्वतः सर्वास्मिन् दिक्षु परिभूः परितः प्राप्नोसि॥ स इत् स एव देवेषु गच्छति गतिं प्रणयितुं स्वर्गे गच्छति। अग्निर्होता। अस्मि
न्यज्ञे अग्निः देवः देवेभिः हविर्भोक्तृभिः सह आगमत् समागच्छतु॥ कविक्रतुः कविः क्रांतयज्ञः क्रतः क्रतुर्वा सत्यः अन
रहितः फलमवश्यं प्रयच्छतीत्यर्थः॥१॥ यदंग॥ उप त्वाग्ने॥ धिया बुध्या एमसि॥ त्वामागच्छामः॥ राजंतमध्वराणां॥ पूर्व
मंत्रे त्वामुपेमइत्यग्निमुद्दिश्योक्तं॥ ऋतस्य सत्यस्य अवश्यंभाविनः ऋतस्य सर्वपालकस्य दीदिविं। पौनःपुन्येन भृशं वा
द्योतकं॥ स्वे दमे स्वकीये गृहे यज्ञशालायां द्योतमानं॥ स नः पितेव। सूपायनो भव फलप्राप्तियुक्तो भव॥ वायवायाहि द
र्शत॥ हे दर्शत दर्शनीय वायो कर्मण्येतस्मिन्नायाहि आगच्छ तदर्थं इमे सोमाः अरंकृताः अभिषवादिसंस्कारैः संस्कृ

१

ताः तेषां ताः सोमान्यद्वा । तेषामेकदेशं इत्यध्याहारः । पाहि स्वकीयं भागं पिबेत्यर्थः । तस्या आर्थमस्मदीयमा
ह्वानं श्रुधि शृणु ॥ वायउक्थेभिः ॥ वायो जरितारः स्तोतारः ऋत्विग्यजमानाः त्वामच्छ त्वामभिलक्ष्य उक्थेभिः ॥ आज्य
प्रउगादिशास्त्रैः जरंते स्तुवंति । अहर्विदः अहःशब्दः एकेनाह्ना निष्पाद्यते । अग्निष्टोमादिक्रतौ वैदिकव्यवहारेण
प्रसिद्धः । क्रतुभिज्ञा इत्यर्थः ॥ वायोतवप्रपृंचती ॥ हे वायो तव धेना । वाक् सोमपीतये सोमपानार्थं दाशुषे दाश्वांसं दत्तवंतं
यजमानं जिगाति गच्छति । हे यजमान त्वया दत्तं सोमं पास्यामीत्येवं वायुर्ब्रूत इत्यर्थः । प्रपृंचती प्रकर्षेण सोमसंपर्कं कु
र्वती । सोमगुणवर्णयंतीत्यर्थः ॥ उरूची उरूअंचत्यनु यजमानं गच्छति सोमयाजिनः तान् सर्वान् व्याप्नुवंतीत्यर्थः ॥ इंद्रवायू इमे
सुताः ॥ हे इंद्रवायू भवदर्थमिमे सोमाः सुताः अभिषुताः तस्माद्युवां प्रयोभिरन्नैरस्मभ्यं दातव्यैः सह उपागतं अस्मत्स
मीपं प्रत्यागच्छतं हि यस्मादिंदवः सोमा वां युवां उशंति कामयंते तस्मादागमनमुचितं । वायविंद्रश्च चेतथः ॥ अत्र चकारेण
न्यः समुच्चीयते संनिहितत्वाद्वायुरेव । हे वायो त्वं इंद्रश्च युवां उभौ सुतानां अभिषुतानां सोमानां चेतथः जानीथः ॥ कीदृ
शौ युवां वाजिनीवसू । वाजो अन्नं हविर्लक्षणं यस्यां संततौ अस्ति सा वाजिनी तस्यां च वसतः इति सा वाजिनीवसू तौ तथावि
धौ युवां द्रवत् क्षिप्रं मुपसमीपे आयातं मागच्छतं ॥ ३ ॥ वायविंद्रश्च सुन्वतः वायुः इंद्रश्च सुन्वतः यजमानस्य निष्कृतं संस्कृ
तं रिसोमं उपायातं आगच्छतं । हे नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ युवयोरागतयोश्च सतो धिया अमुना कर्म

णामृक्षत्वरया संस्कारः संपाद्यते इत्यर्थः ॥ मित्रं हुवे । पूतदक्षं पवित्रं बलं मित्रं अस्मिन्कर्मणि ॥ हविःप्रदानाय नियतं आह्वयामि रिशा
दसं रिशानां अशत्रूणां अदसं भक्षकं वरुणं च हुवे आह्वयामि ॥ घृतमुदकं अंचति भूमिं प्रापयतीति घृताची । वर्षकर्म तां घृता
चीं धियं कर्म साधयंतौ साधयंतौ कुर्वंतौ ॥ ऋतेन मित्रावरुणौ ॥ हे मित्रावरुणौ क्रतुं प्रवर्त्तमानं इमं सोमयागं आप्ना
थे व्याप्तवंतौ ॥ केन निमित्तेन ऋतेन अवश्यं भावितया सत्येन फलेन अस्मभ्यं फलं दातुमित्यर्थः ॥ अत्र ऋतशब्देन उ
दकं सत्यं यज्ञं वा ॥ कीदृशौ क्रतुं बृहंतं प्रौढं ॥ कवी नो मित्रावरुणा ॥ मित्रावरुणौ देवौ नः अस्माकं दक्षं
बलं अपसं कर्म च दधाते पोषयतः कवी मेधाविनौ तुविजातौ बहूनां उपकाराय तथा समुत्पन्नौ उरुक्षया बहुनिवासौ ।
अश्विना यज्वरीः ॥ हे अश्विनौ युवां इषो हविर्लक्षणानि अन्नानि चनस्यतं भुंजाथां किंविधाः इषः यज्वरीः यागनिष्पा
दिकाः द्रवत्पाणी हविर्ग्रहणाय प्रसृताभ्यां पाणिभ्यां युक्तौ शुभस्पती शोभनस्य कर्मणः पालकौ पुरुभुजा विस्ती
र्णभुजौ बहुभोजनौ वा ॥ अश्विना पुरुदंससा ॥ पुरुदंससा बहुकर्माणौ नेतारौ धिष्ण्या धार्ष्ट्ययुक्तौ बुद्धिमंतौ वा ॥
कीदृश्या धिया गिरा वीरया गतियुक्तया अप्रतिहतप्रसरया ॥ दस्रा युवाकवः ॥ हे अश्विनौ आयातं इह कर्मणि आग
च्छतं किमर्थं सुताः युष्मदर्थं सोमाः अभिषुताः तान् स्वीकर्त्तुं कीदृशौ दस्रा शत्रूणां उपक्षपयितारौ । यद्वा । देववैद्यत्वेन
रोगाणां उपक्षपयितारौ नासत्या असत्यं अनृतं भाषणं तद्रहितौ रुद्रवर्त्तनी शत्रुरोदनकारिणौ युवाकवः सो

२

माः वसतीवरीभिरेकधनाभिश्चाद्भिर्मिश्रिता इत्यर्थः ॥ वृक्तबर्हिषः ॥ रिक्तानि मूलैर्वर्जितानि बर्हींषि आस्तरणरूपाणि
येषां सोमानां ते वृक्तबर्हिषः ॥ इंद्रायाहि ॥ हे इंद्र चित्रभानो चित्रदीप्ते अस्मिन्कर्मण्यायाहि आगच्छ । सुता इमे त्वायवः त्वां काम
यमाना वर्त्तंते ॥ ऋत्विजां अण्वीभिः अंगुलीभिः सुताः संतः तना नित्यं पूतासः शुद्धाः ॥ इंद्रायाहि धिया ॥ हे इंद्र त्वं आयाहि ॥
अस्मिन्कर्मण्यागच्छ किमर्थं वाघतः ऋत्विजो ब्रह्माणि वेदरूपाणि स्तोत्राणि उपैतुं । कीदृशस्त्वं धिया अस्मदीयया प्र
ज्ञया इषितः प्राप्तः अस्मच्छ्रद्धभक्त्या प्रेरित इत्यर्थः । विप्रजूतः यथा यजमानभक्त्या प्रेरितस्तथान्यैरपि विप्रैर्मेधावि
भिर्ऋत्विग्भिः प्रेरितः कीदृशस्य वाघतः सुतावतः अभिषुतसोमयुक्तस्य ॥ इंद्रायाहि तूतुजानः ॥ हरिवः अश्वयुक्ते
न्द्र । ब्रह्माण्युपैतुं आयाहि । कीदृशस्त्वं तूतुजानः त्वरमाणः सुते सोमाभिषवयुक्ते कर्मणि नोऽस्मदीयं चनः अन्नं हविर्ल
क्षणं दधिष्व । स्वीकुरु इत्यर्थः ॥ ओमासश्चर्षणीधृत ॥ हे विश्वे देवासः एतन्नामकाः देवविशेषाः दाश्वषः हविर्दत्तवतो यजमान
स्य सुतं अभिषुतं सोमं प्रति आगत आगच्छत । ओमासः रक्षकाः चर्षणीधृतः मनुष्याणां धारकाः दाश्वांसः फलस्य दातारः
विश्वे देवासः ॥ विश्वेदेवासः एतन्नामकाः गणरूपाः देवविशेषाः सुतं सोमं आगंत आगच्छंतु । कीदृशाः अप्तुरः तत्तत्काले
वृष्टिप्रदाः इत्यर्थः । तूर्णयः त्वरायुक्ताः यजमानं अनुग्रहीतुं आलस्यरहिताः ॥ अत्र दृष्टांतः उस्राः सूर्यस्य रश्मयः स्वसरा
ण्यहानि प्रति आलस्यरहिता यथा समागच्छंति तद्वत् ॥ विश्वेदेवासो अस्रिधः ॥ विश्वेदेवासः मेधं हविः यज्ञसं
बंधि जुषंत सेवंतां कीदृशाः अस्रिधः क्षयरहिताः द्रोहरहिता वा एहिमायासः सर्वतो व्याप्तप्रज्ञाः रहिता अद्रुहो

3

द्रोहरहिता:।वहूयोवोढार:।पावकानः॥सरस्वतीदेवीवाजेभिहविर्लक्षणैरन्नैः॥प्रदायजमानेभ्योदातव्यैरन्नैः।नोअ
स्मदीयंयज्ञंवष्टुकामयतांकामयितावनिर्वहत्वित्यर्थः॥कीदृशीसरस्वतीपावकाशोधयित्रीवाजिनीवतीअन्नवतीक्रियाव
तीधियावसुःकर्मप्राप्यधनभूतेनिमित्तभूता॥चोदयित्री।यासरस्वतीसेयमिमंयज्ञंदधेधारितवती॥कीदृशीसूनृ
तानांप्रियाणांसत्यवाक्यानांचोदयित्रीसुमतीनांप्रेरयित्रीशोभनबुद्धियुक्तानांअनुष्ठातॄणांचेततीतदियमनुष्ठेयंज्ञाप
यंती॥महोअर्णःसरस्वती॥द्विविधासरस्वतीविग्रहवद्देवतानदीरूपाचअनयातुनदीरूपाप्रतिपाद्यते।सरस्वतीकेतुना
कर्मणाप्रवाहरूपेणविश्वाःधियःसर्वाण्यनुष्ठानप्रज्ञानानिविशेषेणदीपयतिअनुष्ठानविषयाबुद्धीःसर्वदोत्पादयती
त्यर्थः॥६॥सुरूपकृत्नुं॥करोतीतिकृत्नुः।सुरूपकृत्नुंशोभनरूपोपेतस्यकर्मणःकर्त्तारमिंद्रंऊतयेरक्षणार्थंद्यवि
द्यविप्रतिदिनंजुहूमसि॥आह्वयामः॥आह्वानेदृष्टांतः॥गोदुहेगोधुगर्थंसुदुघामिवसुष्टुदोग्ध्रींगामिवयथालोके
गोर्दोग्धातदर्थंतस्याभिमुख्येनदोहनीयांगामाह्वयतीतिवत्॥उपनःसवनागहि।हेसोमस्यपातःइंद्रसोमंपातु
नःअस्मदीयानित्रीणिप्रस्फपसमीपेआगहिआगच्छआगत्यचसोमस्यसोमंपिबरेवतःगोधनवतस्तवमदोह
र्षोगोदाइत्गोप्रदएवखलुपिहष्टस्त्वस्माभिर्गावोलभ्यंतइत्यर्थः॥अथातेअंतमानां॥अथसोमपानानंतरं
हेइंद्रतवांतमानांअंतिकतमानांअतिसमीपवर्त्तिनांसुमतीनांशोभनमतियुक्तानांपुरुषाणांमध्येस्थित्वाविद्या

३

मयंत्वांजानीम।यद्वासुमतीनांशोभनबुधीनांकर्मानुष्ठानविषयाणांलाभार्थमित्यध्याहारः।बुद्धिलाभप्र
त्वांस्मरेमेत्यर्थः।त्वमपिनोतिमाख्यः।अस्मानतिक्रम्यान्येषांतत्स्वरूपंमाप्रकथय।किंतुआगहि।अस्माने
वआगहि।परेहिविग्रं।अत्रयजमानंप्रतिहोता।ब्रूतेहेयजमानत्वंइंद्रंपरेहि।इंद्रस्यसमीपेगच्छ।गत्वाचविप
श्चितंमेधाविनंहोतारंपृच्छअसौहोतासम्यक्स्तुतवान्नवेत्येवंप्रश्नंकुरु।यइंद्रस्तेतवयजमानस्यसखिभ्यःऋत्विग्भ्योवरं
श्रेष्ठधनंपुत्रादिकमासमंतात्प्रयच्छतीतिशेषः।तादृशमिंद्रंमितिपूर्वत्रान्वयः।पुनरपिकीदृशंविग्रंमेधाविनंअस्तृतंअ
हिंसितं।उतब्रुवंतु।नोस्माकंसंबंधिनःऋत्विजःइतिशेषः।तत्ब्रुवंतु।इंद्रंस्तुवंतु।उतअपिचहेनिदःनिंदितारःपुरुषाःनिर्दिरताः
इतोदेशान्निर्गच्छत।अन्यत्श्चिदन्यस्मादपिदेशान्निर्गच्छत।कीदृशाः।ऋत्विजःइंद्रेदुवःपरिचर्यादधानाःकुर्वाणाःइच्छन्तोवधारणे
सर्वदापरिचर्यांकुर्वंतएवतिष्ठंत्वित्यर्थः।निदंतिनिदः।उतनःसुभगान्॥हेदस्मशत्रूणांउपक्षयितरिंद्रत्वदनुग्रहात्अरिरुतश
त्रवोपिनोस्मान्सुभगान्शोभनधनोपेतान्वोचेयुःउच्यासुःकृष्टयोमनुष्याःअस्मान्मित्रभूतावदंतीतिकिंपुनर्वक्तव्यमितिशेषः।
ततोधनसंपन्नावयंइंद्रस्यशर्मणिइंद्रस्यप्रसादलब्धसुखेस्यामेत्भवेयमेव।एमाशुं।इतिनिपातइदमशब्दार्थेवर्त्ततेहेयजमा
नआशुंवेगवत्तंसोमयागव्याप्यंयज्ञश्रियंइंद्रायभर।आहर।कीदृशंसोमंआशुंसवनत्रयव्याप्तं।यज्ञश्रियंयज्ञस्यसंपद्रूपं
नृमादनंनृणामृत्विग्यजमानानांहर्षहेतुं।पतयन्मत्तयंतंकर्मणिप्राप्नुवंतंमंदयत्सखंपइंद्रोमदयतियजमानान्हर्षयतीति
स्मिन्निंद्रसखिभूतोयंसोमस्तस्मिन्हेतुत्वादितिवाप्रीतिहेतुत्वात्।अस्यपीत्वा।हेशतक्रतोबहुकर्मयुक्तेंद्रत्वमस्यसोम

५

स्यसंबंधिनं मंत्रं पीत्वा वृत्राणां वृत्रनामकासुरप्रमुखानां शत्रूणां घनोभवः हंताभूः ततो वाजिषु संग्रामेषु वाजिनं संग्रा
मवंतं त्वं भक्तं प्रावः प्रकर्षेण रक्षितवानसि। त्वां तं वाजेषु हे शतक्रतो बहुप्रज्ञानयुक्ते इंद्र धनानां सातये संभजनार्थं वाजे
षु युद्धेषु वाजिनं बलवंतं त्वां पूर्वमंत्रोक्तगुणयुक्तं त्वां वाजयामः अन्नवंतं कुर्मः॥ ७॥ यो रायः॥ य इंद्रो रायो धनस्यावनिः रक्षकः
स्वामी वा तस्मा वा इंद्राय गायत हे ऋत्विजः तस्मा इत्यर्थं स्तुतिं कुरुत। कीदृशः इंद्र महान् गुणैरधिकः सुपारः सुष्ठु कर्मणः पूरयि
ता सखा स्वतो यजमानस्य सखा सखिभ्यो वा प्रियः॥ ८॥ आत्वेता निषीदत। तु शब्दः क्षिप्रार्थो निपातः द्वाभ्यामाङ्भ्यामन्व
तु शब्दो भ्यसनीयः हे सखायः ऋत्विजः क्षिप्रमस्मिन् कर्मण्यागच्छत आगच्छत। आदरार्थे भ्यासः आगत्य च निषीदत
उपविशत उपविश्य चेंद्रमभिप्रगायत सर्वतः प्रकर्षेण स्तुवत। कीदृशाः स्तोमवाहसः त्रिवृदादिस्तोमान् स्तोमं वहंतीति स्तो
मवाहसः पुरूतमं पुरूणां॥ सखायो भिप्रगायतेति पदद्वयमात्रा प्यनुवर्त्तते। हे सखायः ऋत्विजः सचा यूयं सर्वे सहाप
हास्त्वापरस्परस्य समवायेन सुते अभिषुते सोमे प्रवृत्ते सति इंद्रमभिप्रगायत। कीदृशमिंद्रं पुरूतमं पुरूणां बहूनां शत्रूणां तमयि
तीति ग्लापयतीति पुरूतमः पुरूणां बहूनां वार्याणां वरणीयानां धनानां ईशानं स्वामिनं। सचा नः॥ घ शब्दो वधारणार्थे
निपातः स वेदेस्तच्छब्देः संबध्यते। स एवेंद्रः पूर्वमंत्रोक्तगुणयुक्तविशिष्टो नोस्माकं योगे पूर्वमप्राप्तस्य पुरुषार्थस्य संबंधे
आभुवत् आभवतु पुरुषार्थसाधकः भवत्वित्यर्थः स एव राये धनार्थं आभवतु स एव पुरंध्यां योषितायां भवतु। पुरंध्या बहुवि
धा बुद्धा वा बहुविधं पुरंधिर्बहुधीरिति यास्कः॥ स एव वाजेभिर्यैरन्नैः सह नोस्मानागमदागच्छतु। यस्य संस्थे॥ यस्य

संस्थे इति समत्सु युद्धेषु यस्येंद्रस्य संस्थे रथे युक्तो हरी द्वावश्वौ शत्रवो न वृण्वते न संभजंते रथमश्वौ च दृष्ट्वा पलायंत
इत्यर्थः तस्मा इंद्राय तत्संतोषार्थं हे ऋत्विजो गायत स्तुतिं कुरुत। सम्यक् तिष्ठतीति संस्थो रथः॥ सुतपाव्ने इमे सोमासः
अस्मिन् कर्मणि संपादिताः सुताः सुतपाव्ने अभिषुतस्य सोमस्य पानकर्त्रे षष्ठ्यर्थे चतुर्थी तस्य पातुर्वीतये भक्षणार्थं यंति त
मेव प्राप्नुवंति। सुताः अभिषुताः शुचयः दशापवित्रेण शोधिताः दध्याशिरः अवनीयमानं दधि आशीर्दधिषु तत्तु येषां
सोमानां ते दध्याशिरः॥ त्वं सुतस्य। सुक्रतो शोभनकर्मन् शोभनप्रज्ञ वा हे इंद्र त्वं सुतस्य अभिषुतस्य सोमस्य पीतये पाना
र्थं ज्यैष्ठ्याय देवेषु ज्येष्ठत्वार्थं च सद्यस्तस्मिन्नेव क्षणे वृद्धो अजायथाः अभिवृद्धो सहसा हेतुयुक्तोऽभूः॥ आ त्वा विशंत्वाशवः हे
इंद्र त्वा सोमासः सोमाः आविशंतु आभिमुख्येन प्रविशंतु। कीदृशाः आशवः सवनत्रये प्रकृतिविकृतिष्वव्याप्तिवंतः कीदृ
शः इंद्र गिर्वणः गीर्भिः स्तुतिभिः संभजनीयः देवविशेषः गिर्वणा देवो भवति गीर्भिरेनं वनयंतीति यास्कः॥ तथाविध हे इंद्र ते
तव प्रचेतसे प्रकृष्टज्ञानाय शं सुखरूपाः सोमाः संतु गृणंतीति गिरः स्तुतयः॥ ९॥ त्वां स्तोमा अवीवृधन्। हे शतक्रतो
त्वां स्तोमाः सामगानां स्तोत्राण्यवीवृधन् वर्धितवंति बह्वृचानामुक्थाः शस्त्राणि त्वामवीवृधन् यस्मात्पूर्वमसीत् तस्मा
दिदानीमपि नोस्माकं गिरः स्तुतयः त्वां वर्धंतु सर्ववृद्धिं कुर्वंतु। अक्षितोतिः॥ इंद्रः इमं वाजं सोमरूपमन्नं सनेत् संभजेत् की
दृशः इंद्रः अक्षितोतिः अक्षितरक्षणः कदाचिदपि रक्षां न विमुंचतीत्यर्थः कीदृशं वाजं सहस्रिणं प्रकृतिविकृतिषु च
प्रवर्त्तमानत्वेन सहस्रसंख्यायुक्तं यस्मिन् वाजे विश्वानि सर्वाणि पौंस्यानि पुंस्त्वानि बलानि वर्त्तंते तादृशं वाजिनमिति पूर्वेण

(६)

न्वयुः। मा नो मर्त्ताः। हे गिर्वणः इंद्र मर्त्ताः विरोधिनो मनुष्याः नोस्मदीयानां तनूनां शरीराणां अभिद्रुहन् मा भिंतो द्रोहं मा कुर्युः।
ईशानः समर्थस्त्वं वधैर्वैरिभिः संपाद्यमानं वधं अस्मत्तः पृथक् कुरु। युंजंति। इंद्रो हि परमैश्वर्ययुक्तः परमैश्वर्यं चाग्निवाय्वादि
सनक्षत्ररूपेणावस्थानात् उपपद्यते। ब्रध्नमादित्यरूपेणावस्थितं अरुषं हिंसकरहिताग्निरूपेणावस्थितं चरंतं वायुरूपेण सर्व
तः प्रसरंतं इंद्रं परितस्तुषः परितो लोकत्रये वर्त्तिनः प्राणिनो युंजंति स्वकीये कर्मणि देवतात्वेन संबंधं कुर्वंति। तस्यैवेंद्रस्य मूर्त्तिवि
शेषभूतानि रोचनानि नक्षत्राणि दिवि द्युलोके रोचंते प्रकाशंते। अस्य मंत्रस्योक्तार्थपरत्वं ब्राह्मणांतरे व्याख्यातं। युंजंत्यस्य का
म्या। अस्य प्रभ्वादिशब्दप्रतिपाद्यस्यादित्यादिमूर्त्तिभिस्तत्र तत्रावस्थितस्येंद्रस्य रथे हरी एतन्नामानौ द्वावश्वौ सारथयो युंजंति। इंद्रसं
बंधिनोरश्वयोर्हरिनाम कथितं। कीदृशौ हरी काम्या कामयितव्यौ विपक्षसा विविधे पक्षसी रथस्य पार्श्वौ ययोस्तौ विपक्षसौ रथस्य
द्वयोः पार्श्वयोर्योजिताविद्यर्थः। शोणा रक्तवर्णौ। धृष्णू प्रगल्भौ नृवाहसा नृणां पुरुषाणां इंद्रतत्सारथिप्रमुखानां वोढारौ। के
तुं कृण्वन्नकेतवे। हे मर्याः मनुष्याः इदमाश्चर्यं पश्यत इत्यध्याहारः। किमाश्चर्यमिति तदुच्यते। आदित्यरूपो यमिंद्रः उषद्भिर्दाह
केरश्मिभिः प्रतिदिनमुषःकाले समजायथाः उदपद्यत। सूर्यस्यैवास्तमये मरणमुपचर्यते। अत्यंतेन बहुवचनं कृतासंबोध
नं क्रियते। हे मर्य प्रतिदिनं त्वमजायथाः इति योज्यं। किं कुर्वन् अकेतवे रात्रौ निद्राभिभूतत्वेन प्रज्ञानरहिताय प्राणिने केतुं कृण्व
न् प्रज्ञानं कुर्वन् पेशसे रात्रौ बंधकारावृतत्वेनाभिव्यक्तत्वा रूपरहिताय पदार्थाय प्रातरंधकारनिवारणेन पेशो रूपमभि
व्यज्यमानं कुर्वन् पेशः इति रूपनाम पिंशतिर्यास्कः। अकेतवे पेशसे इति चतुर्थ्यौ षष्ठ्यर्थे द्रष्टव्यौ। आदह स्वधामनु॥

आदित्यपदमानंतर्यार्थे निपातः। अहेत्यवधारणार्थः। आदह वर्षर्त्तोरनंतरं स्वधामनु इत् पुनः पुनर्जनिष्यमाणमन्नमुदकं
मनुलक्ष्य मरुतो देवा गर्भत्वमेरिरे। मेघमध्ये जलस्य गर्भाकारं प्रेरितवंतः। प्रतिसंवत्सरमेवं कुर्वंतीति द्योतयितुं पुनः शब्दः प्रयुक्तः।
कीदृशा मरुतः यज्ञियं यज्ञार्हं नाम दधानाः धारयंतः। स्वधा स्वलोकं दधातीति पुष्टातीति स्वधा। वीळु चित्। अस्ति किंचिदुपाख्या
नं पणिभिर्देवलोकाद्गावो पहृताः अंधकारे प्रक्षिप्ताः ताश्चेंद्रो मरुद्भिः सहाजयदिति। एतच्चानुक्रमणिकायां मंत्रांतरे च दृष्टांतल
यात्सूचितं। निरुद्धा आपः पणिनेव गाव इति। तदेतदुपाख्यानमभिप्रेत्योच्यते। हे इंद्र वीळु चित् दृढमपि दुर्गमस्थानं आरुजत्नुभि
र्भंजिद्भिर्वह्निभिर्वोढृभिः अन्यत्र नेतुं समर्थैर्मरुद्भिः सहितस्त्वं गुहाचित्। गुहायामपि स्थापिता उस्रिया गाः अन्वविंदः अन्विष्य लब्धवा
नसि। देवयंतो यथा। देवयंतो मरुत्सु ... कां देवानिच्छंतो गिरः स्तोतारः ऋत्विजः महां प्रोक्तं मरुद्गणं विदद्वसुं वेदयद्भिः स्वमहिमप्रख्या
पकैर्वसुभिर्धनैर्युक्तं श्रुतं विख्यातं मरुद्गणस्य दृष्टांतः। यथा मतिं मंतारं इंद्रं यथा स्तुवंति तथैवेत्यर्थः। देवानात्मन इच्छंतः। इंद्रेण संहि।
हे मरुद्गण त्वं इंद्रेण संजग्मानः संगच्छमानः संदृक्षसे हि। सम्यक् दृश्यसे खलु अश्रवत्र्य अस्माभिर्दृश्यं इत्यर्थः। कीदृशेनेंद्रेण अबि
भ्युषा भीतिरहितेन। कीदृशा विंद्र मरुद्गणो मंदू नित्यप्रमुदितौ समानवर्चसा तुल्यदीप्ती। पुरा कदाचिद्वृत्रवधे दग्धायादिंद्रस्य सखायः स
र्वे देवा वृत्रश्वासेनापसरंतः तदानीमिंद्रस्य वृत्रसंबंधि सकलसेनाजयार्थं मरुद्भिः संगमो भूत्। सोयमर्थो वृत्रस्य त्वाश्वसथादिति मंत्रे संगृही
तः। इंद्रो वै वृत्रं हनिष्यन्निति ... इंद्रशब्दः परमैश्वर्यवंतं मरुद्गणं वाभिधत्ते। तदानीमिंद्रस्य संबोधनं बहिरेवाध्याहर्त्तव्यमिति या
स्कः। इंद्रेण हि संदृक्षसे। अनवद्यैरभिद्युभिः मखः प्रवर्त्तमानो यं यज्ञः। अनवद्यैः दोषरहितैः अभिद्युभिः द्युलोकमभिगतैः काम्यैः फलप्रद
त्वेन कामयितव्यैर्गणैर्मरुत्समूहैः सहितमिंद्रस्य सहस्वल्लोपेतं यथा भवति तथार्चति पूजयति। अयं यज्ञो मरुतां इंद्रं चातिशयेन प्रीण

पतीत्यर्थः ॥ अतः परिज्मन् । हे परिज्मन् परितो व्याप्तिमन् मरुद्गणस्य श्वातोऽस्मान्मरुद्गणस्थानादंतरिक्षात् आगहि अस्मिन्कर्मण्यागच्छ दिवो वा द्युलोकाद्वा समागच्छ । रोचनात् अधि दीप्यमानादादित्यमंडलाद्वा समागच्छ । अस्मदीयकर्मकाले यत्र यत्रापि वसति ततः सर्वस्मादागच्छेत्यर्थः ॥ किमर्थमागमनमिति तदुच्यते । अस्मिन्कर्मणि वर्त्तमानः ऋत्विक् गिरः स्तुतीः समृंजते सम्यक् प्रसाधयति । ऋंजतिः प्रसाधनकर्मेति यास्कः ॥ एतास्तुतीः श्रोतुमागच्छेत्यर्थः ॥ तास्त्रिविधाः ऋचः परोक्षकृताः प्रत्यक्षकृताः ॥ इतो वा सातिं । इंद्रदेवं प्रति सातिं धनदानं अधिइम हे आधिक्येन याचामहे । कस्माल्लोकादिति तदुच्यते । इतोऽस्मादृश्यमानात्पार्थिवात्पृथिवीलोकाद्वा दिवः द्युलोकाद्वा महो महतः प्रौढाद्रजसो वा पश्वादीनां रंजकादंतरिक्षलोकाद्वा अयमिंद्रो यतः कुतश्चिदानीयास्मभ्यं धनं प्रयच्छत्वित्यर्थः ॥ इंद्रमिद्गाथिनः । गाथिनः गीयमानसामयुक्ताः उद्गातारः इंद्रमित् इंद्रमेव बृहद् । त्वामिद्धि हवामहे इत्यस्यामृच्युत्पन्नेन बृहन्नामकेन साम्ना अनूषत स्तुवंतः ॥ अर्किणः अर्चनहेतुमंत्रोपेताः होतारः अर्केभिः ऋग्रूपैर्मंत्रैः अनूषत । येन वज्रिशिष्टा अध्वर्यवः वाणीः वाणिभिर्यजूरूपाभिरिंद्रमनूषत । अर्कशब्दस्य मंत्रपरत्वं यास्केनोक्तं । अर्को मंत्रो भवति यदेनेनार्चंतीति ॥ इंद्र इद्धर्योः सचा । इंद्र इत् इंद्र एव हर्योः हरिनामकयोरश्वयोः सह युगपदा आसंमिश्लः सर्वतः सम्यक् मिश्रयिता । कीदृशयोः हर्योः वचोयुजा इंद्रस्य वचनमात्रेण रथे युज्यमानयोः सुशिक्षितयोरित्यर्थः । अयमिंद्रो वज्री वज्रयुक्तः हिरण्ययः हिरण्मयः सर्वाभरणभूषित इत्यर्थः ॥ इंद्रो दीर्घाय । अयमिंद्रो दीर्घाय निरंतराय चक्षसे दर्शनाय दिवि द्युलोके सूर्यमाहरत् । पुरा वृत्रेण स्फुरेण जगति यदा पादितमः तं निवारणेन प्राणिनां दृष्टिसिध्यर्थं आदित्यं द्युलोके स्थापितवानित्यर्थः ॥ स च सूर्यः गोभिः स्वकीयरश्मिभिरद्रिं पर्वतं प्रउगं सर्वं जगत् व्यैरयत् विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः ॥ अथवा इंद्र एव गोभिर्जलैर्निमित्तभूतैरद्रिं मेघं व्यैरयत् विशेषेण प्रेरितवान् ॥ इंद्र वाजेषु नोऽव । हे इंद्र उग्र शत्रुभिरप्रधृष्य त्वं उग्राभिरप्रधृष्याभिः ऊतिभिः रक्षाभिः वाजेषु युद्धेषु नः अस्मानव रक्ष । तथा सहस्रप्रधनेषु सहस्रसंख्याकगजाश्वादिलाभयुक्तेषु महायुद्धेषु रक्ष । ६

इंद्रं वयं । वयं अनुष्ठातारः महाधने प्रभूतधननिमित्तमिंद्रं हवामहे आह्वयामः । अर्भे अर्भके स्वल्पेपि । धने निमित्तभूते सति इंद्रं वयं हवामहे । कीदृशं युजं सहकारिणं सखायं हितं वा । वृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय वज्रिणं वज्रोपेतं ॥ स नो वृषन्नमुं । हे सत्रादावन् अस्मदभीष्टानां सर्वेषां फलानां सह प्रदातः । अतोऽत्र सत्रादिनिष्पत्त्यर्थं हे वृषन् वृष्टिप्रदेंद्र । नोऽस्मदर्थं अमुं दृश्यमानं चरुं मेघं अपावृधि उद्घाटय तथैवास्मभ्यमस्मदर्थं अप्रतिष्कुतः प्रतिशब्दरहितः यद्यदस्माभिर्याचितं तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयति । अतोऽस्मद्विषये कदाचिदप्यस्खलितः प्रतिशब्दरहितः एतदेवाभिप्रेत्य यास्क आह । अप्रतिष्कुतः अप्रतिस्खलितो वा ॥ तुंजेतुंजे । तस्मिंतस्मिन् फलदातरि देवांतरे । ये स्तोमाः स्तोत्रविशेषाः उत्तरे उत्कृष्टाः संति ते स्तोमाः सर्वेऽपि वज्रिणो वज्रयुक्तस्येंद्रस्य सुष्टुतिं योग्यां शोभनस्तुतिं न विंधे न विंदामि । इंद्रस्यातिशयगुणबाहुल्येन देवांतरेषु उक्तमेनः प्रसिद्धान्यपि स्तोत्राणि न पर्याप्तानीत्यर्थः ॥ यास्कः । तुंजस्तुंजते दानकर्मणः ॥ वृषा यूथेव । कामानां वर्षिता इंद्रः ओजसा स्वकीयबलेन अनुग्रहार्हान् कृष्टीः मनुष्यानियर्त्ति प्राप्नोति । कीदृश इंद्रः ईशानः समर्थः अप्रतिष्कुतः प्रतिशब्दरहितः प्रार्थ्यमानं न परिहरतीत्यर्थः । इंद्रस्य दृष्टांतः वंसगः वननीयगतिर्वृषभो यूथेव । गा यूथानि यथा प्राप्नोति तद्वत् ॥ य एकः । यः इंद्रः स्वयमेक एव चर्षणीनां मनुष्याणां विरज्यति ईष्टे तथा वसूनां धनानां विरज्यति । स इंद्रः पंचनिषादपंचमानां क्षितीनां निवासार्हाणां वर्णानां अनुग्रहे तिशेषः ॥ इंद्रं वो विश्वतः । हे ऋत्विग्यजमानाः विश्वतः सर्वेभ्यो जनेभ्यः परि उपरि वर्तमानं इंद्रं वो युष्मदर्थं हवामहे आह्वयामः । अतः स इंद्रोऽस्माकं केवलोऽसाधारणोऽस्तु इतरेभ्योऽप्यधिकमनुग्रहमस्मास्वकरोत्वित्यर्थः ॥ एंद्र सानसिं । हे इंद्र ऊतये अस्मद्रक्षणार्थं रयिं धनमाहर । कीदृशं रयिं सानसिं संभजनीयं सजित्वानं समानेषु जयशीलं लंभने न हि शत्रुभ्यः संपाद्यमत्र वाजी यं न सदासहं सर्वदा शत्रूणामभिभवहेतुं वर्षिष्ठं अतिशयेन वृद्धं प्रभूतमित्यर्थः ॥ नि येन मुष्टिहत्यया । धनेन सं

7

पादितानां भटानां निमुष्टिहत्यया नितरां मुष्टिप्रहारेण नितां शत्रून् निरुणधामहै निरुन्धा करवामहै तादृशं धनमाहरे
त्यर्थः ॥ त्वोतासः त्वया रक्षिता वयं अर्वता अस्मदीयेनाश्वेन निरुणधामहा इत्यनुषंगः ॥ पदातियुद्धे नाश्वयुद्धेन शत्रून्विना
शयामेत्यर्थः ॥ इंद्र त्वोतास इति ॥ हे इंद्र त्वोतासस्त्वया पालिता वयं घना घनं शत्रुप्रहरणान्यंत दृढं वज्रमायुधमाददीमहि त्वी
कुर्महि तेन च वज्रेण युद्धियुद्धे स्पृधः स्पर्धमानान् शत्रून् संजयेम सम्यग्जयेम ॥ त्वोतास उक्तं ॥ वयं शूरेभिः ॥ वयं कमनुष्ठा
तारः शूरेभिः शौर्ययुक्तैः अस्तृभिरायुधानां प्रक्षेप्तृभिर्भटैः संयुज्येमहीति शेषः ॥ हे इंद्र तादृशा भटसहिता वयं युजा स
हायभूतेन त्वया पृतन्यतः सेनामिच्छतः शत्रून् सासह्याम अतिशयेनाभिभवेम ॥ महां इंद्र इति ॥ अयमिंद्रो महान् शरीरेण
प्रौढः परश्च गुणैरुत्कृष्टो पि नु किंच वज्रिणे वज्रयुक्ताय अयं महित्वं पूर्वोक्तं द्विविधमाधिक्यं सर्वदास्तु ॥ स्वभावसिद्धस्या
पि भक्त्या प्रार्थनमेतत् ॥ किंच ॥ द्यौर्न द्युलोक इव ॥ शवो बलं इंद्रस्य सेनास्थपं प्रथिना प्रथित्वेन युज्यतामिति शेषः ॥ यथा
द्युलोकः प्रभूतः एवमस्य सेना प्रभूतास्तु शब्दोपयुपि क्षिप्रनामसु नुमस्विति पठितः ॥ तथा यत्र तस्यान्वयाभावान्नि
पातत्वेनानेकार्थत्वसंभवाच्च समुच्चयार्थोत्र गृहीतः ॥ नशब्दो लोके प्रतिषेधार्थ एव ॥ समोहे वा य इति ॥ ये नरः पुरुषाः समो
हे संग्रामे तोकस्यापत्यस्य सनितौ वा लाभे वा आशत व्याप्तिवंतः इत्थस्तुयेति शेषः ॥ वा अथवा विप्रासो मेधाविनः
धियायवः प्रजाकामाः संतः आशत ते सर्वे लक्ष्यंत इत्यध्याहारः ॥ यः कुक्षिः सोमपातमः ॥ यः कुक्षिरस्येंद्रस्योद
रः प्रदेशः सोमपातमः अतिशयेन सोमस्य पाता स कुक्षिः समुद्र इव पिन्वते वर्धते सेचनार्थो धातुः सोचि

चितेन रसेनाद्रिंल क्षयति ॥ काकुदो मुखसंबंधिन्य उर्वीर्बह्वीरापो न जलानीव जिह्वासंबंधं नात्योदकं यथा कदाचिदपि न शु
ष्यति तथेंद्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः ॥ एवा ह्यस्य ॥ अस्येंद्रस्य सूनृता प्रियसत्यरूपा वाग्दाशुषे हविर्दत्तवते यज
मानाय तदर्थं एवा हि एवं खलु अनंतरपदवक्ष्यमाणगुणोपेता भवतीत्यर्थः ॥ कीदृशी विरप्शी विविधरूपणोपेतवाक्ययुक्ता
बहुविधोपचारवादिनीत्यर्थः ॥ गोमती बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः ॥ अत एव मही महती पूज्या पथोक्त्वा चादशांतः ॥
पक्वाशाखा न यथा बह्वीभिः पक्वैः फलैरुपेता फलनसमृक्षा दिश्या स्वाप्रीतिहेतुस्तद्वत् ॥ एवा हि ते विभूतयः ॥ हे इंद्र ते तव विभू
तयः ऐश्वर्यविशेषाः एवा हि एवंविधाः खलु ॥ किंविधा इति तदुच्यते मावते मत्सदृशाय दाशुषे हविर्दत्तवते यजमानाय ऊ
तयस्त्वदीयरक्षारूपाः सद्यश्चित्संति ॥ यज्ञकर्मानुष्ठितं तदैव भवंति ॥ एवा ह्यस्य काम्या ॥ अस्येंद्रस्य स्तोमः सोमसाध्यं स्तोत्रं
उक्थं च शस्त्रं साध्यं शस्त्रादि अपि ॥ एवा हि एते उभे एवंविधे खलु किंविधे इति तदुच्यते ॥ काम्या कामयितव्यौ शंस्या शस्त्रिभिः शं
सनीये ॥ किमर्थं शंसनमिति तदुच्यते ॥ इंद्राय सोमपीतये इंद्रस्य सोमपानार्थं ॥ एवा ह्यस्येति व्यवहितमंत्रेण गतः ॥ इंद्रेहि म
त्स्यंधसः ॥ हे इंद्र अस्मिन्कर्मण्यागच्छ ॥ आगत्य च विश्वेभिः सर्वैः सोमपर्वभिः सोमरसरूपैः अंधसः अंधोभिरन्नैः मत्ति मा
द्यन् हृष्टो भव ॥ तत ऊर्ध्वं ओजसा बलेन महान्भूत्वा अभिष्टिभिः शत्रूणामभिभविता भवेति शेषः ॥ एमेनं ॥ इतिस्य नर्थकः पादपू
रणाय प्रयुक्तः ॥ हे अध्वर्यवः सुते अभिषुते च समन्त्तिसोमे एनं सोमं इंद्राय इंद्रार्थं आसृजत पुनरभ्युन्नयत ॥ शुक्रा मंथिचम
सगणाय पुनरभ्युन्नयनमापस्तंबेनोक्तं ॥ होत्रकाणां चमसाध्वर्यवः सकृत् सकृदुत्तामुकस्याभ्युन्नीयो पावर्तध्वमिति कीदृशाय मे
नं मंदिहर्षहेतुं च किं साधुकरणशीलकीदृशाय इंद्राय मंदिने हर्षयुक्ताय ॥ विश्वानि सर्वाणि कर्माणि चक्रये कृतवते ॥ सर्वकर्मनिष्पादि

४

नशीलायेत्यर्थः।मत्स्वा सुशिप्र।हे सुशिप्र शोभनहनो।शोभननासिके वा।शिप्रे हनू नासिके इति यास्केनोक्तत्वात्।तादृश हे इंद्र मं
दिभिः हर्षहेतुभिः स्तोमेः स्तोत्रैर्मत्स्व हृष्टो भव।हे विश्वचर्षणे सर्वमनुष्ययुक्त सर्वैर्यजमानैः पूज्य इत्यर्थः।तादृश हे इंद्र त्वं एषु यागग
तेषु त्रिषु सवनेषु सचा देवैरन्यैः सहागच्छेति शेषः।असृग्रमिंद्र।हे इंद्र त्वदीयाः स्तुतीः असृग्रं सृष्टवानस्मि।ता गिरः स्वर्गे वर्तितं त्वां प्र
ति उदहासत उद्गताः।तत्र प्रभुवनत्वादृशी गिरः त्वं अजोषाः सेवितवानसि।कीदृशं त्वां वृषभं कामानां वर्षितारं पतिं सोमस्य पातारं यजमा
नानां पालयितारं पाता वा पालयिता पतिरिति यास्केनोक्तत्वात्।सं चोदय।हे इंद्र वरेण्यं श्रेष्ठं राधो धनं चित्रं मणिमुक्तादिरूपेण बहुविधं अ
वगिरस्मदभिमुखं यथा भवति तथा संचोदय सम्यक्प्रेरय।भोगाय यावत्पर्याप्तं तावद्विभुशब्देनोच्यते।ततोप्यधिकं प्रभुशब्देनोच्य
ते।तादृशं धनं ते तव असदिति अस्त्येव तस्मादस्मभ्यं प्रयच्छेत्यर्थः।अस्मान्त्सु।हे तुविद्युम्न प्रभूतधन इंद्र राये धनलिप्स्यर्थं अस्मा
नुष्ठातॄन् तत्र कर्माणि चोदय सु सुष्ठु प्रेरय।कीदृशानस्मान् रभस्वतः उद्योगवतः यशस्वतः कीर्तिमतः।सं गोमत्।हे इंद्र श्रवो धनं अ
स्मे संधेहि अस्मभ्यं सम्यक्प्रयच्छ।कीदृशं श्रवः गोमत् बहुभिर्गोभिर्निरूपितं वाजवत् प्रभूतेनान्नेनोपेतं पृथु परिमाणेनाधिकं बृहत् गुणे
रधिकं विश्वायुः कृत्स्नायुष्यकारिणं अक्षितं विनाशरहितं।अस्मे धेहि।हे इंद्र बृहत् प्रभूतं नृवत् कीर्तिं अस्मे धेहि अस्मभ्यं प्रयच्छ
तथा सहस्रसातमं अतिशयेन सहस्रसंख्यादानोपेतं द्युम्नं धनमस्मे धेहि।तथा ताः ब्रीहियवादिरूपेण प्रसिद्धाः रथिनी
बहुरथोपेता इषोन्नान्यस्मे धेहि।वसोरिंद्रं।वसोर्वसुनोस्मदीयस्य धनस्य जनयेरक्षणार्थं इंद्रं हो मा वयमाह्वयामः।
किं कुर्वंतः गीर्भिः स्तुतिभिर्गृणंतः स्तुवंतः।कीदृशमिंद्रं वसुपतिं धनपालकं ऋग्मियं ऋचो मिमीते ऋग्मीः तं ऋग्मियं ऋत्वां गंतारं याग
देशं गमनशीलं।सुतेसुते।आकार इत्येतदस्य पादपूरणे पदाख्यातिवचनमाकारः।आंत्यदर्थे अभिख्याता विसभिधाना

८

दिष्वक्षोपि राद्यर्थः।इयर्त्तिगच्छत्यनुष्ठेयं कर्म प्राप्नोतीत्यरिर्यजमानः।यद्वा अरिः सर्वोपि धनः।तानु।इंद्रायासु ते सुते इंद्रा
र्थमभिषुते तत्तत्सोमे शूषं बलं अर्चति स्तौति इंद्रस्य पराक्रमं प्रशंसतीत्यर्थः।कीदृशं शूषं बृहत् प्रौढं।कीदृशायेंद्राय न्योक
से नियतस्थानाय बृहते प्रौढाय।गायंति त्वा।हे शतक्रतो बहुकर्मन् बहुप्रज्ञ वा नु इंद्र त्वां गायत्रिणः उद्गातारः गायंति स्तुवंति।
अर्किणं अर्चनमंत्रहेतुयुक्ताः होतारः अर्कमर्चनीयमर्चंति।शास्त्रगतैर्मंत्रैः प्रशंसंति ब्रह्माणो ब्रह्मभृतयः इतरे ब्राह्मण
स्त्वा मुद्येमिरे उन्नतिं प्रापयंति।तत्र दृष्टांतः वंशमिव यथा वंशाग्रे नृत्यंतः शिल्पिनः प्रौढं वंशं उन्नतं वंशं कुर्वंति।यथा स्व
स्मार्गवर्त्तिनः स्वकीयं कुर्वंति तद्वत्।एतामृचं यास्क एवं व्याचष्टे।यत्सानोः सानुं।यत्सानोः सानुमारुहत् यजमानः सोम
वल्लीसन्निधाधाहरणाय एतस्मात्सर्वतभागादपरं पर्वतमारूढवान् तथा भूरि भूतं कर्त्वं कर्मसोमयागरूपं अस्पष्ट स्पष्टवान्
उपक्रांतवानित्यर्थः।तत्तदानीमिंद्रः अर्थं यजमानस्य प्रयोजनं चेतति जानाति।ज्ञात्वा च वृष्टिकामानां वर्षिता सन् यूथे
न मरुद्गणेन सह एजति कंपति।स्वस्थानाद्यज्ञभूमिभागं प्रति मुधुक्क इत्यर्थः।युक्ष्वा हि।हे सोमपाः सोमपानयुक्तेंद्र हरी त्व
दीयावश्वौ युक्ष्वा हि सर्वथा संयोजय।अथानंतरं नोस्मदीयानां गिरां स्तुतीनां उपश्रुतिं समीपे श्रवणमुद्दिश्य चर तत्र देशे ग
च्छ।कीदृशौ हरी केशिना स्कंधप्रदेशे लंबमानकेशयुक्तौ।वृषणा सेचनसमर्थौ युवानौ कक्ष्यप्रा अश्वस्योदरबंधनरज्जुः कक्ष्यः
तस्य पूरकौ पुष्टांगौ इत्यर्थः।एहि स्तोमान्।हे वसो निवासकारणभूतेंद्र एहि अस्मिन्कर्मण्यागच्छ।आगत्य च स्तोमानुद्गातृप्रयु
क्तानि शस्त्राणि अभिस्वर।अभिलक्ष्य प्रशंसालक्ष्यरूपं शब्दं कुरु तथाध्वर्युमभिलक्ष्य गृणीहि शब्दं कुरु तथा होतृप्रयुक्तानि
शस्त्राण्यालक्ष्यरूपं शब्दं कुरु परितोषेण सर्वेर्न्रत्विजः प्रशंसेत्यर्थः।ततऊर्ध्वं नोस्माकं ब्रह्म चान्नं यज्ञं च अनुष्ठीयमानं कर्म

९

च सत्त्वा सहस्र वर्धय स्तां गतस्य संपादनेन पञ्चवर्षयिसातफलमंनंच प्रयच्छ कुरु ॥ ४ ॥ कथमिंद्राय । इंद्रायेंद्रार्थं विर्द्दनं रत्नद्विसादनं मुक्थं
शास्त्रं शंस्यमेस्माभिः शंसनीयं । कीदृशायेंद्राय पुरुनिष्ष्ठि धेवहूनां शत्रूणां निषेधकारिणो शक्रः इंद्रो नोस्मदीयेषु सुतेषु पुत्रेषु सु
त्येषु च सखित्वेष्वपि यथायेन प्रकारेण शरणत् । अतिशायेन । शग्धं कुर्यात् तथा तथा शंस्यमिति पूर्वेणान्वयः । अस्मदीयेन शास्त्रे
ण परितुष्ट इंद्रोस्माकं पुत्रानस्मिन्संख्याकानि च वक्रुथा प्रशंसत्वित्यर्थः । तमित्सखित्वं । सखित्वे निमित्तभूते सति तमित्तुलमेवेंद्र
मीमहे प्राभुमः याचामहे इति व्याख्येयं । तथा रायेधनार्थं तमीमहे । तथा सुवीर्ये शोभनसामर्थ्ये निमित्तं तमीमहे ॥ उत अपि च शुक्रः
शक्तिमान्सः इंद्रो नोस्मभ्यं वसूधनं दयमानः प्रयच्छन् शकत् अस्मदीयरक्षणे शक्तो भूत् । स्वविवृतं सनिरजं स्वविवृतं सनिर
जं । हे इंद्र यशोनं कर्मफलभूतं स्वविवृतं सुसर्वत्र प्रसृतं सनिरजं सखेन निःशेषं प्राप्तुं शक्यत्वादात मित्तत्वया शोधितं च संपन्न
मिति शेषः । दृलः परं क्षीरादिरसलाभार्थं गवां व्रजं निवासस्थानं अपावृधि अपावृत मुक्तद्वारं कुरु । हे अद्रिवः पर्वतोपलक्षि
त वज्रयुक्तेंद्र रायो धनं कृणुष्व संपादय । न हि त्वा रोदसी । हे इंद्र ऋघायमाणं शत्रुरभं कुर्वाणं त्वां रोदसी द्यावापृथिव्यावपि त्वदीय
महिमानमहिद्रन्वतः प्राप्तुं न समर्थे इत्यर्थः । ताद्दशास्त्वं स्वर्वती स्वर्लोकयुक्ताः अपो वृष्टिरूपाः जेषः जय प्रेरयेत्यर्थः । अपां स्व
र्गसिबंधश्चान्यत्र दिवो वृष्टिं च्यावयतीति सत्यं । किं च वृष्टिप्रदानादन्नं संप्रति रूर्ध्वं अस्मभ्यं क्षीराक्षिरसप्रदाः गोः सं धूनुहि ।
सम्यक् प्रेरय । आश्रुत्कर्णश्रुधि । हे आश्रुत्कर्ण सर्वतः श्रोतारौ कर्णौ यस्य तादृगिंद्र त्वमस्मदीयमाह्वानं नु क्षिप्रं श्रुधि शृणु
मेमम हो तुः । गिरश्चित्स्तुतीरपि दधिष्व चिते धारय किं च मदीयमिमं स्तोत्ररूपं वाक्सनूहं युज श्चित्स्वकीयसख्युरपि अं त
रं कृष्व आसन्नं कुरु । यस्य वचनं यस्य प्रियमन्यसे तद्वदस्मदीयस्तुतिष्वपि प्रीतिं कुर्वित्यर्थः ॥ विद्माहित्वा । हे इंद्र त्वां विजानीमः ।
कीदृशं वाजेषु वृषभं कामानामतिशयेन कामादीनां वर्षितुं स्तवकृतिं शरणं सम्यक् विषयामुद्दिश्य हूमहे त्वा माहूयामः कीदृशी

मूतिं सहस्रसातमां अतिशयेन धनस्य सहस्राणां दात्रीं ॥ आ तू न इंद्र ॥ हे इंद्र तुविषं नोऽस्मा श्रल गन्धनेति शेषः ॥ हे कौशिक
कुशिकपुत्रेंद्र मंदसानः हृष्टो मत्सोमस्त्वमपिबुतं सोमं पिबयपि विश्वामित्रः कुशिकस्य पुत्रः तथापि तद्रूपेणेंद्रस्यैवो
सन्नत्वात्कुशिकपुत्रत्वमविरुद्धं ॥ अयं नवतां तो नु क मणीकायामुक्तः । हे इंद्र नव्यं सर्वे इं वैस्तत्पं कर्मानुष्ठानपरं आयुर्जी
वितं प्रसूतिरप्रकर्षेण सृष्टु वर्धय । तनो मांसहस्रसां सहस्रसंख्याकलोजोपेतं ऋषिं अतीद्रिय द्रष्टारं कृधि कुरु ॥ परि
त्वा । हे गिर्वणः अस्मदीयस्तुतिभागिद्र विश्वतः सर्वेषु कर्मसु प्रयुज्यमानाः इमाः गिरः अस्मदीयाः स्तुतयः त्वां परितु वे
तु सर्वतः प्राप्नुवंतु । कीदृश्यो गिरः वृद्धायु मनु प्रवृद्धेनायुष्येनोपेतं त्वामनुसरस्य वृद्धयो वृद्धमानाः किं च ताः गिरः जुष्टाः त्व
या सेविताः सत्यो जुष्टयेऽस्माकं प्रीतिहेतवो भवंतु ॥ २० ॥ इंद्र विश्वाः । विश्वाः सर्वाः गिरोऽस्मदीयाः स्तुतयः इंद्रं अवीवृध
न्वर्धितवत्यः कीदृशमिंद्रं समुद्रव्यचसं समुद्रवद्व्याप्तवंतं रथीनां रथयुक्तानां योद्धॄणां मध्ये रथीतमं अतिशयेन रथयुक्तो
वाजानामन्नानां पतिं सत्पतिं सतां सन्मार्गवर्तिनां पालकं ॥ सख्ये त इंद्र ॥ हे शवसस्पते बलस्य पालकेंद्र तव सख्ये अनु
ग्रहप्रयुक्ते सखित्वे वर्तमाना वयं वाजिनोऽन्नवंतो भूत्वा मा भेम मा भैष्म अनुभयो नीतिं प्राप्ता मा भूम । अतस्त्वामभि यहे तु अभि
प्रणोनुमः सर्वतः प्रकर्षेण स्तुमः । कीदृशं त्वा जेतारं युद्धेषु अपराजितं अपराजितं पराजयरहितं पूर्वीरिंद्रस्य रातयः इंद्र
स्य इंद्र संबंधिनः रातयः धनदानानि पूर्वीः अनादिकालसिद्धाः प्रभूता वा अस्येंद्रस्य सर्वे यदन्यो धनदानमेव स्तान्नादस्यंतीत्यर्थः ॥
एवं सतीदृशानी तनोऽपि अयं जुमानस्तोतृभ्यः ऋचिभ्यो गोतमः गोसहितस्य वाजस्यान्नस्य पर्याप्तं मघं धनं यदि मंहते द
क्षिणारूपेण ददाति तदानीं जनयोवकुधनदानपूर्वकाणींद्रस्य अस्मद्विषयाणि रक्षणानि न विदस्यति विशेषेण पक्षीयते ॥ पुरां भिंदुः ।

अयमिंद्रः उच्यमानगुणयुक्तो जायते संपन्नः। कीदृशगुणकः इति तदुच्यते। पुरामसुराणां भिंदुर्भेत्ता। युवा कदाचिदपि वलीपलि
तादिवार्धकरहितः कविर्मेधावी अमितौजाः प्रभूतबलः विश्वस्य कर्मणः कृत्स्नस्य ज्योतिष्टोमादेः धर्त्ता पोषकः वज्री यजमानरक्ष
णार्थं सर्वदा वज्रयुक्तः पुरुष्टुतः बहुविधे तत्तत्कर्मणि स्तुतः॥ त्वं वलस्य। वलनामकः कश्चिदसुरो देवसंबंधिनीर्गा अपहृत्यैक
स्मिन् श्वभ्रे बिले गोपितवान्। तदानीमिंद्रस्तद्बिलं स्वसैन्येन समावृत्य तस्माद्बिलात् गा निःसारयामास तदिदमुपाख्यानं इंद्रो बल
स्य बिलमपोर्णोदित्यादिब्राह्मणेषु मंत्रांतरेषु च प्रसिद्धं तदेतद्धृदि निधाय अयं मंत्रः प्रवर्त्तते। हे वज्रिवः वज्रयुक्तेंद्र त्वं गोमतो ब
लस्य गोभिर्युक्तस्य बलनामकस्यासुरस्य संबंधि बिलं अपावः स्वसैन्यमुखेनापावृतवानसि। तदानीं तुज्यमानाः सो बलेन हिंस्य
मानाः देवाः अबिभ्युषः त्वदीयरक्षणबलादभीताः संतः त्वा माविषुः। प्राप्तवंतः॥ तवाहं शूर। हे शूर संग्रामे शौर्ययुक्तेंद्र तव रातिभिः
कर्मभिः त्वदीयैर्धनदानैर्निमित्तभूतैः अहं होता प्रत्यायं। त्वां पुनरागतोस्मि। पुरा बहुषु कर्मसु कृतस्तोत्रो धनस्य लब्धत्वादस्मिन्कर्म
णि प्रत्यागमनमित्युच्यते। किं कुर्वन्। सिंधुस्यंदमानं सोममावदन्सर्वतः कथयन् स्तोत्रपाठे त्वदीयां धनदानकीर्त्तिं प्रकटयन्नि
त्यर्थः॥ हे गिर्वणः गीर्भिर्वननीयेंद्र कारवः कर्त्तारः ऋत्विग्यजमानाः उपातिष्ठंत पुरा धनलाभार्थं त्वामुपस्थितवंतः। उपस्थाय च त
स्य तादृशस्य दायोपेतस्य ते तव धनदानं विदुर्जानंति। गिर्वणःशब्दं यास्क इत्थं निर्वक्ति। गिर्वणा देवो भवति गीर्भिरेनं वनयंती
ति॥ मायाभिरिंद्र। हे इंद्र त्वं मायिनं नानाविधकपटोपेतं शुष्णं भूतानां शोषणहेतुं एतन्नामकमसुरं मायाभिः तत्प्रतिकूलैः कप
टविशेषैः अवधाः। तद्वधोपायगोचरप्रज्ञाभिः अवातिरः हिंसितवानसि। एतच्च यास्केनोक्तं। इंद्रः शुष्णं जघानेति। शुष्णं पिप्रुमित्या
दिमंत्रे चायमर्थो विस्पष्टः। मेधिराः मेधावंतो अनुष्ठातारः तस्य तादृशस्य ते तव महिमानं विदुः जानंति। तेषां जातॄणां अ

९

श्रवांस्युन्नय। इंद्रमीशानमोजसा। स्तोमाः स्तोतारः ऋत्विजः ओजसा बलेन ईशानं जगतो नियामकमिंद्रं अभ्यनूषत स
र्वतस्तुवंतः। यस्येंद्र रातयः धनदानानि सहस्रं सहस्रसंख्योपेतानि संति उत वा अथवा भूयसीः सहस्रसंख्याया अप्यधिकाः संति तमिं
द्रमिति पूर्वत्रान्वयः॥ अग्निं दूतं। अग्निर्देवानां दूत आसीदुशना काव्यः असुराणाम्। अग्निं तादृशं देवदूतं तैत्तिरीये ब्राह्मणे उक्तं। अस्मिन्क
र्मणि वृणीमहे संभजामहे। कीदृशं होतारं देवानामाह्वातारं विश्ववेदसं सर्वधनोपेतं अस्य प्रवर्त्तमानस्य यज्ञस्य निष्पादकत्वेन सुक्रतुं
शोभनकर्माणं शोभनप्रज्ञं वा। मघमित्यष्टाविंशतिसंख्याकेषु धननामसु वेदसुशब्दः पठितः॥ अग्निमग्निं हवीमभिः। यद्यप्यग्निः
स्वरूपेणैक एव तथा प्रयोजकभेदादाहवनीयादिस्थानभेदात् पावकादिविशेषणभेदाद्बहुविधत्वमभिप्रेत्याग्निमग्निमिति
वीप्सा। तं हवीमभिः आह्वानकरणैर्मंत्रैः सदा हवंत निरंतरमनुष्ठातार आह्वयंति। कीदृशं विश्पतिं विशां प्रजानां होत्रादीनां पावकं ह
व्यवाहं यजमानसमर्पितस्य हविषो देवान्प्रति वोढारं। अत एव पुरुप्रियं बहूनां प्रीत्यास्पदं॥ अग्ने देवान्। हे अग्ने जज्ञानः अर
ण्योः सकाशात् त्वं वृक्तबर्हिषे आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय। तं यजमानमनुग्रहीतुमिह कर्मणि इह विभुजो देवानावह नोस्मदर्थं होता
देवानामाह्वाता त्वमीड्यः स्तुत्योसि॥ तां उशतः। हे अग्ने यस्मात्कारणात्त्वं दूत्यं पासि देवानां दूतकर्म प्राप्नोषि तस्मात्कारणादुशतो हविः
कामयमानान्देवान् हविःस्वीकारार्थं विबोधय विबोध्य च अस्मिन्बर्हिषि अस्मिन्कर्मणि तैर्देवैः सह आसत्सि आसीद आगत्योपविश॥ घृ
ताहवन दीदिवः। हे घृताहवन घृतेनाहूयमान दीदिवः दीप्यमानाग्ने त्वं रक्षस्विनः रक्षोयुक्तान् रिषतः हिंसकान् शत्रून्प्रति अस्माकं प्र
तिकूलान् दहस्व सर्वथा भस्मीकुरु॥ अग्निनाग्निः। अग्निराहवनीयाख्यः स्वस्मिन्प्रक्षिप्यमाणेनाग्निना निर्मथ्येन प्रणीतेन वा सह स
मिध्यते सम्यग्दीप्यते। कीदृशोग्निः कविर्मेधावी गृहपतिर्यजमानगृहस्य पालकः युवा नित्यतरुणः हव्यवाट् हविषो वोढा जुह्वा
स्यः जुहूरूपेण मुखेन युक्तः॥ कविमग्निं। हे स्तोतः संघ अध्वरे क्रतौ अग्निमुपस्तुहि उपेत्य स्तुतिं कुरु। कीदृशं कविं मेधाविनं सत्यध

३३

र्मणां सत्यवदनरूपेण धर्मेणोपेतं देवं द्योतमानं अमीवचातनं अमीवानां शत्रूणां रोगाणां वा घातकं ॥ यस्त्वामग्ने ॥ हे अग्ने देवा
यो हविष्मान् यजमानः देवं वीतये देवानां हविर्भक्षणहेतुयागार्थं अग्निमाविवासति । अग्निः समीपे विशेषेण गच्छन् परिचर्यां करोति
हे पावक तस्मै मृडय तं + देवेह तं त्वां स पर्येति परिचरति तस्य यजमानस्य प्राविता भव स्म अवत्र्ययं रक्षको भव ॥ यो अग्निं ॥ हविष्मान् कवि
युक्तो यः यजमानः + तं यजमानं रक्षय ॥ स नः पावक ॥ हे दीदिवः दीप्यमान पावक शोधकाग्ने स त्वं नोस्मदर्थं इह देवयजने देशे देवाना
वह । ततो नोस्मदीयं यज्ञं तत्र संहविश्च उप देवसमीपे प्रापयेति शेषः ॥ स नस्तवानः ॥ हे अग्ने नवीयसा नवतरेण पूर्वैरसंपादितेन
गायत्रेण गायत्रीछंदस्केनानेन सूक्तेन स्तवानः स्तूयमानस्त्वं नः अस्मदर्थं रयिं धनं वीरवतीं शूरपुत्रभृत्ययुक्तां इषमन्नं च आभर सं
पादय ॥ अग्ने शुक्रेण शोचिषा ॥ हे अग्ने शुक्रेण शोचिषा त्वदीयशुभ्रदीप्त्या विश्वाभिर्देवहूतिभिः । त्वत्कृतसर्वदेवताआह्वानसाधन
स्तोत्रैर्युक्तस्त्वं नः अस्मदीयं इमं स्तोत्रं स्तोत्रविशेषं जुषस्व सेवस्व ॥ फलनिक्रः ॥ हे अग्ने फलनिक्रोनामकस्त्वं नः अस्मदीयाय ह
विष्मते यजमानाय तदनुग्रहार्थं देवानावह ॥ हे पावक शोधक होतः होमनिष्पादकाग्ने यक्षि च यज च ॥ मधुमंतं ॥ हे कवे मेधाविन् अग्ने
तनूपादेतन्नामकस्त्वं अद्यास्मिन्दिने नोस्मदीयं मधुमंतं रसवंतं यज्ञं वीतये भक्षणार्थं देवेषु कृणुहि कुरु प्रापयेत्यर्थः ॥ नराशंसमि
ह ॥ इह देवयजने देशे अस्मिन्प्रवर्तमाने यज्ञे नराशंसमेतन्नामकं अग्निं उप ह्वये आह्वयामि ॥ कीदृशं प्रियं देवानां प्रीतिहेतुं म
धुजिह्वं मधुरभाषिजिह्वोपेतं । माधुर्यरसास्वादकजिह्वोपेतं वा । हविष्कृतं । हविषो निष्पादकं ॥ अग्ने सुखतमे ॥ इड्यशब्दाभिधेय हे
अग्ने ईलितोस्माभिः स्तुतः सन् सुखतमे । अतिशयेन सुखवहे लोके अस्मिंश्चिद्रथे देवानुत्स्थापयिताकर्मभूतानावह ॥ इड्यशब्दाभिधेयत्वे
मंत्रस्तवयितुं ईडित इति विशेषणं ॥ मनुर्हितः मनुना मंत्रेण मनुष्येण वा यजमानादिरूपेण हितेत्र स्थापितस्त्वं होता देवानामाह्वाता

११

सि ॥ स्तृणीत बर्हिः ॥ हे मनीषिणो बुद्धिमंतः ऋत्विजः बर्हिर्दर्भं स्तृणीत नवेदरूपरि आगच्छादयत अत्रापि बर्हिर्नामको ग्निः सूच्यते कीदृ

शं बर्हिः आस्तरणीयं आनुषक् अनुक्रमेण सक्तं परस्परसंबंधं घृतपृष्ठं घृतपूर्णानां स्रुचां बर्हिष्यासादितत्वात् घृतं पृष्ठे उप
रिभागे यस्य बर्हिषः तादृशं तत् पृष्ठं यत्र यस्मिन् बर्हिषि अमृतस्य अमृतसमानस्य घृतस्य च दर्शनं भवति । यद्वा मरणरक्षितस्य देवस्य
बर्हिर्नामकस्य अग्नेर्दर्शनं भवति । तद्बर्हिः स्तृणीतेति पूर्वत्रान्वयः ॥ विश्रयंतामृतावृधः ॥ द्वारो यज्ञगृहस्य द्वाराणि विश्रयंतां कपाटो
द्घाटनेन विश्रयंतां कीदृश्यः ऋतावृधः ऋतस्य सत्यस्य यज्ञस्य वा वर्धयित्र्यः देवीर्द्योतमानाः असश्चतः द्वाराभावेन विद्यंते संश्चंतो
गच्छंतो येषु प्रवेशादिषु असश्चतः असश्चंत्यः उद्घाटनेन प्रवेष्टृपुरुषसंगरहिताः ॥ यद्वा । असश्चतः प्रवेष्टृपुरुषरहितान्यज
गृहांस्तत्पुरुषः प्रवेशाय द्वाराभिमानिन्य एतत्संज्ञका अग्निविशेषमूर्तयो विश्रयंतां विशेषेण सेवतां द्वारसेवया तत्र पुरुष
प्रवेशो न वा किं प्रयोजनमिति तदुच्यते । अद्यास्मिन्दिने नूनमवश्यं यष्टवे यष्टुं चक्रशादिनां तरेष्ववि एष्ट्यं ॥ नक्तोषासा ॥ नक्त
शब्द उषः शब्दश्च लोके कालविशेषवाचिनो इह तु तत्काभिमानिमूर्तिद्वये प्रयुज्यते । नक्तोषोनामिके वह्निमूर्ती अस्मिन्प्रवर्त
माने यज्ञकर्मणि उपह्वये आह्वयामि किमर्थं नोस्मदीयमिदं बर्हिर्दर्भं आसदे आसत्तुं प्राप्तुं कीदृश्यौ सुपेशसा शो
भनरूपयुक्तेन नक्तं च उषाश्च नक्तोषासा अथ माद्विवचनस्य । तासु जिह्वा । तच्छब्दोत्र सर्वनाम वाचस्पतिसिद्धार्थवाचितो याज्ञिका
नां प्रसिद्धो द्वावग्नी उपह्वये आह्वयामि नोस्मदीयमिमं यज्ञं मिमिक्षतां सिंचतां यजतां मनुतिच्छं तां कीदृशौ मंद्रजिह्वा शोभनजिह्व
कोपेतौ प्रियवचनौ शोभनज्वालौ चेत्यर्थः ॥ होतारा होमनिष्पादकौ दैव्यौ देवसंबंधिनौ अत एव मावग्नी दैव्यहोतृनामकौ कवी मेधा
विनौ ॥ इळा सरस्वती ॥ अत्र महीशब्दो महत्त्वगुणयुक्तां भारतीमाचष्टे न्येष्वाप्रीसूक्तेषु सदशेषु इळा भारती स्याम्नातत्वादिळादि
शब्दाभिधेयाः वह्निमूर्तयस्तिस्रो देवीर्दीप्यमानाः बर्हिर्विघ्या माष्तीर्णं सीदंतु प्राप्नुवंतु । कीदृश्यः मयोभुवः सुखोत्पादकाः अस्त्रि
धः शोषेण क्षयेण वा रहिताः ॥ इह त्वष्टारमग्रियं । त्वष्टारं त्वष्टृनामकमग्निं इह कर्मण्युपह्वये कीदृशं अग्रियं श्रेष्ठं विश्वरूपं बहु

12

विधरूपोपेतं सोऽस्माकं केवलोऽसाधारणोऽस्तु। इतरयजमानेभ्योऽप्यधिकमनुग्रहं करोत्वित्यर्थः। प्रदातुर्यजमानस्य चेतनं परलोक
विषयं विज्ञानं स्वप्रसादादस्तु॥ स्वाहा यज्ञं॥ स्वाहाशब्दो हविःप्रदानवाची सन्नेतन्नामकमग्निविशेषं लक्षयति तदग्निसंपादितं
यज्ञं इन्द्राय इन्द्रतुष्ट्यर्थं यज्वनो यजमानस्य गृहे हे ऋत्विजः कुरुत तत्र देवानुपह्वये शृणोतन॥ ऐभिरग्ने॥ हे अग्ने एभिरस्मिन्यज्ञे
संभावितैः विश्वेभिः देवेभिः सर्वैर्देवैः सह सोमपीतये सोमपानोपेताय यागार्थं दुवो अस्मदीयां परिचर्यां गिरो अस्मदीयाः स्तुती
श्च प्रति आयाहि आगच्छ आगत्य यक्षि यज च। एभिः पुरुष्टानर्दितानां देवानां इदं आप्रापराम इति॥ आ त्वा कण्वा अहूषत॥ हे वि
प्रमेधाविन्नग्ने कण्वा मेधाविनो ऋत्विजः यक्षनिष्पादकं त्वा आहूषत आह्वयंति कथयंति ततो हे अग्ने देवेभिर्देवैः सह आगच्छ॥
इन्द्रवायू बृहस्पतिं॥ इन्द्रादिदेवान्मारुतं मरुतां संबंधिनं गणं च हे अग्ने यक्षीति पदद्वयमनुवर्तते इन्द्रश्च वायुश्च इन्द्रवायू॥
प्र वो भ्रियंत॥ हे इन्द्रादि देवाः वः युष्मदर्थं इंदवः सोमाः प्रभ्रियंते प्रकर्षेण संपाद्यंते। कीदृशाः मत्सराः तृप्तिकराः मत्सरः सो
मो मंदतेस्तृप्तिकर्मणः इति यास्कः। मादयिष्णवः हर्षहेतवः द्रप्साः बिंदुरूपाः मध्वः मधुराः चमूषदः चमूषु चमसादिपात्रेषु अ
वस्थिताः। प्रत्यवहिताः इत्यव्यवहितप्रयोगः॥ ईळते त्वा॥ हे अग्ने त्वां ईळते ऋत्विजः स्तुवंतीति कीदृशाः अवस्यवः अवनं रक्षणमिच्छं
न्देवानि च्छं तः कण्वा मेधाविनः वृक्तबर्हिषः आस्तरणार्थं छिन्नदर्भाः हविष्मंतः हविर्युक्ताः अरंकृतः अलंकर्तारः घृतप १२
ष्ठाः॥ हे अग्ने सत्वां ये अश्वाः रथे तव वहंतीति कीदृशाः घृतपृष्ठाः पुष्टांगत्वेन दीप्तपृष्ठाः मनोयुजः मनः संकल्पमात्रेण रथयुज्य
मानाः वह्नयो वोढारः ते अश्वैः सोमपानहेतुयागार्थं देवानावहेति शेषः॥ तान्यजत्रान्॥ हे अग्ने तानि इन्द्रादिन्देवान्यजत्रान्यज
नीयान् ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकान्पत्नीवतः पत्नीयुक्तान्कृधि। हे सुजिह्व शोभनजिह्वोपेत मध्वो मधुरस्य सोमस्य पा

गं तां देवान्पायय। ये यजत्राः ये देवाः यजत्राः यष्टव्याः तथा ये देवा ईड्याः स्तुत्याः ते सर्वेऽपि वषट्कृतिं वषट्कारकाले वषट्कार
युक्ते यागे वा। हे अग्ने त्वदीयया जिह्वया मधोर्मधुरस्य सोमस्य भागं पिबंतु॥ आकीं सूर्यस्य। विप्रो मेधावी होता मनिष्पादकोऽग्निः
उषर्बुधः उषःकाले यागगमनाय प्रबुध्यमानान्विश्वान्देवान्सूर्यस्य संबंधिनो रोचनात्स्वर्गलोकादिह कर्मणि आकीं वृक्षंति आ
वहतु॥ विश्वेभिः सोम्यं॥ हे अग्ने विश्वेभिः सर्वैः पूषभगादिभिः देवैरिंद्रेण वायुना मित्रस्य संबंधि मधु मधुरं भागं पिब। त्वं होता मनु
र्हितः॥ हे अग्ने मनुर्हितः मनुषा होत्रादिरूपेण मनुष्येण हितः संपादितः होता होमनिष्पादकोऽयं स्त्वं यज्ञेषु सीदसि तिष्ठसि। स
त्वं नोऽस्मदीयं इमं अध्वरं यज्ञं यज निष्पादय॥ युक्ष्वा ह्यरुषीः॥ हे देव अग्ने रोहितः रोहिच्छब्दाः स्त्वदीयवडवाः रथे युक्ष्व योजय हि शब्दः
पादपूरणार्थः। कीदृशीः अरुषीः गतिमतीः अरुषीर्हरितः हरितो रथाः संहितान्पुरुषान्नेतुं समर्था ताभिर्वडवाभिः इहास्मिन्कर्मणि देवा
नावह॥ इंद्र सोमं॥ हे इंद्र ऋतुना सोमं सह पिब इंदवः पीयमानाः सोमाः त्वा आविशंतु। कीदृशाः मत्सरासः तृप्तिकराः तदोकसः तन्नि
वासाः सर्वदा तदुदरस्थाः इत्यर्थः॥ मरुतः पिबत॥ हे मरुतः ऋतुना सह पोत्रात्पोतृनामकस्य ऋत्विजः पोत्रात्सोमं पिबत ततो
ऽस्मदीयं यज्ञं पुनीतन शोधयत। हे सुदानवः शोभनदातारो मरुतः हि यस्मात्यूयं स्थ पूयमानाकं शोधयितुं प्रसिद्ध तस्माच्छोधयतेत्य
र्थः॥ अभि यज्ञं॥ ग्ना शब्दः स्त्रीवाची। तथा यास्कः। मेनाग्ना इति स्त्रीणामिति। अस्य सतीति ग्नावान्नेष्टृशब्दोऽत्र। त्वष्टारं देवमावह। कस्मिं
श्चिद्देवसत्रे नेष्टृत्वेन त्वष्टुर्दृष्टत्वात्। हे ग्नावः पत्नीयुक्त नेष्टः नोऽस्मदीयं यज्ञमभिगृणीहि अभितो देवानां स्तुहि। ऋतुना सह त्वं सोम
पिब हि यस्मात्त्वं रत्नधा असि रत्नानां दाता असि दाता भवसि तस्मात्सोमं पातुमर्हसीत्यर्थः॥ अग्ने देवान्॥ हे अग्ने देवानिहास्मिन्कर्मणि
आवह ततो योनिषु स्थानेषु त्रिषु सवनेषु सादय देवानुपवेशय। ततस्तान्परिभूष अलंकुरु। अलंकुरु। ऋतुना सह त्वं सोमं पिब।
अग्ने देवानित्ययं पादो गतार्थः॥ ब्राह्मणादिंद्र॥ हे इंद्र ब्राह्मणात् ब्राह्मणाच्छंसीसंबंधात् राधसो धनभूतात्पात्रात्सोमं पिब किं कृत्वा
ऋतूननु देवाननु देवाननुसत्य अतनवोऽपि पिबंत्वित्यर्थः। हि यस्मात्तवेदं तव सख्यमस्तं नऋतूनामविच्छिन्नं तस्मादृतुभिः सह पानं

युक्तं। युवं दक्षं। हे धृतव्रता स्वीकृतकर्माणौ मित्रावरुणा हे मित्रनामक वरुणनामानौ देवौ युवां ऋतुना सह अस्मदीयं यज्ञमा
नाथे आ शुभः। कीदृशं यज्ञं दक्षं प्रवृद्धं दूळभं दुर्दभं शत्रुभिर्दग्धुं विनाशयितुमशक्यमित्यर्थः॥ द्रविणोदाः॥ अध्वरे अग्निष्टोमे प्रकृति
रूपेषु उक्थादिषु च देवमग्निमीळते ऋत्विजः स्तुवंति। यद्वा। धनप्रदोग्निः सोपि नक्षीतिरोषः। तमेव मंत्रं यास्क एवं निर्वक्ति। द्रविणो
दाः कस्माद्धनं द्रविणमुच्यते भवति। द्रविणोदाद्दातुनः। द्रविणोदा देवो नोस्मभ्यं वसूनि धनानि ददातु। यानि धनानि शृण्विरे हवि
रूपयुक्तत्वेन श्रूयंते तानि सर्वाणि धनानि देवेषु निमित्तभूतेषु वनामहे संभजामः धनैर्देवान्पूजितानि स्वीकुर्म इत्यर्थः॥ द्रविणोदाः
पिपीषति। द्रविणोदः देवाः ऋतुभिः सह नेष्ट्रसंबंधिपात्रात् पिपीषति सोमं पातुमिच्छति ततो हे ऋत्विजः इत होमस्थाने गच्छत
गत्वा च जुहोत होमं कुरुत कृत्वा प्रतिष्ठत च होमस्थानान्यानां नर प्रतिस्थानमपि कुरुत। यत्वा तुरीयं। हे द्रविणोदः यस्मात्कारणा
त् ऋतुभिः सह त्वां यजामहे। अध इत्ययं निपातस्तच्छब्दार्थः। तस्मात्कारणात् नोस्मभ्यं ददिर्धनस्य दाता भवेस्त्वं अवश्यं भव। तुरीयं च
तुर्णां पूरणः चतुरः॥ अश्विना पिबतं मधु। हे अश्विनौ मधु माधुर्योपेतं सोमं पिबतं कीदृशौ दीद्यग्नी द्योतमानाहवनीयाद्यग्नियुक्तौ।
शुचिव्रता शुद्धकर्माणौ ऋतुना सह ऋतुदेवतया सह यज्ञवाहसा यज्ञस्य निर्वाहकौ॥ गार्हपत्येन सत्य। हे सत्य फलप्रदाग्निदेव गार्ह
पत्येन गृहपतिसंबंधिनाग्निरूपेण युक्तः सन् ऋतुना ऋतुदेवेन सह यज्ञनीः यज्ञस्य निर्वाहकोसि तस्मात्त्वं देवयते देवविषयकाम
नायुक्ताय यजमानाय देवान्यज॥ आ त्वा वहंतु। हे इंद्र वृषणं कामानां वर्षितारं त्वां सोमपीतये सोमपानार्थं हरयस्त्वदीया अश्वाः
आवहंतु अस्मिन्कर्मण्यानयंतु। तथा सूरचक्षसः सूर्यसमानप्रकाशयुक्ताः ऋत्विजः त्वां मंत्रैः प्रकाशयंतिति विशेषः॥ इमा धानाः॥
हरी इंद्रस्येति निघंटुकार आह। तादृशो अश्वौ हरी इमा यागार्थं वेद्यामासादितत्वेन पुरोवर्त्तिनीर्धानाः भ्रष्टयवतंडुलानुद्दिश्य सु
खतमे रथे इंद्रमवस्थाप्यास्मिन्कर्मणि उपवक्षितः वेदिसमीपं वहतां। कीदृशीर्धानाः घृतस्नुवः अलंकरणोपस्तरणाभिघारणेन घृ
तस्राविणीः॥ इंद्रं प्रातर्हवामहे॥ प्रातःकर्मारंभे प्रातःसवने इंद्रं हवामहे आह्वयामः तथैवाध्वरे सोमयागे प्रयति प्रगच्छति प्रारभ्य

१३

र्यमाने सति माध्यंदिने सवने तमिंद्रं हवामहे तथा यज्ञसमाप्तौ सवने तृतीयसवने सोमस्य पीतये सोमपानार्थं हवामहे॥ उप नः सुत
मा गहि। हे इंद्र केशिभिः केशयुक्तैर्हरिभिः अश्वैस्त्वं नोस्मदीयं सुतमभिषुतं सोमं प्रति उपसमीपे आ गहि आगच्छ सुते अभिषुते सोमे
निमित्तभूते यस्मात्कारणात्त्वां हवामहे त्वामाह्वयामः। तस्मादागच्छेति पूर्वत्रान्वयः॥ सेमं नः स्तोमं। हे इंद्र स त्वं नोस्मदीयमिमं स्तोमं
स्तुतिं प्रत्यागहि। आगच्छ आगमने हेतुरुच्यते उप एव यजनस्य समीपे सुतमभिषुतं सोममुक्तमिदमिदानीमनुषीयमाणं अग्निष्टोमसव
नादिरूपं कर्म वर्त्तते तस्मात्कारणेन गौरमृग इव तृषितः सन् इमं सोमं पिब॥ इमे सोमासः। इंदवः क्लेदनयुक्ताः इमे वेद्यामवस्थिताः सोमा
स्तत्र पात्रे स्थिताः सोमाः बर्हिषि यज्ञे अधि आधिक्येन सुताः अभिषुताः हे इंद्र सहसे बलार्थं तान् सोमान्पिब॥ अयं ते स्तोमः। हे इं
द्र अयमस्माभिः क्रियमाणः स्तोमः स्तोत्रविशेषः अग्रियः श्रेष्ठः सन् ते तव हृदिस्पृक् मनस्यंगीकृतः शंतमः सुखतमः अस्तु। अथ स्तु
तेरनंतरं सुतमभिषुतं सोमं पिब॥ विश्वमित्। वृत्रहा शत्रुघातकः इंद्रः सोमपीतये सोमपानाय मदाय तत्पानजन्महर्षाय च विश्व
मित्सर्वमपि सुतमभिषुतसोमयुक्तं सवनं प्रातःसवनादिरूपं कर्म गच्छति॥ सेमं नः कामं। हे शतक्रतो स त्वं नोस्मदीयमिमं कामं काम्यमा
नं फलं गोभिरश्वैश्च सह आपृण सर्वतः पूरय। अथ वयमपि स्वाध्यः सुष्ठु सर्वतो ध्यानयुक्ताः संतस्त्वां स्तवाम॥ इंद्रावरुणयोरहं॥ अहं पा
तासम्राजोः समीचीनराज्योपेतयोः सम्यक्दीप्यमानयोर्वा इंद्रावरुणयोर्देवयोः संबंधि अवो रक्षणं आवृणे सर्वतः प्रार्थये। ता नो
देवौ ईदृशोस्मदीये वरणे निमित्तभूते सति मृळातः अस्मान्सुखयतः॥ गंतारा हि। हे इंद्रावरुणौ अवसे अवितुमनुष्ठातारं रक्षितुमाव
तां मद्विधस्य विप्रस्य ब्राह्मणस्य ऋत्विजो हवमानमाह्वानं गंतारौ स्थो हि प्राप्तशीलौ भवथः खलु कीदृशौ चर्षणीनां मनुष्याणां धर्त्तारौ
योगक्षेमसंपादनेन धारयितारौ॥ अनुकामं तर्पयेथां॥ इंद्रावरुणा हे इंद्रावरुणौ अनुकामं अस्मदीयाभिलाषमनु रायो धनस्य प्र
दानेन आ तर्पयेथां सर्वतोस्मांस्तृप्तान्कुरुतं यद्वा रायः धनं कामयथा महे तदा प्रयच्छतामित्यर्थः॥ युवाकु हि। हे यस्मात्कारणात् शची
नामस्मदीयकरणानां संबंधि सोमरूपहविः युवाकु भवति वपैकंपनात्मकैरुदकैः पयः सक्त्वादिद्रव्यांतरैश्च मिश्रितं तथा सुमतीनां शोभन

बुद्धियुक्तानामलिज्ञां स्तोत्ररूपं वचनं पिपृवाकु। नानाविधैस्तुल्यगुणैर्मिश्रितं तस्मात्कारणात् हे इंद्रावरुणौ तथाविधं हविस्त्वी
कुरुतां युवयोः प्रसादाद्वयं वाजदाव्नां अन्नप्रदातृणां पुरुषाणां मध्ये मुख्या भूयाम भवेम। इंद्रः सहस्रदाव्नां। अयमिंद्रः सहस्रदाव्नां स
हस्रसंख्याकधनप्रदानां मध्ये क्रतुः धनदानस्य कर्ता भवति प्रभूतं ददातीत्यर्थः। तथा वरुणः शंस्यानां स्तुत्यानां मध्ये उक्थ्यः स्तुत्यो
भवति। अतिशयेन स्तुत्य इत्यर्थः। तयोरिदवसा। तयोरित् पूर्वोक्तयोरिंद्रावरुणयोरेव अवसा रक्षणेन वयं मनुष्यातारः सनेम संभ
जेम धनमिति शेषः। निधीमहि च प्राप्ते धने यावदपेक्षितं तावद्भुक्त्वा ततो वशिष्टं धनं कंचित् निधिरूपेण स्थापयामश्च उत अपि च
प्ररेचनमुक्तां निहितात् प्रकर्षेण अधिकं धनं स्यात् संपद्यतां॥ इंद्रावरुण वां। इंद्रावरुणा हे इंद्रावरुणौ वां युवां उभौ अहं हुवे आ
ह्वयामि। किमर्थं चित्राय मणिमुक्तादिरूपेण विविधाय राधसे धनाय ततः आहूतौ युवां अस्मान् अनुष्ठातॄन् सुजिग्युषः शत्रुविषयेसु
जयप्रयुक्तान् कुरुतं इंद्रावरुण नू नु। इंद्रावरुणा हे इंद्रावरुणौ धीषु अस्मदीयबुद्धिषु वां युवां सिषासंतीषु संभक्तुं सम्यक्
सेवितुं इच्छंतीषु तदानीं मासमना द्रस्यभ्यं शर्म सर्वं नू नु अतिशयेन क्षिप्रं प्रयच्छतं दत्तं। प्र वामश्नोतु। इंद्रावरुणा हे इंद्रावरुणौ
या अस्मत्कर्तृकां शोभनस्तुतिं प्रतिकुवे युवामनुभावाह्वयामि। किंच सपस्तुतिं युवयोरुभयोः साहित्येन क्रियमाणायां स्तवनक्रिया
याः पुक्तोयां सुष्टुतिं प्रतिलक्ष्य ऋधार्थे युवां वर्धितौ ताद्दशी सुष्टुतिः शोभनस्तुतिहेतुभूत ककुस महावान् अश्नोतु युवां व्याप्नोतु। सो
मानां स्वरणं। हे ब्रह्मणस्पते एतं नामकं देवं सोमानमभिषवस्य कर्तारं मां अनुष्ठातारं स्वरणं देवेषु प्रकाशनवंतं कृणुहि कुरु। अ
त्र दृष्टांतः। कक्षीवंतं एतं नामकं ऋषिं इव यथा। अत्र अभ्याहर्त्तव्यः। कक्षीवान्यथा वेदप्रसिद्धः तद्वदित्यर्थः। यः कक्षीवान् ऋषिः औशिजः उ
शिजः पुत्रः तमिवेति पूर्वत्र योजना। यास्कः। यो रेवान्। यो ब्रह्मणस्पतिः रेवान् धनवान् अभ्वामिवहा रोगाणां हंता वसुवित् धनस्य ल
म्भा पुष्टिवर्धनः पुष्टेर्वर्धयिता यश्च तुरः त्वरोपेतः शीघ्रफलदः स ब्रह्मणस्पतिर्नोस्माकं सिषक्तु सेवितां। परिगृह्यानुगृह्णात्विति स

र्थः। सिषक्तु सचतु इति सेवमानस्येति यास्कः। मा नः शंसः। अररुषः मर्त्यस्य उपद्रवं कर्तुं मत्सरिणीं प्राप्तस्य शत्रुरूपस्य मनुष्यस्य
धूर्तिः हिंसकः शंसः शंसनं अधिक्षेप इत्यर्थः। ताद्दशो वा विशेषणो अस्मान् मा प्रणक् मा संप्रणक्तु। शत्रूणां प्रयुक्तः अधिक्षेप
कदाचिदस्मान् न प्राप्नोत्वित्यर्थः। तदर्थं हे ब्रह्मणस्पते नोस्मान् पालय। स घा वीरो न। इंद्रो देवो यं मर्त्यं पियक्षमाणं हिनोति प्राप्नोति
वर्धयति तथा ब्रह्मणस्पतिर्देवः हिनोति तथा सोमः हिनोति तथा स घ एव यजमानः वीरो वीर्ययुक्तः सन् न रिष्यति न विनश्य
ति॥ त्वं तं ब्रह्मणस्पते। हे ब्रह्मणस्पते त्वं तं मर्त्यं अनुष्ठातारं मनुष्यं अंहसः पापात् साहि इति शेषः। तथा सोमः पातु इंद्रश्च पातु दक्षि
णाख्यो देवता च पातु। सदसस्पतिं। मेधां लब्धुं सदसस्पतिं एतं नामकं देवं अयासिषं प्राप्तवानस्मि कीद्दशं अद्भुतमाश्चर्यकरं इंद्र
स्य प्रियं सोमपाने सहचारित्वात् काम्यं कामनीयं सनिं धनस्य दातारं। यस्मादृते न। यज्ञो यम् अनुष्ठातव्यो विपश्चितस्य न विदुषो
पि यजमानस्य यस्मात् सदसस्पतिदेवादृते न सिध्यति सोयं सदसस्पतिर्देवो धीनां मनोनुष्ठानविषयाणां अस्मद्बुद्धीनाम
नुष्ठेयकर्मणां वा योगं संबंधं इन्वति व्याप्नोति। यजमानमनुगृह्य तदीयं यज्ञं निष्पादयतीत्यर्थः। आदृध्नोति। आत् अनंतरमेव
हविष्कृतिं हविः संपादनयुक्तं यजमानं ऋध्नोति। सदसस्पतिर्देवो वर्धयति इह विर्दानानंतरमेव फलं प्रयच्छतीत्यर्थः। तथाविधफल
सिद्धये अध्वरं यजमानेनानुष्ठीयमानं यज्ञं प्राचं प्रकर्षेण गच्छंतं अविघ्नेन परिसमाप्तियुक्तं कृणोति करोति। होत्रा ह्वयमानादे
वतानुद्दास्त्रिं यजमानं प्रख्यापयितुं देवेषु गच्छति। यद्वा। होत्रा अस्मदीयस्तुतिरूपा वाक् देवान्परितोषयितुं देवेषु गच्छति। न
राशंसं। नराशंसं एतं नामकं देवं विशेषं। यद्वा। अवयवव्युत्पत्त्या सदसस्पतिदेवतापरो यं शब्दः। व्युत्पत्तिं च यास्को दर्शयति।
नराशंसो यज्ञ इति कात्थक्यो नरा अस्मिन्नासीनाः। अत्राग्निवत् सदसस्पतिरपि नरैः शस्यमानत्वान्नराशंसः तं एतमेवाभिप्रा
यं हृदि निधाय ब्राह्मणमेवमाम्नायते प्रजा वै नरो वाक् शंस इति। अतो मनुष्यैः शस्यमानो यः सदसस्पतिर्यो वा नराशंसना

मकोदेवः तमध्वरं शास्त्रदृष्ट्याद्दृष्ट्वा न त्मिकीदृशं कधृष्टमं अत्याधिक्येन धार्ष्ट्ययुक्तं सप्रथस्तमं अतिशयेन प्रख्यातं सप्रथमवसंप्रा
प्तेनरुक्ता तत्र दृष्टांतः। दिवो न द्युलोका इव आदित्यचंद्रादिभिरधिष्ठिताः द्युलोका विशेषातेजस्विनः तद्वद् नराशंसस्तेजस्वीत्यर्थः
९५ प्रतित्यं। त्यं छंदसत्वेना मात्वं तच्छब्दपर्यायः हे अग्ने यो यज्ञः चारुः अंगवैकल्यरहितः देवुविप्रो वैः सह आगहि। आगच्छ। सेयम
न्यास्केन एवं व्याख्यातं प्रति त्यं चारुमध्वरं सोमपीथाय। नहिदेवोन। हे अग्ने महो महतः तव संबंधिक्रतुं कर्म विप्रो षउल्लंघ्य। परोन हि
उत्कृष्टो न भवतिखलु तथा मर्त्यो मनुष्यश्च परो न भवति ये मनुष्याः त्वदीयक्रतुमनुतिष्ठंति ये च देवास्त्वदीयं क्रतो इज्यंते तेन एवोत्कृष्टा इ
त्यर्थः। मरुद्भिरित्यादि पूर्ववत्। ये महो रजसः हे अग्ने ये मरुतो महो रजसो महतं उदकस्य वर्षणप्रकारं विदुः। तैर्मरुद्भिरित्यन्वयः कीदृ
शाः मरुतः विश्वे सर्वे सप्तविधगणोपेताः सप्तगणा वै मरुत इति श्रुतेः देवासो द्योतमानाः। अद्रुहो द्रोहरहिताः वर्षणेन सर्वभूतोपकारि
त्वात्। तथा चोपरि शाखा म्नातं उदीरयथेति मंत्रे। रजो रजतेर्ज्योती रज उच्यते उदकं रज उच्यते इति यास्कः। य उग्राः। ये मरुतः उग्रास्तीव्राः
संतः अर्कमुदकं आनृचुः अनाधृष्टासः अतिरस्कृताः सर्वेभ्योपि प्रबला इत्यर्थः। भूकृश्चाब्दस्योदकवाचित्वं वाजसनेयिन आमनंति। आपो
वा अर्क इति ९९ ये शुभ्राः मरुतः शुभ्रत्वादिगुणोपेतास्तैर्मरुद्भिरित्यन्वयः शुभ्राः शोभनाः घोरवर्पसः उग्ररूपधराः सुक्षत्रासः शोभन
धनोपेताः रिशादसः हिंसकानां भक्षकाः ये नाकस्य। ये मरुतः नाकस्य अविद्यमानदुःखरहितस्य सूर्यस्योपरि दिवि द्युलोके रोचने दीप्यमा
नपदे देवासः स्वयमपि दीप्यमानाः आसते। तैर्मरुद्भिरित्यन्वयः। य ईंखयंति। ये मरुतः पर्वतान् मेघान् ईंखयंति चालयंति तथा अर्ण
वमुदकयुक्तं समुद्रं तिरस्कुर्वंति इति शेषः। निश्चलस्य जलस्य तरंगाद्युत्पत्ये चालनं तिरस्कारस्तैर्मरुद्भिरित्यन्वयः। आ ये तन्वंति॥
ये मरुतो रश्मिभिः सूर्यकिरणैः सह आतन्वंति। आभिमुख्येन आकाशमिति शेषः। किंच ओजसा स्वकीयबलेन समुद्रं तिरस्कुर्वंति तैर्मरुद्भि
रित्यन्वयः। अभित्वा पूर्व। हे अग्ने पूर्वपीतये पूर्वकालप्रवृत्ताय पानाय त्वा त्वां प्रति सोम्यं सोमसंबंधिनं मधु रसं। अभिसृजामि सर्वतः संपादयामि॥ ९५

अतस्त्वं मरुद्भिः सह आगच्छेति॥२७॥ इति सायणीयाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके प्रथ
मोध्यायः॥ हरिः ॐ॥ अयं देवाय। ऋभवो हि मनुष्याः संतः तपसा देवत्वं प्राप्तास्ते चात्र सूक्ते देवतास्तत्र जायमानवाचिनाज
न्मशब्देनैकवचनांतेन अत्र निर्दिश्यते। जन्मने जायमानाय ऋभुसंघरूपाय देवाय तत्प्रीत्यर्थं अयं स्तोमः स्तोत्रविशेषः विप्रेभिः
मेधाविभिः ऋत्विग्भिः। आसया स्वकीयेनास्येन अकारि निष्पादितः कीदृशः स्तोमः रत्नधातमः। अतिशयेन रमणीयमणिमुक्ता
दिधनप्रदः स्तोत्रेण तुष्टा ऋभवो धनं प्रयच्छंतीत्यर्थः। य इंद्राय। ये ऋभवः इंद्राय इंद्रप्रीत्यर्थं वचोयुजा ताउनादिकं कुर्वतो वाङ्मात्रेण
रथे युज्यमानौ सुशिक्षितौ हरी एतन्नामकावश्वौ मनसा ततक्षुः संपादितवंतः। ऋभूणां सत्यसंकल्पत्वात्। तत्संकल्पमात्रेण इंद्रस्या
श्वौ संपन्नावित्यर्थः। ते ऋभवः शमीभिः ग्रहचमसादिनिष्पादनरूपैः कर्मभिः यज्ञमस्मदीयं आशत व्याप्तवंतः। तक्षन्नासत्याभ्यां। ना
सत्याभ्यामश्विदेवप्रीत्यर्थं रथं तक्षन् ऋभवो देवाः कंचिद्रथं अनक्षनतक्षणेन संपादितवंतः कीदृशं परिज्मानं परितो गंतारं सुखं उ पर्युप
वेशनेन सुखकरं किंच धेनुं कामदुघां तक्षन् तत्क्षणात् नामथेकार्थत्वात्। तक्षतिरत्र संपादनवाची कीदृशीं धेनुं सबर्दुघां सर्वस्य क्षीरस्य दोग्ध्री॥
युवाना पितरा। ऋभवः एतन्नामका देवाः पितरौ स्वकीयौ मातापितरौ पूर्वं वृद्धावपि पुनर्युवानौ तरुणौ अकृत अकृतवंतः। कीदृशाः सत्यमं
त्राः अवितथमंत्रसामर्थ्योपेताः पुरश्चरणाद्यनुष्ठानेन सिद्धमंत्रास्ताभ्यामुद्दिश्य ताः प्रयुज्यते तत्फलं तथैव संपद्यते तेन तस्मा
ज्जीर्णयोः पुनर्युवत्वं संपादितुं समर्था इत्यर्थः। ऋजूयवः ऋजुत्वमात्मन इच्छंतः छलरहिता इत्यर्थः। एत एवैषामनुष्ठिता मंत्राः सिद्धाः
विष्टी वेविष्टयो व्याप्तियुक्ताः सर्वेषु कार्येषु एतदीयमंत्रसामर्थ्यस्य अप्रतिघातोत्र व्याप्तिरुच्यते। ऋभुशब्दं यास्कः एवं निर्वक्ति उरुभा भां
ति ऋतेन भांतीति वृत्तेन भवंतीति वेति। सं वो मदासः। हे ऋभवः युष्माकं संबंधिनो मदासो मदहेतवः सोमाः इंद्रेण चादित्यैभिरादित्यैश्च
समग्मत। संगताः ऋभूणां इंद्रादित्यैः सह सोमपानं तृतीयसवने ति। अत एवाबाहननिगदे आश्वलायनेनैवं पठितः इंद्रमादित

वृतमस्मभ्यं तं विभुमंतं वाजवंतं बृहस्पतिवंतं विश्ववेद्या वृतमावृहेति। कीदृशं। नेंद्रं णामरुत्वतामरुद्भिर्युक्तेन अतएवमंत्रांतर
मेवमाम्नायते। मरुद्भिरिंद्र सख्यं ते अस्त्विति। कीदृशं। गौरादिर्वेभिः राजंमेसं तं सोमधारेषोजुमभिः दीप्यमानैः॥ ९॥ उतत्यं
चमसं॥ उत अपि च त्वष्टुः एतन्नामकस्य देवस्य संबंधी तक्षणव्यापारः नवं तं नूतनं संचमसं तं सोमधारणक्षमं कार्ष्णपात्रविशेषं
निष्कृतं निःशेषेण संपादितमकरोदिति शेषः॥ तक्षणव्यापारकुशलस्य त्वष्टुः शिष्याः ऋभवः तेन निर्मितं तमेकं चमसं पुनरपि च
तुरः अकर्त चतुर्धा विभक्तांश्च समानकृतवंतः एकस्य चतुर्विधत्वकरणरूपोयमर्थो मंत्रांतरेऽपि विस्पष्टः॥ एकं चमसं चतुरः कृणोतनेति॥
तेनो रत्नानि धत्तन॥ पूर्वोक्ता ऋभवः येप्रतिपादिताः ऋभवः ते यूयं सुशस्तिभिः शोभनैरस्मदीयशंसनैः युक्ताः संतो नोऽस्माकं संबंधिने सुन्व
ते सोमाभिषवं कुर्वते यजमानाय रमणीयानि स्वर्णमणिमुक्तादीनि एकमेकं क्रमेण त्रयोपेतानि त्रयएव तस्य स्वर्णादीनां मध्ये प्रतिद्रव्यं
यावदपेक्षितं तावदिति विवक्षया एकमेकमित्युक्तं। कीदृशानि रत्नानि त्रिरात्रि वारमासुतानि उत्तमानि मध्यमानि अधमानि च त्रेधा रत्नानां त्रिरावृ
त्तिः किंच साप्तानि सप्तसंख्यानि ष्पन्नद्रव्यगृहपाणिकर्माणि च धनेन संपादयत॥ यद्वा॥ कीदृशानि साप्तानि त्रिरात्रिवारमासुतानि अस्यायं
यदर्शपूर्णमासादीनां सप्तानां हविर्यज्ञानामेकोवर्गः॥ औपासनहोमो वैश्वदेवमित्यादीनां सप्तानां पाकयज्ञादीनां वर्गो द्वितीयः॥ अग्निष्टो
मोत्यग्निष्टोमइत्यादीनां सप्तानां सोमसंस्थानां वर्गस्तृतीयः॥ अधारयत वन्हयः। वन्हयश्च मसादिसाधनत्रितयोदनेनयज्ञस्य वोढारः ऋ
भवः अधारयंत पूर्वं मनुष्यत्वेन मरणयोग्या अप्यमृतत्वं लोभेन प्राणान्धारितवंतः॥ तथा च मंत्रांतरमाम्नायते॥ मर्तासः संतो अमृतत्वमा
नशुरिति चेते सुकृत्यया सुकर्मणा साधनद्रव्यसंपादनरूपेण शोभनेन द्रव्यापारे यद्देवेषु मध्ये स्थित्वा यज्ञियेषु यज्ञार्हं भागं हविर्लक्षणं अन
जंत सेवितवंतः॥ अथ मर्थः॥ सौधन्वना यज्ञियं भागमानशेति विस्पष्टः॥ ब्राह्मणेऽपि ऋभवो वै देवेषु तपसा सोमपीथमभ्यजयन्निद
त्याद्युपाख्याने विस्पष्टं॥ इहेंद्राग्नी॥ अस्मिन्कर्मणि इंद्राग्नी देवौ उपह्वये आह्वयामि॥ तयोरित्थं इंद्राग्न्योरेव स्तोमस्तोत्रमुद्देश्य सिकां

९६

मयामहे। सोमपातमा॥ अतिशयेन सोमपातृत्वं क्षमौ तौ द्वौ देवौ सोमं पिबतामिति शेषः॥ तायज्ञेषु हे नरो मनुष्याः ऋत्विजस्ता पूर्वोक्तौ
ताविंद्राग्नी यज्ञेषु अनुष्ठीयमानेषु कर्मसु प्रशंसत शस्त्रैः स्तोत्राणि उत नानाविधैरलंकारैः शोभितौ कुरुत तथा पूर्वोक्ताविंद्राग्नी
गायत्रेषु गायत्रीछंदस्केषु मंत्रेषु सामरूपेण गायत॥ ता मित्रस्य॥ मित्रस्य स्नेहविषयस्य ममानुष्ठातुः प्रशस्तये। ताः पूर्वो
क्तौ देवौ संपच्छे ताविति शेषः यद्वा मित्रस्य मम संबंधिनो ताविंद्राग्नी प्रशस्तये प्रशंसितुमिच्छामइति शेषः॥ सोमपा सोमपा
नेक्षमौ ताः पूर्वोक्ताविंद्राग्नी सोमपीतये सोमपानार्थं हवामहे आह्वयामः॥ उग्रा संता॥ सुतेऽभिषवोपेते इदमनुष्ठीयमाने स
वने प्रातःसवनादिरूपे कर्मणि उपसामीप्येन प्राप्तुं उग्रा संतौ वैरिवधादिषु क्रूरौ संतौ देवौ हवामहे आह्वयामः इंद्राग्नी देवौ इह क
र्मणि आगच्छतां॥ ता महांता॥ तौ पूर्वोक्ताविंद्राग्नी रक्षोराक्षसजातिं उतं ऋजुं कुरुतमौर्यं परित्यज्येत्युतामित्यर्थः। कीदृशौ
महांता महांतौ गुणैरधिकौ सदस्पती सभापालकौ तयोः प्रसादात्त्रिणो राक्षसाः अप्रजाः अनुसत्राः संतु॥ तेन सत्ये
नाइंद्राग्नी सत्येन अवश्यफलदानादवितथेन तेनास्माभिरनुष्ठितेन कर्मणा जाग्रतुने प्रकर्षेण फलभोगस्थापकेपदे स्वर्ग
लोकादिस्थाने अधिजाते अधिवेधन सावधानौ भवतं तो त्वमन्यं शर्म यच्छतं सुखं वाददतो॥ प्रातर्युजा॥ अत्र होताध्वर्यु
मुद्दिश्य ब्रूते हे अध्वर्यो प्रातर्युजा प्रातःसवने रथेन संयुक्तौ विश्विनौ देवौ विबोधय विशेषेण प्रबुद्धौ कुरु अश्विनौ प्रबुद्धौ तावश्विनौ
देवौ अस्याभिषवसंस्कारयुक्तस्य सोमस्य पीतये पानाय इह कर्मण्यागच्छतां॥ या सुरथा॥ या उ ओ अश्विना देवा या वृत्तावश्विनौ
देवौ सुरथा शोभनेन रथेन युक्तौ रथीतमा रथिनां मध्ये अतिशयेन रथिनौ दिविस्पृशा द्युलोकनिवासिनौ ता हवामहे ता इमावश्विना वा

रूपा महे। यावां कशा॥ अश्विना हे अश्विनौ देवौ वां युवयोः संबंधिनी कशा आवतां उनी विघ्नते तया सह आगत्य यज्ञ मस्म
दीयं निमिक्षतं सोमरसेन सेक्तुमिच्छतं कशाया अश्वद्दढतां उयिता सह समागत्य भवद्विषयां सोमः सा कुलिं निष्पादयितुं उधु
कौ भवतं इत्यर्थः। कीदृशा कशा या मधुमती। अर्णः क्षोदमित्यादिषु एकशत संख्याके षुउदकनामसु मधुपुरीषमिति पठितं। त
स्माउदकवती स्फत्तं भवति अश्वस्य शीघ्रगतस्य स्वेदोदकं स्रवतीति तेन यं कशा किं नेत्यर्थः। सूनृतावती प्रियसत्यवाक्युक्ता तीव्रे
पाकशातां उनेन पोष्य निर्निष्यघते तांउनवेल्लायां अश्वारूढेन चय आक्रोशः क्रियते तं उभयं शीघ्रगमनहेतुत्वेन यजमान
स्य प्रियं॥ नहि वामस्ति। अश्विना हे अश्विनौ देवौ युवां सोमिनः सोमवतो यजमानस्य गृहं प्रति रथेन गच्छथः समागोर्वां सुव
योः दूरके दूरदेशे न नह्यस्ति न वर्त्तते खलु। यद्वा यत्र गृहे गच्छथः तच्च गृहं दूरे न भवति। हिरण्यपाणिमूतये। ऊतये रक्षणार्थं सवि
तारं देवं उपह्वये आह्वयामि। स च सविता देवः एतन्मंत्रं प्रतिपाद्य देवतो भूत्वा पदं यजमानेन प्राप्यं स्थानं चेत्स्म + ताज्ञापयि
ता भवति कीदृशं सवितारं हिरण्यपाणिं यजमानाय प्रदातुं हस्ते हिरण्यं पाणि यजमानाय प्रदातुं हस्ते स्फवर्णधारिणं। अपांनपा
तमवसे। अत्र होतासाम गर्भः त्विजमन्यं वाशस्त्रिणं श्रं तं अवसे अस्माकं क्षितिं सवितारं उपस्तुहि। तस्य सवितुः संबंधी
नि व्रतानि कर्माणि सोमयागादिरूपाणि उत्तमस्कामुपामहे कीदृशं सवितारं अपांनपातं पाळके संतापेन शोषकमि
त्यर्थः। विभक्तारं वसोः निवासहेतोः चित्रस्य स्फवर्णरजतादिरूपेण बहुविधस्य राधसो धनस्य विभक्तारं अस्य यज
मानस्य एतावद्धनं दातुमुचितमिति। विभागकारिणं नृचक्षसं मनुष्याणां प्रकाशिणं सवितारं हवामहे। सखाय आनिषी
दत। सखिभूताः हे ऋत्विजः आनिषीदत सर्वत्रोपविशत नोऽस्माकं भयं सविता नु क्षिप्रं स्तोम्यः स्तुतियोग्य राधांसि
धनानि दाता प्रदाता शुंधुक्त। एषसविता शुंभति शोभते। अग्नेपत्नीः हे अग्ने उशतीः कामयमानाः देवानां पत्नीः

१०

इंद्राण्या या हः इह देवयजने देश आवह तथा त्वष्टारं देवं सोमपीतये सोमपानार्थं उपसमीपे आवह॥ आग्नाअग्ने॥ हे अग्ने अवसे अस्मानवि
तुं ग्नाः देवपत्नीः इह आवह। तथा हे यविष्ठ युवतम अग्ने होत्रां होमनिष्पादकां अग्निपत्नीं भारतीं भरतनामकस्य आदित्यस्य पत्नीं वरूत्रीं वरणी
यां धिषणां वाग्देवीं च आवह। यास्केनोक्तत्वादादित्यस्य पत्नी भारती उच्यते। अभिनो देवीः। देवीर्देव्यो देवपत्न्यो अवसा रक्षणेन महो महता शर्म
णा च सुखेन च सह नोऽस्मान् अभिसचंतां आभिमुख्येन सेवंतां। कीदृश्यो देव्यः नृपत्नीः मनुष्याणां पालयित्र्यः। अच्छिन्नपत्राः अच्छिन्नपक्षाः नहि पक्षिरू
पाणां देवपत्नीनां पक्षाः केनचिच्छिद्यंते। द्वादशी मृचमाह। इहेंद्राणी। इहास्मिन्कर्मणि स्वस्तये अस्माकमविनाशनाय सोमपीतये सोमपानाय च इंद्रावरु
णाग्नीनां पत्नीराह्वयामि। इंद्राणीवरुणानी। तामेतां सूक्ते त्रयोदशीमृचमाह। मही द्यौरिति। मही महती द्यौर्द्युलोके देवता पृथिवी भूमिदेवता च नोऽस्मदीय
मिमं यज्ञं मिमिक्षतां स्वकीयसारभूतेन रसेन निमिक्षतां सेक्तुमिच्छतां तथा भरीमभिः भरणैः पोषणैः नास्मान्पिपृतां उभे देव्यौ पूरयतां। चतुर्दशीमृचमा
ह। तयोरिति। गंधर्वस्य ध्रुवं पदं अंतरिक्षं। तथा च तापनीयशाखायां समाम्नायते। पक्षगंधर्वाप्सरोगणसेवितमंतरिक्षमिति। तेनांतरिक्षेणोपलक्षि
तेऽआकाशे वर्त्तमानयोस्तयोरिरूपया वा पृथिव्योरेव संबंधिपयो जलं घृतवद्घृतसदृशं विप्राः मेधाविनः प्राणिनः धीतिभिः कर्मभिः रिहंति। [illegible]
घृतवद्घृतं सारेणोपेतं रिहंति॥ तामेतां सूक्ते पंचदशीमृचमाह। स्योना पृथिवी। हे पृथिवि स्योनता दिगुणायुक्ता भव। स्योनशब्दोऽत्र विस्तीर्णवाची। तथा
च वाजसनेयब्राह्मणे स्योनशब्दोपेतं कंचिन्मंत्रमुदाहृत्य व्याख्यानं। इंद्रस्योनमा विशा। स्योनं स्योनमिति विस्तीर्णं विंनीमिनी स्वेदैतेति। यद्वा स्योन
शब्दः सुखवाची। तथा च यास्केनाप्युदाहरिष्यते। अनृक्षरा कंटकरहिता निवेशनी निवेशस्थानभूता। सप्रथो विस्तारयुक्तं शर्म शरणं नोऽस्मभ्यं य
च्छ। हे पृथिवि देहि। तामेतामृचमुदाहृत्य यास्को व्याचष्टे। सुखा नः पृथिवि भव। नृक्षरा निवेशनी। ऋक्षरः कंटकः ऋच्छतेः यच्छनः शर्म सप्रथः शरणं सर्वतः पृ
थ्वीति। तामेतां सूक्ते षोडशीमृचमाह। अतो देवाः। विष्णुः परमेश्वरः सप्तधामभिः सप्तभिर्गायत्र्यादिभिः छंदोभिः साधनभूतैः यतः पृथिव्याः यस्मा
द्भूप्रदेशाद्विचक्रमे। द्विविधं पादक्रमणं कृतवान् अतोऽस्मात् पृथिवीदेशान्नोऽस्मान्देवाः अवंतु विष्णोः पृथिव्यादिलोकेषु सप्त छंदोभिः साधनैः यद्वैतिरीयाश्च
मिनं विष्णुमुखा वै देवाः छंदोभिरिमांल्लोकाननपजय्यमभ्यजयन्निति विष्णोस्त्रिविक्रमावतारे पादत्रयक्रमणस्य पृथिव्युपादानं। पृथिवीप्रदेशात् रक्षणं
नाम भूलोके वर्त्तमानानां पापनिवारणं। तामेतां सूक्ते सप्तदशीमृचमाह। इदं विष्णुरिति। विष्णुस्त्रिविक्रमावतारधारी इदं प्रतीयमानं सर्वं जगदुद्दिश्य

(18)

विचक्रमे विशेषेण क्रमणं कृतवान् तदा त्रेधा त्रिभिः प्रकारैः पदं निदधे स्वकीयं पादं प्रक्षिप्तवान्। अस्य विष्णोः पांसुरे धूलियुक्ते पादस्थाने समूढं इदं
सर्वं जगत् सम्यगंतर्भूतं। सेयमृग् यास्केनैवं व्याख्याता। विष्णुर्विशतेर्वा व्यश्नोतेर्वा यदिदं किंच तद्विक्रमते विष्णुः त्रिधा निधत्ते पदं त्रेधाभावाय पृथिव्याम
तरिक्षे दिवीति शाकपूणिः। समारोहणे विष्णुपदे गयशिरसीत्यौर्णवाभः। समूढमस्य पांसुरेप्यायनेंतरिक्षे पदं न दृश्यतेपि वोपमार्थे स्यात् पांसुर इ
व पदं न दृश्यत इति पांसवः पादैः सूयंत इति वा पन्नाः शेरत इति वा पांसनीया भवंतीति वेति। तामेतामष्टादशीमृचमाह। त्रीणि पदा वि। अदाभ्यः के
नापि हिंसितुमशक्यः गोपाः सर्वस्य जगतो रक्षको विष्णुः पृथिव्यादिस्थानेषु अतः एतेषु त्रीणि पदानि विचक्रमे किं कुर्वन् धर्माण्यग्निहोत्रादीनि धारय
न्पोषयन्। एकोनविंशतीमृचमाह। विष्णोः कर्माणि पश्यत। हे ऋत्विगादयः विष्णोः कर्माणि पालनादीनि पश्यत यतो येः कर्मभिः व्रतान्यग्निहोत्रादी
नि पस्पशे स्पर्शं करोति यजमानः स्पृष्ट्वा विष्णोरनुग्रहादनुतिष्ठतीत्यर्थः। तादृशो विष्णुः इंद्रस्य योज्यो योग्यो नुकूलः सखा भवति विष्णोरिंद्रानुकूल्यं तत्र श्रा
वैहतपुत्रा इत्यनुवाके। अथ वै तर्हि विष्णुरित्यादिना प्रपंचेन तैत्तिरीया आमनंति। विंशतिमृचमाह। तद्विष्णोः परमं पदं। सूरयः विद्वांसः ऋत्विजादयः
विष्णोः संबंधि परमं उत्कृष्टं तच्छास्त्रप्रसिद्धं पदं स्वर्गस्थानं शास्त्रदृष्ट्या सर्वदा पश्यंति। तत्र दृष्टांतः। दिवीव आकाशे यथा आततं सर्वतः प्रसृतं चक्षु
र्निरोधाभावेन विशदं पश्यंति तद्वत्। एकविंशतीमृचमाह। तद्विप्रासः। पूर्वोक्तं विष्णोर्यत्परमं पदं अस्ति तत्पदं विप्रासो मेधाविनः समिंधते सम्यक्
दीपयंति। कीदृशाः विपन्यवः विशेषेण स्तोतारः जागृवांसः शब्दार्थयोः प्रमादराहित्येन जागरूकाः। तामेतां सूक्ते प्रथमामृचामाह। तीव्राः सोमा
सः हे वायो इमे सोमासः ऐंद्रवायवग्रहादिरूपाः सोमाः सुताः अभिषुताः तेच तीव्राः अभिषुता आतून पयितुम समर्थाः आशीर्वंतः आशिरयुक्ताः
अतस्त्वमागहि अस्मत्कर्मण्यागच्छ। प्रस्थितानुत्तरवेदिं प्रत्यानीतांतान्सोमान्पिब। उभादेवा दिविस्पृशा। द्युलोकवर्तिनो उभा देवौ द्वौ देवौ इंद्र
वायू हवामहे आह्वयामः। किमर्थं अस्य सोमस्य पीतये असत्कृत्या त्वानं। उभादेवा। तृतीयामृचमाह। इंद्रवायू मनोजुवा। विप्राः मेधाविनः ऋ
त्विग्यजमानाः ऊतये रक्षणार्थं इंद्रवायू हवंते आह्वयंति। कीदृशौ मनोजुवौ मनइव वेगयुक्तौ। सहस्राक्षा सहस्रनयनेन युक्तो यद्यपींद्र एव सह
स्राक्षः तथापि छत्रिन्यायेन वायुरपि तथोच्यते। धियस्पती कर्मणो बुद्धेर्वा पालकौ। मनोजुवा। जयतिर्गतिकर्मा मनोवेगौ। तामेतां सूक्ते चतुर्थ
मृचमाह। मित्रं वयं। वयमनुष्ठातारः सोमपानार्थं मित्रं वरुणं चोभावाह्वयामहे। कीदृशावुभौ जज्ञाना कर्मप्रदेशे प्रादुर्भावितौ पूतदक्षसा शुद्ध

१८

बलौ। पंचमीमृचमाह। ऋतेन याऋतावृधा। यौ मित्रावरुणौ ऋतेन सत्यवचनेन यजमानानुग्रहकारिणौ ऋतावृधौ ऋतमवश्यं
भावितया सत्यं कर्मफलं तस्य वर्धकौ ऋतस्य सत्यस्य प्रशस्तस्य ज्योतिषः प्रकाशस्य पालकौ। ऋत्यंतरे मित्रावरुणा योरदितिपुत्रत्वेन श्रु
तत्वात्। द्वादशादित्ये ष्वंतर्भूतत्वेन ज्योतिः पालकत्वं युक्तं श्रुत्यंतरेच। अष्टौ पुत्रासो अदितेरित्युपक्रम्य मित्रश्च वरुणश्चेत्यादिकं आम्नात। तौ
मित्रावरुणा तथा विधौ मित्रावरुणौ हुवे आह्वयामि। अष्टमीमृचमाह। वरुणः प्राविता अयं वरुणः अस्माकं प्राविता भुवत् प्रकर्षेण रक्षको भ
वतु। मित्रश्च विश्वाभिः ऊतिभिः सर्वाभिः रक्षाभिः प्राविता भुवत् तावुभावपि नोस्मान् सुराधसः प्रभूतधनयुक्तान्करतां कुरुतां। सप्तमीमृचमा
ह। मरुत्वंतं हवामहे। मरुत्वंतं मरुद्भिर्युक्तमिंद्रं सोमपीतये सोमपानाय आहवामहे आह्वयामहे। सचेंद्रो गणेन मरुत्समूहेन सजूः सहितस्तृपतु। तृप्तो भ
वतु। इंद्रज्येष्ठा मरुद्गणाः। हे देवासः इंद्रमरुद्रूपाः विश्वे सर्वे यूयं मम हवं आह्वानं श्रृणुत। कीदृशाः इंद्रज्येष्ठाः इंद्रः ज्येष्ठो मुख्यो येषु ते तथावि
धाः मरुद्गणाः मरुत्समूहरूपाः पूषरातयः पूषा सूर्यो देवो रातिर्दाता येषामिंद्रमरुतां ते पूषरातयः। नवमीमृचमाह। हत वृत्रं। हे सुदानवः शोभन
दानयुक्ताः मरुद्गणाः सहसा बलवतेनायुजा। योग्योनेंद्रेण सह वृत्रं शत्रुं हत नाशयत ढुःशंसः ढुःशो नशंसनेन कीर्तनेन युक्तो वृत्रो नोस्मान्प्रतिनेशा
न समर्थो भूत्। दशमीमृचमाह। विश्वान्देवान्। मरुतः मरुत्संज्ञका विश्वान्सर्वान्देवान् सोमपीतये हवामहे सोमपानार्थमाह्वयामः। तेच मरुतः उग्राः
शत्रुभिरसह्यबलाः पृश्निमातरः पृश्निर्नानावर्णा भूम्याः ये पुत्राः द्विशब्दः प्रसिद्ध्यर्थः। साच प्रसिद्धिः पृश्नेः पुत्रा इति मंत्रांतरादवगंतव्या। पृश्निमातरः
पृश्निर्माता येषां ते। पृश्निशब्दो घृणि पृश्निरिति। एकादशीमृचमाह। जयतामिव। मरुतां देवानां तन्यतुः शब्दः शुभ्रयाधार्ष्ण्ययुक्ताः संनेति गच्छति
केषामिव जयतां विजययुक्तानां शूराणामिव भयनामिव। हे नरो नेतारो मरुतः यूयं यत् यदा शुभं शोभनं देवयजनो याथन प्राप्नुथ तदा सद्यः शब्दो
गच्छतीति पूर्वत्रान्वयः। द्वादशीमृचमाह। हस्कारादिद्युतः। हस्काराद्दीनिकराद्विद्युतो विशेषेण दीप्यमानादंतरिक्षात्सुरिजाताः उसनाः सर्वतः मरुतः
नोस्मानवंतु रक्षंतु। तथाविधा मरुतः नः अस्मान्मृळयंतु सुखयंतु। त्रयोदशीमृचमाह। आपूषं चित्रि। हे पूषं चित्रबर्हिषं चित्रैः दर्भैर्युक्तं धरुणं या
गस्य धारकं सोमं दिव आद्युलोकादाहर नेति शेषः। पूषा विशेष्यते आघृणे आगतदीप्तियुक्तं। तत्र दृष्टांतः। हे अंगगमनशील यथा लोके नष्ट
पशुं महारण्याद्वायन्वीक्ष्य कश्चिदाहरतीति तद्वत्। चतुर्दशीमृचमाह। पूषा राजानं। आघृणिः पूषा राजानं सोममविंदल्लभत। कीदृशं अपगूळ्ह

19

स्तंतरूढं॥ तत्र हेतुः गुहाहितं गुहासदृशे दुर्गमे द्युलोके स्थितं॥ तथा चित्रबर्हिषं। पंचदशीमृचमाह॥ उतो स मह्यं॥ उतो अपि च स पूषा मह्यं
यजमानाय इंदुभिर्यागहेतुभिः सोमैर्युक्तान्षड्वसंतादीनृतूननुसेषिधत्। अनुक्रमेण पुनःपुनर्नयेन्नयतु इति शेषः॥ तत्र दृष्टांतः॥
गोभिर्बलीवर्दैः यवं न चर्कृषत् नशब्द उपमार्थः। यथा यथानुद्दिश्य भूमिं प्रतिसंवत्सरं पुनः कृषति तद्वत्॥ अत्रास्मिन्सूक्ते प्रथमसूक्ते षोडशी
मृचमाह॥ अंबयो यंति॥ अध्वरीयतामाल न इच्छतामस्माकं अंबयो मातृस्थानीया आपः तथा च कौषीतकीब्राह्मणे समाम्नायते॥ अंबयो यंत्यध्व
भिरित्यापो वा अंबयो रिति॥ आपः अध्वभिर्देवयजमानमार्गैः यंति गच्छंति॥ कीदृश्य आपः॥ जामयो हितकारिण्यो बंधुभूताः॥ तथा मधुना पयः पु
र्यरसेन युक्तं पयः पृंचतीः गवादिषु योजयंत्यः॥ अमूर्या उप सूर्ये॥ या अमूरापः सूर्ये उप समीपे नावस्थिताः॥ अपः सूर्येण सह हिता इति श्रु
संतराद्या॥ अथ वा सूर्यो याभिरद्भिः सह वर्त्तते पूर्वत्रापां प्राधान्यं। उत्तत्र सूर्यस्येति विशेषः॥ ताः तादृश्यः आपो नोस्मदीयं अध्वरं यागं हिन्वंतु
प्रीणयंतु॥ अपो देवीः॥ नोस्मदीत्रे सूर्यस्येति विशेषः॥ या गावो यत्र पास्वरूपिबंति। पानं कुर्वंति ता अपो देवीरूपह्वये आह्वयामि सिंधुभ्यः स्यंद
नीशीलाभ्यो ह्यद्भ्यो देवताभ्यः हविः कर्तं अस्माभिः कर्त्तव्यं॥ अप्स्वंतः॥ अप्सु जलेषु अंतर्मध्ये अमृतं पीयूषं वर्त्तते तस्य अविकारत्वादमृतं वा आ
पश्च जिष्णुत्यंतरा च तथैवाप्सु भेषजं औषधं वर्त्तते हृद्रोगनिवर्त्तकत्वान्नस्यापकार्यत्वात् उत अपि च लाद्त्रिमपां देवतानां प्रशस्तये प्रशंसा
यं हे देवाः ऋत्विगादयो ब्राह्मणाः एते वै देवताः प्रत्यक्षं यद्ब्राह्मणा इति श्रुतेः तरातृवा जिनो वेगवंतः भवंत॥ शीघ्रं स्तुतिं कुरुतेत्यर्थः॥ अप्सु मे॥
अप्सु जलेषु अंतर्मध्ये विश्वानि भेषजा सर्वाण्यौषधानि संति इति मे मह्यं मंत्रदर्शने मुनये सोमो देवो ऽब्रवीत् तथा विश्वशंभुवं सर्वस्य
जगतः सुखकरमेतन्नामकं चाग्निं चाप्सु प्रवेशात् मानं तिलनाशकत्वं गुल्ममूलादीनां औषधीनां वृष्टिजन्यत्वेन जलं वर्त्तितं प्रसिद्धं विश्वभे
षजीः विश्वानि भेषजानि यासु तथाविधाश्च अपो प्यब्रवीत् आपः पृणीत॥ हे आपः ममतन्वे शरीरार्थं वरूथं रोगनिवारकं भेषजमौष
धं पृणीत पूरयत किं च ज्योक् चिरं सूर्यं दृशे द्रष्टुं नीरोगा वयं शक्नुयामेति शेषः॥ इदमापः॥ मयि यजमाने यत्किंचित् दुरितं अज्ञानानिष्पन्नं
वा अथ वा हे यजमान अभिदुद्रोह सर्वतो बुद्धिपूर्वकं द्रोहं कृतवानस्मि अथ वा शेपे शापं जनं सत्यवानस्मीति यद्वदत्स्मि उत अपि च अनृ

१९

तमुक्तवानिति यद्वदस्ति तदिदं सर्वं मयः उपराः धुजात् प्रवहत अतो पनीय प्रवाहेणान्यतो नयत॥ आपो अद्य॥ अद्यास्मिन्दिने अवभृथार्थं
मापो अन्वचारिषं जलान्यनुप्रविष्टोस्मि प्रविश्य च रसेन सारेण समगस्महि संगतास्मः हे अग्ने पयस्वान् जलेवर्त्तमानत्वेन पयोयु
क्तस्त्वं आगहि अस्मिन्कर्मणि आगच्छ तं मा तादृशं त्वं मां वर्चसा तेजसा संसृज संयोजय॥ सं माग्ने॥ हे अग्ने वर्चः प्रजाः युभिर्मां
संयोजय देवाः सोमपातारः अस्य मे यजमानस्य विद्युः अनुष्ठानं जानीयुः किंच इंद्रश्च ऋषिगणैः सह मे मानुष्ठानं जानीयात्॥
कस्य नूनं॥ कस्येत्य नयर्चा शुनःशेपे यूपे बद्धः कादिकं देवमुपधावामीति विचिस्तति। तथा चाम्नायते हंताहं देवता उपधावामीति स
पंशुनःशेपनामका अमृतानां देवानां मध्ये कतमस्य कि जातियस्य कस्य देवस्य चारु शोभनं नाम नामहे उच्चारयाम कः देवो मां मुमूर्षुं
पुनरपि मह्यै महत्यै अदितये पृथिव्यै दात् ददात् दत्ते नदानेन अहं मे पितरं च मातरं च दृशेयं पश्येयं॥ अग्नेर्वयं॥ इत्थं प्रश्नमयं च वि
चिकित्सां कृत्वा प्रजापतेः सकाशात् देवमग्निं निश्चित्य अनया तुष्टाव॥ तथा च श्रूयते॥ तं प्रजापतिरुवाच॥ पूर्ववद्योजना॥ नाद्ददातु दृशेयं प
श्यामीत्येव माध्योः परत्वेन पदद्वयं योज्यं॥ अभि त्वा देव॥ हे सदाव सर्वदा रक्षक हे सवितः देव वार्याणां वरणीयानां धनानामीशानं स्वामिनं
त्वां प्रतिभागं भजनीयं धनं अभिसर्वतः ईमहे याचामहे॥ यश्चिद्धि त इच्छा॥ हे सवितः यो भगः भजनीयो धनविशेषः ते तव हस्तयोर्द्वयोः धृतो
भूत् तं धनविशेषं ईमहे इति पूर्वत्रान्वयः। विशेषः पूजार्थः। हिरारुः प्रसिद्धो धनस्य पूज्य संतानेव पूज्यत्व प्रसिद्धिं विवादयति इद्धा शशमा
नः अनेन प्रकारेण शस्यमानः स्तूयमानः धनस्य स्तुतिं प्रकारं सर्वे जानंति॥ ननु स्वकीय धने वैरिभिः अपहृते सति वैरिगृहीतं धनं सर्वो लोको
निंदति द्वेष्टि च अतो धने स्तुतिर्न नियतेत्याशंक्याह॥ निद उराऽद्वेषः निंदाया द्वेषस्य कीयत्वेन व्यवस्थिते सति निंदा नीद्वेषरहितत्वात्पत्यकी
यत्वाभिप्रायेण स्तूयमानत्वमुक्तमित्यर्थः॥ भगभक्तस्य॥ हे सवितः त्वे च दीमाव यं शुनःशेपनामानः भगभक्तस्य धनेन संयुक्तस्य तव अ
वसा रक्षणे रक्षणेन उदश्नोम उत्कर्षेण व्याप्नुमः किंच तुरीयो धनस्य मूर्धनि उत्कर्षमारभे प्रारभ्य अधनिकत्वप्रसिद्ध्या व्याप्ता भूयामेत्यर्थः
नहि ते क्षत्रं॥ अथ सवित्रा प्रेरितः सन्नेतं वितीर्णा वाच ह हे वरुण पतयंतः गौरे विपुलं सत्तानं अमी दृश्यमानाः वयः श्येनादयः पक्षिणोपि ते क्ष

२०

नं त्वदीयं शरीरबलं न ह्यापुर्नैव प्राप्ताः । त्वत्सदृशं शरीरबलं पक्षिणामपि नास्तीत्यर्थः । तथा सहः त्वदीयं पराक्रमं तव सामर्थ्यमपि
न आपुः तथा मन्युं त्वदीयं कोपमपि न आपुः त्वत्क्रोधं सोढुं न शक्ता इत्यर्थः । अनिमिषं सर्वदा चरन्तीः प्रवाहरूपेण गच्छन्त्यः अपः त्वदीयं
बलं न आपुः । वातस्य वायोः गतिविशेषात् त्वदीयमभ्वं न प्रमिनन्ति न हिंसन्ति अतिक्रमं कर्तुं न शक्ताः । ते पि न आपुरिति पूर्वत्रान्वयः । अबुध्ने रा
जा । मूलरहिते अबुध्ने वरुणो राजा अबुध्ने मूलरहितेन्तरिक्षे तिष्ठन् वनस्य वननीयस्य तेजसः स्तूपं संघं उपरिदेशे ददति धारयति नीचीना स्थुः
ऊर्ध्वदेशे वर्त्तमानस्य वरुणस्य रश्मयस्स्युः पदस्याध्याहर्त्तव्यं ते अधोमुखास्तिष्ठन्ति एषां रश्मीनां बुध्नो मूलं उपरि तिष्ठतीति शेषः । तथा सति केतवः
प्रज्ञापकाः प्राणाः अस्मे अस्मासु अन्तर्निहिताः अर्पिताः सु मरणं न भवतीत्यर्थः । उरुं हि राजा । वरुणो राजा सूर्याय सूर्यस्य पंथां मार्गं उरुं विस्ती
र्णं चकार हि शब्दः प्रसिद्धौ उत्तरायण दक्षिणायन मार्गस्य विस्तारः प्रसिद्धः किमर्थमेवं कृतवानिति तदुच्यते । अन्वेतवा उ अनुक्रमेणोदया
स्तमयौ गंतुमेव तथा अपदे पादरहितेन्तरिक्षे पादा प्रतिधातवे पादौ प्रक्षेप्तुं अकः मार्गं कृतवान् पूर्वत्र रथस्य मार्गः । अत्र पादयोरिति विशे
षः । पदा अपदे भूपे मनपा बद्धे न गंतुं न शक्ये भूप्रदेशे पादौ प्रक्षेप्तुं उपायं बंधनं विमोचनं करोति स इत्यर्थः । उत अपि च हृदयाविधश्चित्
शत्रोरपि अपवक्ता अपवदिता निराकर्ता भवतु । शतं ते राजन् । हे राजन् वरुण ते तव शतं भिषजः बंधनिवारकाणि शतसंख्याकानि औष
धानि वैद्यावा सन्ति तेन वसुमतिः अस्मदनुग्रहबुद्धिः उर्वी विस्तीर्णा गंभीरा गांभीर्योपेता स्थिरास्तु निर्ऋतिं रक्षः अनिष्टकारिणीं निर्ऋतिं पाप
देवतां पराचैः पराङ्मुखां कृत्वा दूरे अस्मत्तो व्यवहिते देशे स्थापय । किं च कृतं चित् अस्माभिरनुष्ठितमपि एनः पापं अस्मत्तः प्रमु
ग्धि प्रकर्षेण मुक्तं नष्टं कुरु । अमी य ऋक्षाः । अमी ये रात्रौ अवस्थाभिर्दृश्यमानाः ऋक्षाः सप्त ऋषयः । तथा च वाजसनेयिन आमनन्ति ऋक्षा
इति ह स्म वै पुरा सप्त ऋषीनाचक्षते इति । यद्वा ऋक्षाः सर्वेपि नक्षत्रविशेषाः । ऋक्षास्तृभिरिति नक्षत्राणीति यास्केनोक्तत्वात् उच्चै
रुपरि द्युदेशे निहिताः स्थापिताः ये सन्ति ते ऋक्षा नक्तं रात्रौ ददृश्रे सर्वैर्दृश्यन्ते दिवा अहनि कुहचिद्ययुः क्वापि गच्छन्तु न दृश्यन्त
इत्यर्थः । वरुणस्य राज्ञो व्रतानि कर्माणि नक्षत्रदर्शनादिरूपाणि अदब्धानि केनाप्यहिंसितानि किंचिद्वरुणस्याज्ञयैव चन्द्रमा नक्तं

२०

रात्रौ विचाकशत् विशेषेण दीप्यमान एव गच्छति ॥ तत्त्वा यामि ॥ हे वरुण मुमूर्षुरहं त्वां प्रति तदायुर्यामि याचे सर्वैश्च य
ज्ञमानोऽपि हविर्भिस्तदायुराशास्ते प्रार्थयते । त्वं च हे कर्मणि अहेळमानः अनादरमकुर्वन् बोधि अस्मदपेक्षितं बुध्यस्व
हे उरुशंस बहुभिः स्तुत्य नोऽस्मदीयमायुः मा प्रमोषीः प्रमुषितं मा कुरु । तदिन्नक्तं । तदित्तदेव वरुणविषयं स्तोत्रं नक्तं
रात्रौ मह्यं शुनःशेपाय आहुः कर्तव्यत्वेनाभिज्ञाः कथयंति तथा दिवापि तदेवाहुः हृदो मदीयस्य मनसः निष्पन्नोयं केतः
प्रज्ञाविशेषोपि तदेव कर्तव्यत्वेन विचष्टे सर्वतो विशेषेण प्रकाशयति । गृभीतो गृहीतो यूपे बद्धः शुनःशेपः एतन्नामकोऽजीग
यं वरुणमाह्वत् आह्वत् वा स वरुणो राजा अस्मान् शुनःशेपान् मुमोक्तु बंधान्मुक्तान् करोतु । शुनःशेपो हि । गृभीतो बंध
नाय गृहीतः त्रिषु स्थानेषु द्रुपदेषु द्रोः काष्ठस्य यूपस्य पदेषु प्रदेशविशेषेषु बद्धः शुनःशेपः आदित्यमदितेः पुत्रं वरुणं
आह्वत् आह्वतवान् हि यस्मादेवं तस्मात् स वरुणो राजा एनं शुनःशेपं अवससृज्यात् अवसृष्टं बंधनाद्विमुक्तं करोतु विमोचनप्र
कार एव स्पष्टीक्रियते विद्वान् विमोकप्रकाराभिज्ञः अदब्धः केनाप्यहिंसितो वरुणः पाशान् बंधनरज्जुविशेषान् विमुमोक्तु
विशिष्य मुक्तान् करोतु । अव ते हेळो । हे वरुण तव हेळः क्रोधं नमस्कारैः अवेमहे अवनयामः । तथा यज्ञेभिः यज्ञैः सांग
नुष्ठानेन हविर्भिः अव ईमहे वरुणं परितोष्य क्रोधमपनयामः । हे असुर अनिष्टक्षेपणशील प्रचेतः प्रक
र्षेण युक्त राजन् दीप्यमान वरुण अस्मभ्यं अस्मदर्थं क्षयन् अस्मिन् कर्मणि निवसन् कृतानि अस्माभिरनुष्ठितानि एनांसि
पापानि शिश्रथः श्लथितानि शिथिलानि कुरु । उदुत्तमं वरुण ॥ हे वरुण उत्तमं ऊर्ध्वदेशे शिरसि बद्धं पाशं उच्छ्रथय अस्मी

२१

शिथिलीकुरु। अधमं निकृष्टं पादेवस्थितं पाशं अवश्रथय अवकृष्य शिथिलीकुरु। मध्यमं नाभिप्रदेशगतं पाशं विश्रथय वियुज्य शिथिलीकु
रु। अथानंतरं हे आदित्य अदितेः पुत्र वरुण वयं सुतः शौपाः तव व्रते त्वदीये कर्मणि अदितये खंडनराहित्याय अनागसो अपराधरहिताः स्या
म भवेम। यच्चिद्धि ते। हे वरुण यथा लोके विशः प्रजाः कदाचित्प्रमादं कुर्वंति तथा वयमपि ते तव संबंधि यच्चिद्धि यदेव किंचिद्व्रतं
कर्म दिविदिवि प्रतिदिनं प्रमिनीमसि प्रमादेन हिंसितवंतः। तदपि व्रतं प्रमादपरिहारेण सांगं कुर्विति शेषः। मा नो वधाय। हे वरुण जि
हीळानस्य अनादरं कृतवतः हत्नवे हंतुः पापहननशीलस्य तव संबंधिने त्वत्कृताय वधाय नोऽस्मान्मा रीरधः। संसिद्धानि
वि मृळीकाय ... स्मरूरवायते नवमनः रथीरथस्वामी सदितं सम्यक् खंडितं हर गमने न श्रांतं अश्वमिव यथा श्रांतमश्वं यथा
सम्प्रदानादिना प्रसादयति तद्वत्। परा हि मे। हे वरुण मे मम शुनःशेपस्य विमन्यवः क्रोधरहिताः बुद्धयः वस्यइष्टये वसीयसोऽ
तिशयेन वसुमतो जीवनस्य प्राप्तये परापतंति प्राङ्मुखाः पुनरावृत्तिरहिताः प्रसरंति। हि शब्दोऽस्मिन्नर्थे सर्वजनप्रसिद्धि
माह। परापतने दृष्टांतः वयो न पक्षिणो यथा वसतीः निवासस्थानानि उपसाप्य प्राप्नुवंति तद्वत्। कदा क्षत्रश्रियं। दृष्टे को
परं स्मरूपायुव वरुणं कदा कस्मिन्काले आकरामहे अस्मिन्कर्मणि आगतं करवाम। कीदृशं क्षत्रश्रियं बलसं विनेनरेतारं उ
रुचक्षसं बहूनां द्रष्टारं क्षत्रश्रियं क्षत्राणि सयंतीति क्षत्रश्रीः॥ तदित्समानमाशाते॥ धृतव्रताय अनुष्ठितकर्मणो दाशुषे ह
विर्दत्तवते यजमानाय वेनंतो कामयमानौ मित्रावरुणौ विति शेषः॥ तावुभौ समानं साधारणं तदित्तदस्मादीयं दत्तं तदेव हविः
आशाते अश्नुवाते न प्रयुच्छतः कदाचिदपि प्रमादं न कुरुतः॥ वेदा यो वीनां॥ अंतरिक्षे पततां आकाशमार्गेण गच्छतां वीनां
पक्षिणां वरुणः वेद। तथा समुद्रियः समुद्रे अवस्थितो वरुणः नावो जलेन गच्छंत्याः पदं वेद जानाति सोऽस्माकं बंधनान्मोचयतु
इति शेषः॥ वेद मासः॥ धृतव्रतः स्वीकृतकर्मविशेषः यथाकर्म हि मायनो वरुण प्रजावतः न दान दाक्षस्य मानजनायुको

२३

द्वादश मासान् चैत्रादिफाल्गुनांतान् वेद जानाति। य उपजायते योदश्रगोऽधिकमासः उपजायते संवत्सरसमीपे स्वयमेव उत्पद्यते तम
पि वेद। वाक्यशेषः पूर्ववत्॥ वेद वातस्य। उरोर्विस्तीर्णस्य ऋष्वस्य दर्शनीयस्य बृहतो गुणैरधिकस्य वातस्य वायोर्वर्तनिं मा
र्गं वेद वरुणो जानाति। ये देवा अध्यासते उपरि तिष्ठंति तानपि वेद जानाति। निषसाद। धृतव्रतः पूर्वोक्तः वरुणः पस्त्यासु दे
वीषु प्रजासु आनिषसाद आगत्य निषण्णवान्। किमर्थं प्रजानां साम्राज्याय स्वामित्वसिद्ध्यर्थं सुक्रतुः शोभनकर्मा॥ अतो विश्वान्यद्भुता॥ अ
तोऽस्माद्वरुणाद्विश्वान्यद्भुतानि सर्वाण्याश्चर्याणि चिकित्वान् प्रज्ञावान् अभिपश्यति सर्वतो लोकयति। या कृतानि या याश्चर्याणि पूर्वं
वरुणेन संपादितानि कृतानि च कर्तव्यानि याश्चर्याणि कृतानि अतः परं कर्तव्यानि तानि सर्वाण्यभिपश्यतीति पूर्वेणान्वयः॥ स नो
विश्वाहा। सुक्रतुः शोभनकर्मा स आदित्यो वरुणः विश्वाहा सर्वेष्वहःसु नोऽस्मान् सुपथा शोभनमार्गेण सहितान्करत् करोतु
किंच नोऽस्माकं मायूंषि प्र तारिषत्। प्रवर्धयतु॥ बिभ्रद्द्रापिं॥ हिरण्ययं सुवर्णमयं द्रापिं कवचं बिभ्रद्धारयन्वरुणो निर्णिजं
पुष्टं स्वशरीरं वस्त आच्छादयति। स्पशः हिरण्यस्पर्शिनो रश्मयः परिनिषेदिरे सर्वतो निषण्णाः। न यं दिप्सन्ति॥ दिप्सवः हिंसि
तुमिच्छंतः रिपवः यं ति जनानां प्राणिनां द्रुह्वाणो द्रोग्धारोऽपि यं वरुणं प्रति न दुःखयंति अभिमातयः पाप्मानः पाप्मा वा अभिमा
तिरिति श्रुत्यंतरात् देवं तं वरुणं न स्पृशंति॥ उत यो मानुषेषु॥ उत अपि च यो वरुणो मानुषेषु यशोऽन्नं आचक्रे सर्वतः कृतवा
न्स वरुणः कुर्वन्नपि आसर्वतः असामि संपूर्णं चक्रे न तु न्यूनं कृतवान्। विशेषतोऽस्माकमुदरेषु आ सर्वतश्चक्रे॥ परा मे यंति॥
उरुचक्षसं बहुभिर्द्रष्टव्यं वरुणं इच्छंती मे धीतयः शुनःशेपस्य बुद्धयः परायंति पराङ्मुखा निवृत्ता गच्छंति। तत्र दृष्टांतः॥ गा
वो न। यथा गावः गव्यूतिः अनु गोष्ठानि अनुलक्ष्य गच्छंति तद्वत्॥ सं नु वोचावहै। यतो यस्मात्कारणान्मे मम मधु जीवनार्थं मधुरं हविः
आभृतं अतः सखायौ कर्मणि संपादितं मनःकारणात् होतेव होमकर्तेव लमपि प्रियं हविः क्षदसे अश्नासि। पुनर्हविः स्वीकारा

इच्छंति। मत्स्वं जीवनं हंच नु अवश्यं लवो चाय हे संभूयप्रियपशात्तं किं करवामहै। दर्शं नु। विश्वदर्शतं सर्वैर्दर्शनीयम स्मदनुग्रहार्थम
त्रो विर्भूतवरुणं दर्शं नु अहं दृष्टवानू। खलु क्षमिक्षमा वा भूमौ रथवरुणसंबंधिनं अधिदर्शं अधिक्यं नदृष्टवानस्मि एता उच्यमानाः
मे गिरो मदीयास्तुतीः जुषत वरुणः सेवितवान्। इमं मे वरुण। हे वरुण मे मदीयमिमं हवमाह्वानं श्रुधि शृणु। किंच। अद्यास्मिन्दिने मृ
डय अस्मान्सुखय। अवस्युः रक्षणेच्छुः अहं त्वां वरुण आ चिके सर्वतः शब्दयामीत्यर्थः। त्वं विश्वस्य। हे मेधिर मेधाविन्व
रुण त्वं दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि एव पालकस्य विश्वस्य सर्वस्य जगतो मध्ये राजसि। दीप्यसे स तादृशस्त्वं याम
नि क्षेमप्रापणेऽस्मदीये प्रति श्रुधि प्रतिश्रवणमाज्ञापि नकुरु रक्षिष्यामीति प्रत्युत्तरं देहीत्यर्थः। उदुत्तमं। नोऽस्माकं उत्तमं शिरो
गतं पाशं उन्मुमुग्धि उत्कृष्य मोचय मध्यमं उदरगतं पाशं विचृत वियुज्य नाशय जीवसे जीवितुं अधमानि मदीयान्यादगतान्याशा
न वचृत अवकृष्य नाशय। वसिष्ठा हि। वरुणेन अग्निस्तुतौ प्रेरितः शुनःशेपः एतदादिसूक्तद्वयेन अग्निमस्तौत् तथा चाम्नायते
वरुण उवाचाग्निर्वै देवानां मुखं सुहृदयतमः। सोऽग्निं तुष्टावात उत्तराभिर्द्वाविंशत्येति। हे नियेध्य मेध्यस्य यज्ञस्य योग्य ऊर्जापते
अन्नानां पालकाग्ने वस्त्राणि आच्छादकानि तेजांसि वसिष्व आच्छादय प्रज्वलितस्तेजसा नवहि यस्मात्त्वमाच्छितः तस्मात्तता
दृशस्त्वं नोऽस्मदीयं इमं अध्वरं यजनिष्पादय। नि नो होता। सदा यविष्ठ सर्वदा युवतम हे अग्ने वरेण्यो वरणीयस्त्वं नोऽस्माकं होता
होमनिष्पादको भूत्वा दिवित्मता महता दीप्तिमता मन्मना वचसा स्तूयमानः संनिषीदेति शेषः। कीदृशस्त्वं मन्मभिः ज्ञापिकैः स्तो
त्रैर्नियुक्त इति शेषः। आ हि ष्मा सूनवे। हे अग्ने वरेण्यो वरणीयः पिता पितृस्थानीयस्त्वं सूनवे पितृस्थानीयाय मह्यं अभीष्टं
देहीति शेषः। हि ष्म इति निपातौ इत्थं सर्वथेत्येतमर्थमाचष्टे अभीष्टदाने दृष्टान्तद्वयमुच्यते यथा आपये बन्धुराय बन्धवे आप
जनिषु सर्वथा ददातीति शेषः सखा प्रियः सख्ये प्रियाय मनसे अभीष्टं सर्वथा ददाति तथा त्वमपि देहि। आ नो बर्हिः। हे अग्ने वरु

ण्यादयो देवाः त्वद्बन्धवः त्वया प्रेरिताः रिशादसः हिंसकानामदनतः नोऽस्मदीयं बर्हिः यज्ञे आसीदन्तु। तत्र दृष्टान्तः। यथा मनुषः मनवः प्र
जापतेर्यज्ञमासीदन्तीति तद्वत्। पूर्व्य होतः। हे अस्मत्पादेः पूर्व्य मुख्य होतः होमनिष्पादकाग्ने नोऽस्मदीयस्यास्य प्रवर्तमानस्य यज्ञस्य सख्यस्य
चास्य नु अनुग्रहस्य च सिद्ध्यर्थं मंदस्व तं पूर्व्यो दृष्टो भव इमाः अस्माभिः प्रयुज्यमानाः गिरः उ षु स्तुतिरूपा वाचोपि सु श्रुधि शृणु। यच्चिद्धि।।
हे अग्ने यच्चिद्धि यद्यपि शश्वता शश्वतेति नित्येन तना विस्तृतेन हविषा देवं देवं अन्यमन्यं वरुणेन्द्रादिरूपं नानाविधं देवताविशेषं य
जामहे तथापि त्वं इद्धविः सर्वं त्वे इत् त्वय्येव हूयते अतो देवान्तरविषयो यागोपि त्वदीयेव सत्य इत्यर्थः। प्रियो नो अस्तु। विश्पतिः विशां प्र
जानां पालको होता होमनिष्पादको मन्द्रो हर्षकः वरेण्यो वरणीयोऽग्निः नोऽस्माकं प्रियोऽस्तु वयमपि स्वग्नयः शोभनाग्नियुक्ताः सन्तः तव प्रि
याः भूयास्मेति विशेषः। स्वग्नयो हि। स्वग्नयः शोभनाग्नियुक्ताः देवाः सोऽदीप्यमानाः ऋत्विजः नोऽस्मदीयं वार्यं वरणीयं हविः हि यस्मा
द्धिरे धृतवन्तः तस्माद्वयं स्वग्नयः शोभनाग्नियुक्ताः सन्तो मनामहे त्वां याचामहे। अथा न उभयेषां। हे अग्ने अमृत मरणरहिताग्ने अ
र्थकर्मानुष्ठानानन्तरं मर्त्यानां मनुष्याणां नोऽस्माकमस्मत्स्वामिनस्तव चोभयेषां मिथः परस्परं प्रशस्तयः प्रशंसारूपा वाचः सन्तु स
मागत्वित्तमितियजमाने विषये सम्यगस्तु।। विश्वेभिरग्ने।। सहसो बलस्य पुत्र हे देवतारूपाग्ने विश्वेभिरग्निभिः सर्वैराहवनी
यादिभिर्युक्तस्त्वं इमं मदीयं यज्ञं इदं मदीयं वचः स्तोत्रं च सेवमानः चनो अन्नं धाः अस्मभ्यं धेहि। अश्वं न त्वा। अश्ववारणं पुच्छेनासं
म्राजन्तं सम्राजं स्वरूपस्वामिनं अग्निं वाल नमोभिः स्तुतिभिः वन्दध्यै वन्दितुं प्रवृत्ताः इति शेषः।। अत्र दृष्टान्तः।। वारवन्तं वालयुक्तं अश्वं न अश्व
मिव अश्वो यथा वालैर्बाधकान्मशकान्मक्षिकादीन्परिहरति तथा त्वमपि ज्वालाभिरस्मद्विरोधिनः परिहरसीत्यर्थः।। स घा नः सूनुः
स एवाग्निर्नोऽस्माकं सूनुः शवसः सूनुः बलेन निर्मथ्यत्वेनेति शेषः कीदृशः शवसा बलस्य सूनुः पुत्रः पृथुप्रगामा पृथुगमनशीलः किंच अस्मा
कं मीढ्वान्कामानां वर्षिता च भूयात् ऋतयतु। स नो दूरात्। हे अग्ने विश्वायुर्व्याप्तगमनः सत्वं दूरात् दूरेऽपि आसात् आसन्ने देशे
पि अघायोः अघं पापमनिष्टं कर्तुमिच्छतो मर्त्यात् मनुष्यात् वैरिणो नोऽस्मान् [illegible] सदमित् सर्वदैव निपाहि नितरां पाहि पालय।

इममूषु॥ हे अग्ने त्वमस्माकं मस्मत्संबंधिनं इममू षु पुरो देशेऽनुष्ठीयमानमभिसनिं हविर्दानं नव्यांसं नवतरं गायत्रं स्तुतिरूपं अभ्यो
पि देवेषु देवानामग्रे प्रवोचः प्रब्रूहि॥ आनो भज॥ हे अग्ने परमेषु उत्कृष्टेषु स्वर्गलोकवर्तिषु वाजेषु अन्नेषु नोऽस्मान् आभज सर्वतः प्राप
य मध्यमेषु अंतरिक्षलोकवर्तिषु वाजेषु अन्नेषु नो भज अंतमस्य अंतिकतमस्य भूलोकस्य संबंधिनो वस्वो वसुनो धनस्य शिक्षा देहि॥ विभ
क्तासि॥ हे चित्रभानो विचित्ररश्मियुक्त अग्ने विभक्तासि विशिष्टस्य साधनस्य प्रापयितासि॥ तत्र दृष्टांतः॥ ऊर्म्यै ते आर्द्रम उपमा
र्थः पयांसि यथोर्मया उपाके समीपे ऊर्मौ ऊर्मितरंगोपलक्षितं कुल्यादि रूपं प्रवाहं विभजति तद्वत्॥ दाशुषे हविर्दत्तवते
यजमानाय सद्यस्तत्क्षणमेव क्षरसि कर्मफलं अनुतांश्च करोषि॥ यमग्ने॥ हे अग्ने पृत्सु संग्रामेषु यं मर्त्यं यजमानम
वाः अवसि रक्षसि यं पुरुषं संग्रामेषु जुनाः प्रेरयासि स नरः यजमानः शश्वतीः इषः नित्यान्यन्नानि यंता नियंता यंतुं स
मर्थो भवति॥ नकिरस्य॥ हे सहंत्य शत्रूणामभिभवनशील अग्ने अस्य त्वदुक्तस्य यजमानस्य कयस्य चित् कस्या
पि पर्येता न किः आक्रमिता नास्ति किंचास्य यजमानस्य श्रवाय्यः श्रवणीयो वाजोऽन्नं बलं वा भिरोषोऽस्ति॥
स वाजं विश्व॥ विश्वचर्षणिः सर्वैर्मनुष्यैरुपेतः सोऽग्निः अर्वद्भिरश्वैर्वाजं संग्रामं तरुता तारयिता अस्तु विप्रेभिर्मे
धाविभिः ऋत्विग्भिः सहितः स्तुष्टोऽग्निः सनिता फलस्य दाता अस्तु॥ जराबोध॥ हे जराबोध जरा स्तुत्या बोध्य
मान अग्ने विविड्ढि विश तत् यजमानस्य प्रज्ञानुग्रहार्थं यज्ञियाय यज्ञसंबंध्यनुष्ठानेषि प्रवेष्टुं तदेव यजमानं विवि
ड्ढि प्रविश यजमानो रुद्राय क्रूराय पूज्यरूपे तुभ्यं दृशीकं दर्शनीयं समीचीनं स्तोमं स्तोत्रं करोतीति शेषः॥ अत्र
यास्कः जरा स्तुतिर्जरतेः स्तुतिकर्मणः॥ स नो महाँ अनि॥ सोऽग्निरनोऽस्मान् धिये कर्मणि वाजाय अन्नाय हिन्वतु प्रीण

२३

यतु कीदृशः महान् गुणाधिकः अनिमानः निर्मानवर्जितः अपरिच्छिन्न इत्यर्थः धूमकेतुः धूमेन ज्ञाप्यमानः पुरुश्चंद्रः बहु
दीप्तिः॥ स रेवाँ इव॥ सोऽग्निः उक्थैः स्तोत्रैः पुरुकान् अस्मान् शृणोतु तत्र दृष्टांतः रेवानिव यथा लोके धनवान् राजा बंदिनां स्तोत्रं शृणोतु
तद्वत् कीदृशः विश्पतिः प्रजापालकः दैव्यः देवानां संबंधी अग्निर्देवानां होता इति श्रुतेः तरातूः केतुः दूतवत् ज्ञापकः अग्निर्वै देवानां
दूत आसीदिति श्रुतेः बृहद्भानुः प्रौढरश्मिः॥ नमो महद्भ्यः॥ अग्निनामप्रेरितः शुनःशेपः विश्वान्देवान् स्तुतवान्॥ नमो महद्भ्यो नमो अ
र्भकेभ्य इत्येतत्पदं चेति॥ महद्भ्यः गुणैरधिकाः अर्भकाः गुणैर्न्यूनाः युवानः तरुणाः आशिनाः वयसा व्याप्ताः वृद्धाः यथोक्तेभ्यश्चतुर्विधदेव
युक्तेभ्यो देवेभ्यो नमोऽस्तु यदि शक्नवाम कथंचिद्धनादिसंपत्त्या शक्ताश्चेत्तदानीं देवान्यजामहे हे देवाः ज्यायसो ज्येष्ठस्य देवताविशेषस्य आ
सर्वतः प्रशस्तं शंसं स्तोत्रं अहं विच्छिन्नं माकर्ष आत्रिनेभ्यः अन्यिव्यासो॥ २८ यत्र ग्रावा पृथु॥ हे इंद्र यत्र यस्मिन्कर्मणि सोमस्या
भिषवार्थं ग्रावा पाषाणः पृथुबुध्नः स्थूलमूलः ऊर्ध्वः उन्नतो भवति तस्मिन्कर्मणि उलूखलसुतानाम् उलूखलेनाभिषुतानां रसं अवेत् स्वकी
यत्वेनावगत्यैव जल्गुलो भक्षय॥ यत्र द्वाविव॥ यत्र यस्मिन्कर्मणि अधिषवण्या उभे अधिषवणफलके द्वाविव जघना द्वौ जघनप्रदे
शाविव जघनं जघन्यत इति यास्कः कृता विस्तीर्णे कृते संपादिते॥ अन्यत्पूर्ववत्॥ यत्र नार्यपच्यवं॥ यत्र यस्मिन्कर्मणि नारी पत्नी
अपच्यवं शालाया निर्गमनं उपच्यवं शालाप्राप्तिं च शिक्षते अभ्यासं करोति॥ अन्यत्पूर्ववत्॥ यत्र मंथां॥ यत्र यस्मिन्कर्मणि मं
थां आग्नीध्रं मंथनहेतुं मंथानं विबध्नंति॥ तत्र दृष्टांतः रश्मीन् अश्वबंधनार्थान् रज्जून् यमितवा इव नियंतुमिव॥ अन्यत्पूर्व॥ यच्चि
द्धि त्वं॥ हे उलूखलक यच्चिद्धि यद्यपि त्वं अविघातार्थं गृहे गृहे युज्यसे तथापीह वेदिके कर्मणि त्वं मुसलप्रहारेण द्युमत्तमं अतिशयेन दी
प्तं प्रभूतध्वनियुक्तं शब्दं वद॥ तत्र दृष्टांतः जयतामिव दुंदुभिः यथा युद्धे जयं प्राप्तवतां राज्ञां दुंदुभिर्महांतं ध्वनिं करोति तद्वत्॥ उलूख
लशब्दं यास्क एवं व्याचष्टे उलूखलमुरुकरं वोर्ध्वखं वा उरु मे कुर्वित्यब्रवीत्तदुलूखलमभवदुरुकरं वै तदुलूखलमित्याचक्षते परोक्षेण

24

तिचप्राह्लणमिति॥ उत स्मते॥ उत अपि च हे वनस्पते उलूखलरूप वृक्ष ते अग्रमित् अग्र पुरत एव वातो विवाति त्वन्नुपेतं मुसलप्रहा
रेवां पुविशेषेण प्रसरति खलु अथो अनंतरं हे उलूखल इन्द्राय इन्द्रोपकारार्थं पातवे पातुं सोमं सुनु सोमाभिषवं कुरु॥ आयजी वाजयेत उलू
खलमुसले आयजी यष्टृतौ वा वाजसाधनेन वाजसातमा अतिशयेनान्नप्रदेता इति ता खलु उच्चा ऊर्ध्वं भ्रमन्ती यथा भवति तथा विजर्भृ
तः विशेषेण पुनः पुनः विहारं कुरुतः॥ तत्र दृष्टांतः॥ अंधांस्यन्नानि चर्वणकारी निखादयानिव बप्सतौ भक्षयंतौ हरी इव इन्द्रस्याश्वाविव॥
अत्र यास्क एवं व्याचख्यौ॥ ता नो अद्य॥ अद्यास्मिन् कर्मणि हे वनस्पती उलूखलमुसलरूपौ तौ युवां ऋष्वेभिः दर्शनीयैः सोतृभिः अ
भिषवहेतुभिः सह ऋष्वौ दर्शनीयौ भूत्वा इन्द्राय इन्द्रार्थं मधुमत् माधुर्योपेतं सोमद्रव्यं नोऽस्मदीयं कृतं अभिषुतं सुनुतं॥ हे ऋत्विग्विशेष ह
रिश्चंद्र देवतापक्षे हरिश्चंद्रे इति वा॥ चम्वोः सोमस्य भक्ष्यसंपादयोरधिषवणफलकयोः शिष्टं अभिषवरहितं अवशिष्टं सोमं उद्धर शाक
टस्योपरि हर सोमं अभिषुतं सोमं पवित्रे दशापवित्रे आसृज आनीय प्रक्षिप्य प्रक्षेपसंस्थ वशिष्टं सोमं गोस्त्वचि आनडुहे चर्मणि अ
धिनिधेहि अध्यारोपयस्थापय॥ यच्चिद्धि सत्य॥ विश्वेदेवैः प्रेरितः शुनःशेप एतदादिकाभिर्द्वाविंशतिसंख्याकाभिर्ऋग्भिः इन्द्रं तुष्टाव॥
यच्चिद्धि सत्य सोमपा इति चैतेन सूक्तेनोत्तरस्य च पंचदशाभिरिति॥ हे सोमपाः सोमस्य पातः सत्यवदिन्द्र यच्चिद्धि यद्यपि वयं अना
शस्ता इव स्मसि अप्रशस्ता इव भवामस्तथापि हे तुवीमघ बहुधनेन्द्र त्वं नु गोषु अश्वेषु शुभ्रिषु शोभनेषु सहस्रेषु सहस्रसंख्याकेषु त्व
न्निमित्तभूतेषु नोऽस्मानाशंसय॥ सर्वतः प्रशंसां कुरु अस्मद्दोषमनपेक्ष्य गवादीनां पते अन्नानां पालक तवेदं संज्ञाकर्म विशेषानुग्र
हरूप सर्वदा वर्तते॥ अन्यत् पूर्वं॥ निष्वापया मिथूदृशा॥ मिथूदृशा परस्परसंगत्वेन दृश्यमाने यमदूत्यौ निष्वापय॥ नितरां स्वप्तं कुरु॥
ते चास्मान्मारापितु अबुध्यमाने सत्यौ सस्तां निद्रां प्राप्नुतां॥ अन्यत् पूर्वं॥ ससंतु त्याः॥ त्याः अस्माभिः अदृश्यमानाः परोक्षास्ताः अरा
तयः अदानशीलाः शत्रवः ससंतु॥ निद्रां कुर्वंतु॥ हे शूर शौर्ययुक्तेन्द्र रातयः दानशीलाः बंधवो बोधंतु अस्मान् बुध्यंतां॥ अन्यत्पूर्वं॥ समि

२८

न्द्र गर्दभं॥ हे इन्द्र अमुया अनया अस्माभिः श्रूयमाणया पापया निंदापरया वाचा नुवंतं स्तुवंतं अपकीर्तिं प्रकटयंतमित्यर्थः॥ तादृशं
गर्दभं गर्दभसमानं वैरिणं समिंधि सम्यक् मारय॥ यथा गर्दभः श्रोतुमशक्यं परुषं शब्दं करोति तथा शत्रुरपि॥ अन्यत् पूर्वं॥ पताति कुंडृणा
च्या॥ वातो अस्मत्तः प्रतिकूलो वायुः कुंडृणाच्या कुटिलगत्या सत्वात्परित्यज्य वनादधि अरण्याद्ध्यधिकं दूरदेशं पताति पततु॥ अन्यत्सर्वं॥
सर्वं परिक्रोशं॥ परिक्रोशं अस्मद्द्विषे सर्वतः आक्रोशं कर्तारं सर्वं पुरुषं जहि मारय कृकदाश्वं अस्मद्द्विषे हिंसाप्रदं शत्रुं जम्भय मारय॥
अन्यत्॥ आ व इन्द्रं क्रिविं॥ वाजयंतोऽन्नमिच्छंतो वयं शुनःशेपाः हे ऋत्विग्यजमानाः वो युष्माकं संबंधिनमिन्द्रं इन्दुभिः सोमैरासिंचे सर्वतः सिं
चाम कर्तुः स्याम॥ कीदृशं शतक्रतुं शतसंख्याककर्मोपेतं मंहिष्ठं अतिशयेन प्रवृद्धं॥ सेचने दृष्टांतः॥ यथा येन प्रकारेण क्रिविं कृत्रिमं जलेन
पूर्यंति तद्वत्॥ क्रिविशब्दोऽत्र कूपनामसु पठितत्वात्॥ क्रिविः कूपः॥ शतं वा यः॥ इन्द्रः शुचीनां शुद्धानां सोमानां शतं शतसंख्याकं सहस्रं वा
समाशिरां॥ समीचीनेनाशिराख्येन श्रपणद्रव्येणोपेतानां सोमानां सहस्रं सहस्रसंख्याकं समूहं वा एतु प्राप्नोतु॥ आगत्य च सोमा
ननु गच्छति॥ विशेषः॥ सोमप्राप्तौ दृष्टांतः॥ निम्नं न यथा निम्नप्रदेशं आपः आभुवंति तद्वत्॥ सं यन्मदाय॥ यत् शुचीनां शतं सहस्रं वा शुष्मि
णो बलवंत इन्द्रस्य मदाय मदार्थं संगतं भवति॥ एना हि अनेनैव शतेन सहस्रेण वा अस्येन्द्रस्योदरे व्याप्तिर्दधे पुष्टा भवति॥ तत्र दृ
ष्टांतः॥ समुद्रो न समुद्र इव यथा समुद्रमध्ये जलं व्याप्तं तद्वत्॥ अयमु ते॥ हे इन्द्र अयमपि दृश्यमानः सोमः ते तवार्थं संपादितः यं सोमं स
मतः स्वं सम्यक् सात्त्वेन प्राप्नोषि॥ तत्र दृष्टांतः॥ कपोत इव॥ यथा कपोतः [illegible] गर्भधिं गर्भधारिणीं कपोतीं प्राप्नोति तद्वत्॥ तच्चि
तस्मादेव कारणात् नोऽस्मदीयं वचः ओहसे प्राप्नोषि॥ स्तोत्रं राधानां॥ हे इन्द्र राधानां पते धनानां पालक गिर्वाहो गीर्भिः स्तूयमान वीरशौर्यो
पेत नमस्यते तव स्तोत्रं महीदृशं भवति तस्य तव विभूतिर्लक्ष्मीः सूनृता प्रियसत्यरूपास्तु॥ ऊर्ध्वस्तिष्ठा नः॥ हे शतक्रतो शतसंख्याककर्मो
पेत अस्मिन्न सक्केशजे संग्रामे नोऽस्माकमूतये रक्षणाय ऊर्ध्वं उन्नतः उच्छ्रितस्तिष्ठ॥ त्वं चान्येन चापि लिखितो अन्येषु कार्येषु ते संबंधि

यामहे ॥ स्म्य गिचारयामः ॥ योगे योगे तवस्तरं ॥ योगे योगे प्रवेशे तत्तत्कर्मोपक्रमे वाजे वाजे कर्मविघातिनि तस्मिंस्तस्मिन्संग्रामे तव
स्तरं अतिशयेन मिंद्रं ऊतये रक्षार्थं सखायः सखिवत्प्रिया वयं हवामहे आह्वयामः ॥ आ घा गमद्यदि ॥ यद्ययमिंद्रो नोस्मदीयं हवमाह्वा
नं श्रृणुयात्तदानीं स्वयमेव सहस्रिणीभिः ऊतिभिः बह्वीभिः पालनैः वाजेभिरन्नैश्च उपसमीपे आगच्छत्वेव आगमत् ॥ अनु प्रत्नस्योकसः ॥
प्रत्नस्य पुरातनस्य ओकसः स्थानस्य स्वर्गरूपस्य सकाशात्तु विप्रतिं बहून्यजमानान्प्रति ॥ आगच्छतारं ॥ पुरुषं इंद्रं अनुजुहे ॥ अनुक्रमेण
कर्मस्वाबाहयामि यं तेला मिंद्रं पिता अस्मदीयो जनकः पूर्वं पुरा स्वकीयोषण काले हुवे आहूतवान् तमहं आह्वयामीति पूर्वेणान्वयः ॥ तं त्वा वयं ॥ हे
विश्ववार सर्वैर्वरणीय पुरुहूत बहुभिः स्वस्वकर्मण्याहूत सखे सखिवत्प्रिय वसो निवासहेतो इंद्र तं पूर्वोक्तगुणयुक्तं त्वां जरितारः स्तोतॄ
णामनुग्रहार्थमाशास्महे प्रार्थयामहे ॥ अस्माकं शिप्रिणीनां ॥ हे सोमपाः सोमस्य पातः सखे सखिवत्प्रिय वज्रिन्वज्रयुक्तेंद्र सखीनां सखिव
त्प्रियाणां सोमपाव्नां सोमस्य पातॄणां अस्माकं शिप्रिणीनां दीर्घाभ्यां हनुभ्यां नासिकाभ्यां वा युक्तानां गवां सम्हः त्वत्प्रसादादस्त्विति शेषः ॥
तथा तदस्तु ॥ हे सोमपाः सखे वज्रिन्नू इंद्र यदभिलषितार्थं तेन वा अनुग्रहं यथा येन प्रकारेण उश्मसि वयं कामयामहे त्वं तथा कुरु त्वत्प्रसादा
त्तदभीष्टं तथास्तु ॥ रेवतीर्नः ॥ क्षमंतां त्वं वतो वयं याभिर्गोभिः सह मदेम हृष्येम इंद्रे सधमादे अस्माभिः सह हर्षयुक्ते सति नोस्माकं ता गावः
रेवतीः क्षीराद्याज्यानि धनवंत्यः तुविवाजा प्रभूतबलाः संतु ॥ आ घ त्वावान् ॥ हे धृष्णो धार्ष्ट्ययुक्तेंद्र त्वावांत्वत्सदृशो देवताविशेषः त्मनाप्तः स्व
दत्तु ग्रहत्वात्स्वयमेवाप्तः संनद्धया नः अस्माभिर्याच्यमानाः स्तोतृभ्यः स्तोतॄणामनुग्रहाय तदभीष्टमर्थं यवं व रयं आ अक्ष्णोः आनीय प्र
क्षिपतु ॥ तत्रैव दृष्टांतः ॥ चक्र्योः रथस्य चक्रयोः अक्षं न यथा अक्षं प्रक्षिपति तद्वत् ॥ आ यद्दुवः शतक्रतो ॥ हे शतक्रतो इंद्र यद्दुवो धनं कामि
तार्थरूपं आ स्तोतृभिः शास्यमत्तितं कामं जरितॄणां स्तोतॄणां अनुग्रहाय आ अक्ष्णोः आनीय प्रक्षिपति तत्रैव दृष्टांतः शचीभिः कर्मभिः शाक
टो चित्या पारविशेषैः अक्षं न यथा अक्षं प्रक्षिपति तद्वत् ॥ शश्वदिंद्र ॥ [illegible] हिरण्यरथं [illegible] प्रतिजग्राह तथा च ब्राह्मणं ॥
तस्मा इंद्रस्तूयमानः प्रीतो मनसा हिरण्यरथं ददौ तमेतया प्रत्यपद्यत शश्वदिंद्र इति ॥ इंद्रः शश्वत् सर्वदा धनानि वैरिसंबंधीनि जिगाय जित
वानश्वैरिति शेषः ॥ [illegible] ॥ २५

दाता स इंद्रो नोस्माकं सनये संभजनार्थं हिरण्यरथं सुवर्णेन निर्मितं रथं आदात् त्मना त्मनस्तोरपि हि स्वहितक्तिरादराथं ॥ आश्विनाव
श्वावत्या ॥ इंद्रेण प्रेषितः शुनःशेपः अश्विनौ तुष्टाव तथा च ब्राह्मणं तमिंद्र उवाचाश्विनौ नु स्तुहि अथ त्वोत्स्रक्ष्याव इति सोश्विनौ तुष्टाव तमुत्त
रेण तृचेनेति हे अश्विनौ अश्वावत्या बहुभिरश्वैर्युक्तया शवीरया प्रेर्यमाणया इषा अन्नेन सह आ यातं अस्मिन्कर्मण्यागच्छतं हे दस्रा
अश्विनौ युवयोः प्रसादात् गोमद्बहुभिर्गोभिर्युक्तं हिरण्यवद्बहुना हिरण्येन युक्तं अस्मदीयं गृहमस्त्विति शेषः ॥ समानयोजनो हि ॥ हे द
स्रावश्विनौ वां युवयोः संबंधी रथः समानयोजनः तुल्ययोजनः युवयोर्द्वयोरेकरथारूढत्वात् उभयार्थं संतः देव युज्यते युक्तः स रथः अम
र्त्यो विनाशरहितः अप्रतिहतगतिरित्यर्थः ॥ अत एव हे अश्विनौ हि यस्मात्समुद्रे अंतरिक्षे ईयते गच्छति ॥ अंतरिक्षनामसु पठितं समुद्र
इति यास्कः एवं व्याचष्टे समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः संमोदंतेस्मिन्भूतानि समुदको भवति समुनत्तीति वेति ॥
न्यघ्न्यस्य मूर्धनि ॥ हे अश्विनौ युवां अघ्न्यस्य हंतुं विनाशयितुं अशक्यस्य दृढस्य पर्वतस्य मूर्धनि उपरि चक्रं न वदीयरथसंबंधि एकं चक्रं
नि येमथुः नियमितवंतौ अन्यच्चक्रं परि द्यां द्युलोकस्य परितः ईयते गच्छति ॥ कस्त उषः कधः ॥ अश्विभ्यां प्रेरितः शुनःशेप उषसस्तुष्टा
व तथा च ब्राह्मणं ॥ तमश्विनावूचतुरुषसं नु स्तुहि अथ त्वोत्स्रक्ष्याम इति ॥ आसति ॥ हे कधप्रिये स्तुतिप्रिये अमर्त्ये अमरणरहिते उषः
एतच्छब्दाभिधेये उषःकालाभिमानिनि देवते भुजे तव भोगाय मर्त्यो मनुष्यः को विद्यते ॥ हे विभावरि विशेषप्रभावयुक्ते उषो देवते कं पुरुषं
नक्षसे प्राप्नोषि त्वयोचितं भोगं दातुं न कोपि मनुष्यः समर्थः ॥ अत एव त्वं कमपि पुरुषं भोगापेक्षया न प्राप्नोषि इदं शास्त्रं नहि मे स्यर्थः ॥
वयं हि ते ॥ अश्व्ये अश्वापनशीले चित्रे चायनीये अरुषि आरोचमाने उषःकालाभिमानिनि देवते तव स्वरूपं आ अंतात् समीपपर्यंतं आ
परार्कात् दूरपर्यंतं वयं मनुष्याः न अमन्महि न बोद्धुं समर्थाः ॥ हि शब्दः प्रसिद्धो देवतः महिम्नः पारावारयोः अज्ञानमस्माकं प्रसिद्धमि
त्यर्थः ॥ त्वं त्येभिरागहि ॥ हे दिवो दुहितः द्युदेवतायाः पुत्रि उषो देवते त्यैभिर्वाजेभिः तैः रत्नैः सह त्वमागहि अत्रागच्छ अस्मे अस्मासु रयिं
धनं निधारय ॥ नितरां स्थापय त्यैभिः ॥ त्वमग्ने प्रथमो अंगिराः ॥ हे अग्ने त्वं प्रथमः अंगिरसानामृषीणां सर्वेषां जनकत्वात् ॥

26

तादृशो ऽंगिरसो नामक ऋषिः अभवः। तथा च ब्राह्मणं। येंगारा आसंस्तेंगिरसो ऽभवन्निति। तथास्य पं देवो भूत्वा देवाना
मन्येषां शिवः शोभनः सखा भवः। तव व्रते त्वदीये कर्मणि कवयो मेधाविनः विद्मनापसः ज्ञानेन व्याप्तवानोः अथवा
ज्ञातकर्मणः भ्राजदृष्टयः दीप्तनानायुधाः मरुतो मरुत्संज्ञकाः देवाः अजायंत॥ त्वमग्ने प्रथमो अंगिरस्तमः। हे अग्ने
त्वं प्रथमः आद्यः अंगिरस्तमः अतिशयेनांगिरो भूत्वा। कविः मेधावी सन् देवानामन्येषां व्रतं कर्म परिभूषसि परितोलं
करोषि। कीदृशस्त्वं विश्वस्मै भुवनाय सर्वलोकानुग्रहव्यवहारार्थं विभुः बहुविधः आहवनीयाद्यनेकरूपधारीत्यर्थः।
मेधिरो मेधावी द्विमाता द्वयोररण्योः संजनः। यद्वा। द्वयोर्लोकयोर्निर्माता आयवे मनुष्यार्थं कतिधा कतिभिः प्रकारैः स
र्वत्र शयुः शयानः तत्तदनुग्रहव्यवस्थितस्य तव प्रकाराः इयंत इति न केनापि ज्ञायंत इत्यर्थः॥ त्वमग्ने प्रथमो मातरिश्वने॥
हे अग्ने त्वं मातरिश्वने प्रथमो मुख्यो भूत्वा वन्तसे अग्निर्वै पुरा दित्य इति वाय्वपेक्षया सर्वत्र मुख्यत्वावधारणात् तादृश
स्त्वं स्वक्रतूया शोभनकर्मेच्छया विवस्वते परिचरते यजमानाय आविर्भव प्रगटो भव तव सामर्थ्यं दृष्ट्वा रोदसी द्यावापृथि
वी अरेजेतां अकंपेतां। भ्यसते रेजत इति भयवेपनयोरिति यास्कः। होतृवूर्ये होतृवरणयुक्ते कर्मणि भारं भरणं असघ्नोः
ऊढवानसि। हे वसो निवासहेतो। अवहः महः पूज्यान् देवान् यजः इष्टवानसि॥ निर्मंथनहेतुत्वात् माता अंतरिक्षं तत्र श्वसिति प्रा
णितीति मातरिश्वा वायुः॥ त्वमग्ने मनवे। हे अग्ने त्वं मनवे मनुग्रहार्थं द्यां द्युलोकं अवाशयः शब्दितवान् असि पुण्यकर्म
भिः स द्योः द्युलोकः इति प्रकटितवानसि स्वकृते तव परिचरणं कुर्वते पुरूरवसे एतन्नामकस्य राज्ञो नुग्रहार्थं सुकृत्तरः अ
तिशयेन शोभनकार्यभूतः यद्यदा पित्र्योररण्योः श्वात्रेण क्षिप्रप्रमथनेन परिमुच्यसे परितो मुक्तो भवति। उत्सह्यस इ

त्यर्थः। तदानीं त्वा अरण्योः संजनं त्वा पूर्वदेशं आनयन्। आहवनीयत्वेन स्थापितवंतः। पुनः पश्चादपरं पश्चिमदेशं आनय
गार्हपत्यरूपेण प्रापितवंतः। आहवनीये कर्मानुष्ठानाय पत्नीत ऊर्ध्वं गार्हपत्यरूपेण धारितवंत इत्यर्थः॥ त्वमग्ने वृषभः। हे अग्ने
त्वं वृषभः कामानां वर्षिता पुष्टिवर्धनः यजमानस्य धनादिभिर्वृद्धिहेतुः उद्यतस्रुचे उद्धृतया स्रुचा युक्ताय यजमानाय त्वदनु
ग्रहार्थं श्रवाय्यः मंत्रैः श्रवणीयो भवसि यो यजमानो वषट्कृतिं वषट्कारयुक्तामाहुतिं परि वेद परितो जानाति समर्पयती
त्यर्थः। एकायुः मुख्यान्नः त्वमग्ने प्रथमं तं यजमानं विशः तदनुकूलाः आविवासासि सर्वतः प्रकाशयसि॥ त्वमग्ने वृजिन
वर्तनिं नरं। हे विचर्षणे विशिष्टज्ञानयुक्ताग्ने त्वं वृजिनवर्तनिं विहुतमार्गं सदाचाररहितं नरं पुरुषं सम्यक् स्वचनीयसमने
तुं योग्यो विदथे कर्मणि पारयसि पूरयसि यागस्य कर्मानुष्ठानयुक्तं करोषीत्यर्थः। यस्त्वं परितक्म्ये परितो गंतव्ये धने धनविभुरा
णां प्रियतमे शूरसाता शूरैः संभजनीये युद्धे दभ्रेभिश्चिद् अल्पैरपि समर्यं हरितैः पुरुषैः दभ्रमर्भकमस्यमल्पमस्येति यास्कः॥ सम
तासम्यग्योद्धुं प्राप्ते सतीतद्नुग्रहार्थं भूयसः प्रौढान् अतिपुष्कलिणः भूरीन् हंसि मारयसि॥ ईदृशस्त्वं महिमेत्यर्थः॥ त्वं त
मग्ने॥ हे अग्ने त्वं तं मर्त्यं तथाविधं त्वत्सेविनं मनुष्यं दिवे दिवे प्रतिदिनं अवसे श्रवार्थं अमृतत्वे उत्कृष्टे मरणरहितप
दे दधासि धारयसि यो यजमानः उभयाय जन्मने द्विविधजन्मार्थं द्विपदां चतुष्पदां जायतेत्यर्थः। तादृषाणः अतिशये
न तृष्णायुक्तो भवति तस्मै सूरये अभिज्ञाय यजमानाय मयः सुखं यद्वा सुखं तन्मय इति श्रुतेः तत्स्वरूपमन्नमपि
आ कृणोषि सर्वतः करोषि॥ त्वं नो अग्ने सनये॥ हे अग्ने स्तवानः स्तूयमानः त्वं नः अस्माकं धनानां सनये दानार्थं यशसं यशोयु
क्तं कारुं कर्मणां कर्तारं पुत्रं कृणुहि कुरु नवेन नूतनेन अपसा प्राप्तेन त्वद्दत्तेन पुत्रेण कर्म यागादिरूपं वर्धयामहे द्यावापृ

थिवी उमे देव ते देवैरन्यैः सह नोऽस्मानावतं रक्षतं ते॥ त्वं नो अग्ने पित्रोः॥ हे अग्ने अनवद्य दोषरहित त्वं अग्ने देवेषु सर्वेषु मध्ये जा
गृविर्जागरूकः त्वं पित्रोर्मातापितृरूपयोर्द्यावापृथिव्योरुपस्थे समीपस्थाने वर्तमानः सन्नोऽस्माकं तनूकृत् पुत्ररूपशरीरकारो
भूः तथा बोधि बुध्यस्व अनुगृहाण इत्यर्थः॥ तथा कारवे कर्मकर्त्रे यजमानाय प्रमतिः प्रकृष्टानुग्रहरूपप्रकृष्टमतीयुक्तः भव
ति शेषः॥ हे कल्याण मंगलरूपाग्ने त्वं विश्वं वसु सर्वमपि ओषिषे यजमानार्थं आवपसि॥ त्वामग्ने प्रमतिः॥ हे अग्ने त्वं प्र
मतिः प्रकृष्टानुग्रहरूपप्रकृष्टमतियुक्तोऽसि तथा त्वं नोऽस्माकं पिता पालकोऽसि तथा त्वं वयस्कृत् आयुष्प्रदोऽसि वयमनुष्या
नारस्तव जामयः बंधवः हे अदाभ्य केनाप्यहिंसनीय अग्ने सुवीरं शोभनपुरुषयुक्तं व्रतपा कर्मणः पालकं त्वा शतिनः शत
संख्याकाः शतशो धनानि संयंति सम्यक् प्राप्नुवंति॥ तथा सहस्रिणः सहस्रसंख्याकाः रायः संयंति॥ त्वामग्ने प्रथमं॥ हे
अग्ने त्वां प्रथमं पुरा देवाः आयवे आयोर्मनुष्यरूपस्य नहुषस्य एतन्नामकस्य राजविशेषस्य आयुं मनुष्यरूपं विश्पतिं सेना
नापतिं अकृण्वन् कृतवंतः तथा मनुष्यस्य मनोः इळामेतन्नामधेयां पुत्रीं शासनीं धर्मोपदेशकर्त्रीमकृण्वन् कृतवंतः
~~तथा च तैत्तिरीयैराम्नायते इळा वै मानवी यज्ञानुकाशिन्यासीदिति॥ यद्धर्मस्य ममकस्य मदीयस्य हिरण्यस्तूपस्य बंधि~~
मनुष्यस्य मनोः इळामेतां नामधेयां पुत्रीं शासनीं धर्मोपदेशकर्त्रीमकृण्वन् कृतवंतः॥ तथा च तैत्तिरीयैराम्नायते॥
इळा वै मानवी यज्ञानुकाशिन्यासीदिति वाजसनेयिनोऽप्येवमामनंति प्रयाजानुयाजानां मध्ये यामवकल्पयन्नर्यास्त्वं नि
धास्यतिकामा न त्विमामनुमन्वतादिति। यद्धर्मस्य ममकस्य मदीयस्य हिरण्यस्तूपसंबंधिनो यः पिता अंगिराः तस्य पितुः
पुत्रो जायते तदानीं हे अग्ने त्वमेव पुत्ररूप आसीरिति शेषः॥ आयवे षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी॥ त्वं नो अग्ने तव देव॥

२०

हे वंद्य वंदनीय अग्ने त्वं तव पायुभिस्त्वदीयैः पालनैर्मघोनः धनयुक्तान् नोऽस्मान् रक्ष तथा तन्वश्च तनूः पुत्रादेः तान् परिरक्ष तोक
स्यास्मदीयस्य पुत्रस्य पौत्रस्य तनयः अस्मत्सोत्रादिस्तव व्रते त्वदीये कर्मणि अनिमेषं निरंतरं रक्षमाणः सावधानो वर्तते त्वं गोपा
वः संततिना तासां गवां त्राता रक्षकोऽसि इदं शास्य त्वं अस्मद्रक्षणे किमु वक्तव्यमित्यर्थः॥ त्वमग्ने यज्यवे॥ हे अग्ने त्वं यज्यवे यज्योर्यजमा
नस्य पायुः पालकः अन्तरः समीपवर्ती सन् अनिषंगाय रक्षाभिः रसबन्धाय यज्ञाय चतुरक्षः दिक्चतुष्टयेऽपि दृश्यस्य यज्वालायुक्तः
इध्यसे दीप्यसे अरकाय हिंसकाय धायसे पोषकाय तुभ्यं रातहव्यो दत्तहविः यजमानोऽस्ते कीरेश्चित् स्तोतुरेव सतः तस्य संबंधिनं मंत्रं त
दीयस्तोत्ररूपं मनसा त्वदीयेन चिंतनेन वनोषि याचयसि॥ त्वमग्न उरुशंसाय वाघते॥ हे अग्ने त्वं उरुशंसाय बहुभिः स्तोतव्याय वा
घते ऋत्विजे तदुपकारार्थं स्पार्हं स्पृहणीयं परमुत्तमं यद्रेक्णो धनमस्ति तद्धनं वनोषि अनुज्ञातं लभतामिति॥ कायसे॥ तथा त्वं आ
ध्रस्य चित् सर्वस्य धारणीयस्य पोषणीयस्य दुर्बलस्य यजमानस्यापि प्रमतिः प्रकृष्टबुद्धियुक्तः पिता पालकः इत्यभिज्ञैरुच्यसे॥ त
था विदुष्टरोऽतिशयेनाभिज्ञस्त्वं पाकं शिशुं पोता पालेनोर्भको डिंभ इत्यभिधानात्॥ यास्कोऽप्येवमाह॥ पाकः पक्तव्यो भवतीति तथाविधं यजमा
नं प्रशास्सि प्रकर्षेण अनुशिष्टं करोषि तथा दिशः प्राच्यादिकाः प्रशास्सि त्वदीयशासनाभावेनानुष्ठातृणां विभ्रमः स्यात्॥ तथा च श्रू
यते॥ देवा वै देवयजनमध्यवसाय दिशो न प्राजानन्निति॥ स भ्रमो दक्षिणादिग्गतेनाग्निना मानिष्पाद्यते॥ तदपि तत्रैवाम्नातं॥ अथो
एतं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना दक्षिणामिति॥ त्वमग्ने प्रयतदक्षिणं॥ हे अग्ने त्वं प्रयतदक्षिणं नियुजमाने नरं
स्रिग्भ्यो दक्षिणादत्तारं दत्तारं पुरुषं यजमानं विश्वतः सर्वतः परिपासि सम्यक् पालयसि॥ तत्र दृष्टांतः॥ स्यूतं निछिद्रं लेन सूचिभिः
सम्यक् निष्पादितं वर्मेव यथा कवचं युद्धे पालयतीति तद्वत्॥ स्वादुक्षद्मा स्वादन्नः॥ वसतौ निवासभूते स्वगृहे स्योनकृदितिथीनां सुख
कारी यो यजमानो जीवयाजं जीवयजनसहितं यज्ञं यजते जीवनिष्पाद्यं यज्ञं तनुते तिष्ठति स यजमानो दिवः स्वर्गस्योपमा दृष्टांतो भव
ति॥ यथा स्वर्गोऽनुष्ठातृन्सुखयति तथा त्वमिष्टयागादीनित्यर्थः॥ इमामग्ने॥ हे अग्ने अस्मत्संबंधिनीमिमामिदानीं संपादितां शरणिं हिं

साधनलोपः पूर्वपामी वृषभः समस्व इति रोषः ॥ सोम्यानां सोमाहरिणां अनुष्ठातृणां मन्त्रीनां त्वमप्यादिगुणयुक्तोसि आपः प्रापणीयः ॥
पिता पालकः प्रमतिः प्रकृष्टमननयुक्तः भृमिः भ्रामकः कर्मनिर्वाहक इत्यर्थः ॥ ऋषिकृत् दर्शनकारी अनुजिघृक्षया प्रत्यक्षो भवसी
त्यर्थः ॥ मनुष्वदग्ने ॥ हमुचेभुद्विमुक्तः अंगिरसो गमनशील हविषं नय नो पत अत्र गमनशीलाग्ने अच्छ आभिमुख्येन सदने दे
वेयाहि गच्छ तत्र चत्वारो दृष्टांताः ॥ मनुष्वद्यथा मनुरनुष्ठानदेवेगच्छति अंगिरस्वद्यथांगिरा गच्छति ययातिवद्यथा ययातिर्नाम
राजा गच्छति पूर्ववत् अन्ये च पूर्वपुरुषाः पृथाग्गच्छंति यथा मन्वादयो पतेग च्छंति तद्वदावह दैव्यं देवतासमूहरूपं जनमावह अभि
कर्मण्यानय आनीय च बर्हिष्यास्तीर्णे दर्भे आसादय तां देवानुपवेशय उपवेश्य च प्रियमभीष्टं हविर्यक्षि च देहि ॥ एतेनाग्ने ॥ हे अ
ग्ने एतेन अस्मत्प्रयुक्तेन ब्रह्मणा मंत्रेण वावृधस्व अभिवृद्धो भव ॥ शक्ती वा बिदावा ॥ अस्मदीयशक्त्या चास्मदीयज्ञानेन च तु लब
पत स्तोत्रं चकृम वयं कृतवंतः ॥ एतेन ब्रह्मणत्वेति पूर्वत्रान्वयः ॥ उत अपि च अस्मान् अनुष्ठातॄन् वस्यः वसुमत्तरत्वलक्षणं श्रेयः प्रनेषि
प्रकर्षेण प्रापय नो अस्मान् वाजवत्या प्रभूतान्नयुक्तया सुमत्या अनुष्ठानविषयया शोभनबुद्ध्या संसृज संयोजय ॥ इंद्रस्य नु वी
र्याणि ॥ वज्री वज्रयुक्तः प्रथमानि पूर्वसिद्धानि मुख्यानि यानि वीर्याणि पराक्रमयुक्तानि कर्माणि चकार तस्येंद्रस्य तानि वीर्याणि नु क्षि
प्रं प्रवीमि कानि वीर्याणीति तदुच्यते ॥ अहिमेघं अहन् हतवान् तदेकं वीर्यं अनु पश्चाद् अपोतज्जलानि ततर्द हिंसितवान् भूमौ निपाति
तवानित्यर्थः ॥ इदं द्वितीयं वीर्यं पर्वतानां संबंधिनीर्वक्षणाः प्रवहणशीला नदीः प्राभिनत् भिन्नवान् कूलद्वयकर्षणेन प्रवाहितवानित्यर्थः ॥
इदं तृतीयं वीर्यं एवमुत्तरत्रापि द्रष्टव्यं ॥ अहन्नहिं पर्वते ॥ पर्वते शिश्रियाणं आश्रितं अहिं मेघं अहन् हतवान् ॥ अस्मा इंद्राय स्वर्यं सुष्टु
प्रेरणीयं यद्वा शब्दनीयं वस्तुत्यं त्वष्टा विश्वकर्मा वज्रं ततक्ष तनूकृतवान् ॥ तेन वज्रेण मेघे भिन्ने सति स्यंदमानाः प्रस्रवणयुक्ताः आपः
समुद्रं अंजः सम्यग् अवजग्मुः प्राप्ताः ॥ तत्र दृष्टांतः ॥ धेनवः वत्सान् प्रति हंभारवोपेता धेनवः यथा धेनवः सहैव त्वरया गच्छंति तद्वत् ॥ वृषा
यमाणः ॥ वृषायमाणः वृषवदाचरन् इंद्रः सोमं अवृणीत वृतवान् त्रिकद्रुकेषु ज्योतिर्गौरायुरिति एतन्नामकास्त्रिकद्रुका उच्यंते ॥ तेषु सु

२८

तस्याभिषुतस्याभिषुतस्य सोमस्यांशम पिबत् पीतवान् मघवा धनवानिंद्रः सायकं साधकं वज्रं आदत्त स्वीकृतवान् ॥ तेन वज्रेण अही
नां मेघानां मध्ये प्रथमजां प्रथमोत्पन्नं मेघं अहन् हतवान् ॥ यदिंद्राहन् ॥ उत अपि च हे इंद्र यदा अहीनां मेघानां मध्ये प्रथमजां प्रथमोत्प
न्नं मेघं अहन् हतवानसि आत् तत् अनंतरं मायिनां मायोपेतानां असुराणां संबंधिनीः मायाः प्रामिनाः प्रकर्षेण नाशितवानसि अनंतरं सू
र्यमुषसं उषःकालं द्यां आकाशं च जनयन् उत्पादयन् आवरकमेघनिवारणेन प्रकाशयन् वर्त्तसे तादीत्ना तदानीं आवरकांधकाराभावाच्छत्रु
घातकं वैरिणं न विवित्से किल त्वं न लब्धवान् खलु ॥ अहन्वृत्रं ॥ अयमिंद्रो वज्रेण संपादितो महान् वधः तेन वज्रेण वृत्रतरं अतिशयेन लो
कानामावरकं अंधकाररूपं यद्वा वृत्रे रावरणैः सर्वं छिन्नं तरितं वृत्रमेतन्नामकमसुरं व्यंसं विगतांसं छिन्नबाहुं यथा भवति तथा अस
च्छेदेन दृष्टांतः ॥ कुलिशायेन कुठारेण विवृक्णा विशेषतः छिन्नानि स्कंधांसि इव यथा वृक्षस्कंधाः छिन्ना भवंति तद्वत्तथा सति अहिर्वृत्रः पृ
थिव्या उपरि पृष्टकसामीप्येन संश्लक्ष्णः शायते शयनं करोति छिन्नकाष्ठवद्भूमौ पतत इत्यर्थः ॥ अयोद्धेव ॥ दुर्मदः दुष्टमदोपेतो हर्षयुक्तो वृ
त्रः अयोद्धेव प्रतियोद्धृरहित इव चूर्णरहित इत्यर्थः ॥ इंद्रं आजुह्वे हि आहूतवान् खलु ॥ कीदृशमिंद्रं महावीरं गुणैर्महान्भूत्वा शौर्योपेतं तुविबाधं
ऋजीषिं शत्रूणामपार्जकं अस्मै इंद्राय तस्ये इंद्रस्य संबंधिनो ये शत्रुवधाः संति ते षां वधानां समृतिं संगमं नितारीत् न तीर्णवान् दुर्मदः तरितुं नाशि
कोत् इंद्रशत्रुः इंद्रशत्रुर्घातको यस्य वृत्रस्य तादृशो वृत्र इंद्रेणाहतो नदीषु पतितः सन् रुजानां नदीः संपिपेष सम्यक् पिष्टवान् सर्वलोकाना
वृण्वतो वृत्रदेहस्य पातेन नदीनां कूलानि तत्रत्यपाषाणादिकं च चूर्णीभूतानित्यर्थः ॥ अपादहस्तः ॥ अपात् वज्रेण छिन्नपादरहितः अह
स्तः हस्तरहितो वृत्र इंद्रं इंद्रमुद्दिश्य अपृतन्यत् पृतनां युद्धमैच्छत् दोषाधिक्येन वज्रधावि प्रोपि पृथुसं परिस्पृक्तवानित्यर्थः ॥ अस्य हीनह
स्तस्य वृत्रस्य सानौ पर्वतसानु दृशो प्रौढस्कंधे अधि उपरि वज्रं आजघान इंद्रः आभिमुख्येन प्रक्षिप्तवान् ॥ अशक्तस्यापि युद्धेच्छायां दृ
ष्टांतः ॥ वध्रिः छिन्नमुष्कः पुरुषत्व खोरेतः सेचनसमर्थस्य पुरुषांतरस्य प्रतिमानं सादृश्यं बुभूषन् आभिमुख्येन नश्यन्तः यथा शक्तोति तद्वदयमिति
दोषः ॥ नदं न भिन्नं ॥ अनुपा अनुष्या पृथिव्याः शयानं पतितं वृत्रं आपो जलानि अतियंति अतिक्रम्य गच्छंति ॥ तत्र दृष्टांतः ॥ भिन्नं ब

कूधा भिन्नं न कूलं नदं न सिंधुमिव यथा वर्षिकाले प्रभूताः आपो नद्याः कूलं भित्वातिक्रम्य गच्छंति तद्वत्। कीदृश्य आपो रुहाणाः नृणां
चित्तमारोहंत्यः पुरा वृत्रे जीवति सति तेन निरुद्धा मेघस्थिता आपो भूमौ वृष्ट्यात्मना न भवंति तदानीं नृणां मनः खिद्यते मृते तु वृत्रे निरो
धरहिता आपो वृत्रशरीरमुल्लंघ्य प्रवहंति तदा वृष्टिलाभेन मनुष्यास्तुष्यंतीत्यर्थः। तदेतदुत्तरार्धेन स्पष्टीक्रियते। वृत्रो जीवन्दशायां
महिना स्वकीयेन महिम्ना याश्चिद्याः एव मेघगताः आपः पर्यतिष्ठत् परितः स्थितवान् अहिर्वृत्रो मेघः तासामपां पत्सुतःशीः पदस्या
धःशायानो बभूव। यद्यप्यपां पादो नास्ति। तथाप्यद्भिर्वृत्रस्याभिलंघ्यत्वात्तासामधःशायनमुपपद्यते। नीचावया अभवत्। वृत्रपुत्रा वृत्रः
पुत्रो यस्याः मातुः सेयं माता वृत्रपुत्रा नीचावयाः न्यग्भावं प्राप्ता अभवत्। पुत्रं प्रहाराद्रक्षितुं पुत्रदेहस्योपरि तिरश्ची पतितवतीत्यर्थः।
तदानीमपमिंद्रः अस्या मातुः अव अधोभागे वृत्रस्योपरि वधः हननसाधनमायुधं जभार प्रहृतवान्। तदानीं वृत्रमाता उत्तरा उप
रिस्थिता आसीत् सूः पुत्रस्य अधोभागस्थित आसीत् सा च दानुः दानवी वृत्रमाता शये मृता शयनं कृतवती। तत्र दृष्टांतः। धेनुर्लोकप्रसिद्धा गौः
सहवत्सा न यथा वत्सेन सहिता शयनं करोति तद्वत्। अतिष्ठंतीनां। ~~स्थितिरहितानां~~ वृत्रस्य शरीरमापो विचरंति विशेषेण उपर्याक्रम्य
प्रवहंति। कीदृशं शरीरं निण्यं निर्नामधेयं अप्सु मग्नत्वेन गूढत्वात्। तदीयं नाम केनापि न ज्ञायते एतदेव स्पष्टीक्रियते काष्ठानां पां
मध्ये निहितं निक्षिप्तं कीदृशानां अतिष्ठंतीनां स्थितिरहितानां अनिवेशनानां उपवेशरहितानां प्रवहणस्वभावत्वादेतासां मनुष्यवन्न
क्वापि स्थितिः संभवति। इंद्रशत्रुर्वृत्रो जलमध्ये शरीरे प्रक्षिप्ते सति दीर्घं तमो दीर्घनिद्रात्मकं मरणं यथा भवति तथा आशयत् सर्वतः पा
तितवान्। दासपत्नीः। दासो वृत्रो उपक्षपणाय हेतुर्वृत्रः पतिः स्वामी यासामपां ता दासपत्नीः अत एवाहिगोपाः स हि वृत्रो गोपा रक्षको
यासां ताः गोपनं नाम तच्छंदेन यथा न प्रवहंति तथा निरोधनं एतदेव स्पष्टीक्रियते अपो निरुद्धा अतिष्ठन्निति तत्र दृष्टांतः। पणिनेव गावः
पणिनामकोऽसुरः गाः अपहृत्य बिले स्थापयित्वा बिलद्वारमाच्छाद्य यथा निरुद्धवांस्तथेत्यर्थः। अपां यद्बिलं प्रहरणद्वारं अपिहितं वृत्रेण रुद्ध
मासीत् तद्बिलं प्रवहणद्वारं वृत्रं जघन्वान् हतवानिंद्रः अप ववार अपवृतमकरोत् वृत्रकृतमपां निरोधकं परिहृतवान्। अत्र यास्कः। दासप

२९

त्नीर्दासाधिपत्न्यो दासो दस्यतेः। अश्व्यो वारो। सृके वज्रे सृकः सृकः सृक इति वज्रनामसु पठितत्वात् देवो दीप्यमानः सर्वोत्कृष्टः
एकः अद्वितीयः वृत्रः यद्यदा त्वां प्रत्यहन् प्रतिकूलत्वेन प्रहृतवान् तत्तदानीं त्वं अश्व्यो वारः अश्वसंबंधी वालो भवः यथा अश्वस्य वालो
कोनायासेन मक्षिकादीन्निवारयति तद्वत् वृत्रमगणयित्वा निराकृतवानित्यर्थः। किंच गाः पणिनाः प्रहृताः त्वमजनयः जितवान् हे शू
र त्वोमपि युक्तेंद्र सोममजयो जितवान्। तथा च तैत्तिरीया आमनंति। त्वष्टा हतपुत्र इत्यस्मिन्ननुवाके। स यज्ञवेशसं कृत्वा प्रासहा सोमम
पिबदिति। सप्त सिंधून्। इमं मे गंगे इत्यत्राम्नातं गंगाद्याः सप्तसंख्याका नदीः स्रवितवे सर्वे प्रवाहरूपेण गंतुं अवासृजः त्यक्तवान् वृत्रकृ
तं प्रवाहनिरोधं निराकृतमित्यर्थः। नास्मै विद्युन्न। इंद्रं निषेद्धुं वृत्रो यां विद्युतं यदीं मायया निर्मितवान् ते सर्वे अप्येनं निषेद्धुं अशक्ताः। सोयमर्थो
नेन मंत्रेणोच्यते। अस्मै इंद्रार्थं निर्मिता विद्युन्न सिषेध न प्राप्नोत्। तथा तन्यतुः गर्जनं यां मिहं सेचनं यां ह्रादिं अकिरत् वृत्रो विक्षिप्तवान्सा
पि ह्रादिर्न सिषेध ह्रादुनिं च अशनिं मध्यां वृत्रः प्रयुक्तवान् सापि न सिषेध। इंद्रश्चाहिश्च इंद्रवृत्रावपि यत् यदा युयुधाते युद्धं कृतवंतौ तदा
नीं विद्युदादयो नैव प्राप्ता इति पूर्वत्रान्वयः। उत अपि च मघवा धनवानिंद्रः अपरीभ्यः अपराभ्यः अन्यासामपि वृत्रनिर्मितानां सकाशा
द्विजिग्ये न विशेषेण जितवान्। अहेर्यातारं। हे इंद्र जघ्नुषो वृत्रं हतवतः तव हृदि चित्ते यदि भीः अगच्छत् न हतवानस्मीति बुध्या भयं प्रादु
र्यात् तर्हि अहेर्वृत्रस्य यातारं हंतारं कं अपश्यः त्वत्तोन्यं कं पुरुषं दृष्टवानसि। तत्र दृष्टांतः। श्येनो न श्येननामको बलवान् पक्षीव दूरगमनात्
भयमासीदिति गम्यते तद्भयं मा भूदित्यभिप्रायं त्वद्दूरगमनं ब्राह्मणे समाम्नातं। इंद्रो वै वृत्रं हत्वा नास्तृषीति मन्यमानः पराः पराव
तो गच्छदिति। इंद्रो यातः। वज्रबाहुरिंद्रः शत्रौ हते सति निःसपत्नो भूत्वा यातो गच्छतो जंगमस्य अवसितस्य एकत्रावस्थितस्य स्थावरस्य शम
स्य शांतस्य शृंगरहितस्य न प्रहरणादौ प्रवृत्तस्य अश्वगर्दभादेः शृंगिणः शृंगोपेतस्य उग्रस्य महिषबलीवर्दादेश्च राजा भूत्। स इत् स एवेंद्रः
चर्षणीनां मनुष्याणां राजा भूत्वा क्षयति निवसति। ता तानि पूर्वोक्तानि जंगमादीनि सर्वाणि परिभूय प्राप्तवान्। तत्र दृष्टांतः। अरान्न नेमिः
यथा रथचक्रस्य परितो वर्तमानो नेमिः अरान् नाभौ कीलितान्काष्ठविशेषान्व्याप्नोति तद्वत्॥ ॥इति श्रीसायणीयाचार्यविरचिते माधवीये

(81)

वेदार्थप्रकाशे ऋक्संहितायां प्रथमाष्टके द्वितीयोऽध्यायः समाप्तः ॥ ॥ कृष्णार्पणमस्तु ॥ ॥ हरिः ॐ ॥ ॥ एतायामेति ॥ देवाः प
रस्परमेवं कथयंति । देवा गव्यंतः पणिनामकेनासुरेणापहृता अस्मदीया गाः प्राप्तुमिच्छंतो यूयमेत आगच्छत । युष्माभिः सहिते वयं इं
द्रं गवान्वेषणे उपायाम प्राप्नवाम । स चेंद्रो अनामृणः हिंसकरहितः सन् अस्माकं देवानां प्रमतिं गोलाभेन हर्षयित्वा प्रकृष्टां बुद्धिं
सुवृधाति सुष्ठु वर्द्धयति । आद् अनंतरं स इंद्रः अस्य रायः धनस्य गवां गोरूपस्य संबंधि परं केतुं उत्कृष्टं ज्ञानं नो अस्माकं आ विदाव् र्जते अ
धिकं प्रापयति ॥१॥ उपेदहं । यः इंद्रः स्तोतृभ्यः स्तोतॄणामनुष्ठातॄणामनुग्रहार्थं यामन् नूनं दीप्यते ऋत्विग्भिः सह प्रशस्तिं पुरुहूत्ये स्तितेराल्
तव्यो भवति तमिंद्रं महः अनुष्ठानात् उपेत् उपप्राप्तितु पाम्नोम्येव । किं अयं अनु उपमेभिः उपमानस्थानीयैरुत्तमैरर्कैः स्तोत्रैः सह नमस्यन्
पूजयन् ईदृशमिंद्रं धनदानप्रदं अप्रतीतं अप्रतीगतं बलिभिरतिरस्कृतमित्यर्थः इंद्रप्राप्तौ दृष्टांतः । जुष्टां पूर्वैः सेवितां वसतिं स्वकीयपु
नीडरूपां निवासभूमिं श्येनो न यथा वेगवान्पक्षी स्वकीयस्थानं प्रति आदरेण धावति तद्वदहमिंद्रं वरपाप्तान्तोमि ॥२॥ नि सर्वसेन ॥ सर्व
सेनः कृत्स्नसेनायुक्तः इषुधीन् बाणानामाधारभूतानि निषंगान्यषक्त नितरां पृष्ठभागे संयोजितवान् । अर्यः स्वामी निरूप इंद्रः पस्य देवस्य वृषि
असुरेणापहृता गाः प्रदातुकामयते तस्य देवस्य गृहे ता गाः सभजति सम्यक् प्रापयति । हे प्रवृद्धे प्रकृष्टवृद्धियुक्तेंद्र भूरि बामं प्रभूतं गोरूप
धनं चोक्षूयमाणः अस्मभ्यं प्रयच्छन् अस्मदधि अस्मासु पणिर्मा भूः व्यवहारी मा भूः । गवां मूल्यं नायाचयस्वेत्यर्थः ॥३॥ वधीर्हि । हे इं
द्र धनिनं बहुधनोपेतं दस्युं चोरं घनेन कठिनेन वज्रेण पृथीहि खेहतवान् खलु । धनिनं वाजसनेयिनोपि स्पष्टमामनंति वृत्रस्यांतः सर्वे
देवाः सर्वाश्च विद्याः सर्वाणि हवींषि चासन्निति । उपशाकेभिः समीपवर्तिभिः शक्तियुक्तैर्मरुद्भिः सहितो भूत्वा एकश्चरन् प्रहर्तुं स्वयमेक
एव गच्छन् यद्यपि मरुतः समीपे वर्त्तंते तथापि ते प्रोत्साहयंत्येव न तु वृत्रं प्रहरंति । प्रहर्त्तुं स्वयमेक एव । तथा च ब्राह्मणं । मरुतो हवै नं
नाजहुः ॰ति छंतेति । धनोरधि इंद्रसंबंधिनो रधि इंद्रसंबंधिनो धनुषः उपरि विषुणक् विविधं नाना उद्दिश्य प्रयाविषुः कुर्वत ते वृत्रानु
चराः अयज्वान विविधं नागच्छन् नागमन् अयज्वानः यज्ञविरोधिनः सनकाः एतन्नामकाः विप्रानुचराः प्रेति मीयुः मरणं प्राप्ताः ॥४॥

३०

॥ पराचित् ॥ हे इंद्र ते वृत्रानुचराः शीर्षा स्वकीयानि शिरांसि पराचित् पराङ्मुखान्येव कृत्वा ववृजुः । गतबलाः कीदृशास्ते अयज्वानः स्व
यं यागरहिताः प्रत्युत यज्वभिः यागानुष्ठातृभिः स्पर्धमानाः हे हरिनामकाश्वयुक्तास्थातः स्थितियुक्त युद्धे पलायनरहित उग्र शौर्ययुक्तेंद्र
यद्यदा दिवोंतरिक्षाद्रोदस्योः द्यावापृथिव्योः सकाशाच्च अव्रतान् व्रतरहितान् वृत्रानुचरान् निरधमः निःशेषेण धमनं कृतवानसि । तदानीं त्व
दीयधमनवायुना नुनाः संनोवहृजुः पूर्वत्रान्वयः ॥५॥ ॥ अयुयुत्सन् ॥ अनवद्यस्य गर्हणीयदोषरहितस्येंद्रस्य सेनां प्रति अयुयुत्सन् वृत्रस्या
नुचरा योद्धुमैच्छन् । तदानीं नवग्वाः नवनीतगतयः स्तोतयचरिताः यद्वा अंगिरसां सत्रमासीनानां नवभिर्मासैरवाप्तफलाः उत्थितास्तेषां
नवग्वा इति संज्ञा । नवग्वासः सुतसोमास इत्यादिषु तथाभिधानात् । क्षितयो अंगिरःप्रभृतयो क्षितयः कृष्टयः इति तन्नामसु पाठात् । अया
तयं तं युद्धार्थमिंद्रं नानाविधैर्मंत्रैः प्रोत्साहितवंतः इंद्रं योद्धुं गतेः संतिनिर्गताः तेनेंद्रेण निराकृताः वृत्रानुचराः श्रितमंतः स्वकीयां शक्तिं ज्ञाप
यंतः इंद्रादिंद्रस्य सकाशात् प्रवद्भिः प्रवणैः पलायितुं सुशकैर्मार्गैः परायं दूरे गतवंतः । तत्र दृष्टांतः । वृषायुधः वृषेन सेचनसमर्थेन पुंस्त्वयुक्तेन शू
रेण सह युद्धमकुर्वंतो वध्रयो न पुंसकाः इव निसर्गषंडा व ध्रिश्चेत्यादिस्मृतिषु । ते यथा प्रबलेन दूरे निराकृता भवंति तद्वत् ॥६॥ त्वमेतान् । हे इंद्र त्वं
रुदतो रोदनं कुर्वतो जक्षतो भक्षणं हसनं वा कुर्वतश्च एतान्विविधान् पिशाचानुचरान् रजसः अंतरिक्षस्य परभागे । रज इत्यंतरिक्षवाची ॥
लोका रजांस्युच्यंत इत्युक्तत्वात् । अयोधयः युद्धमकरोः युद्धेन मारितवानित्यर्थः । दस्युं उपपश्य इतारं वृत्रं दिवः द्युलोकादानीय उत्कर्षे
णावादहः दग्धवानसि । वृत्रं सपरिवारं विनाश्य ततः ऊर्ध्वं सुन्वतः सोमाभिषवं कुर्वतः स्तुवतः स्तोत्रं कुर्वतो यजमानस्य शंसं स्तुतिं प्रावः
प्राकर्षेण रक्षितवानसि ॥७॥ चक्राणासः । ते वृत्रानुचराः पृथिव्या भूमेः परीणहं आच्छादनं सर्वतो व्याप्तं चक्राणासः कुर्वाणाः हिरण्येन
हिरण्ययुक्तेन मणिना कंठबाह्वादिगतेन मण्यादिभरणेन शुंभमानाः हिन्वानासः वर्धमानाः संतो वर्त्तंते तथाविधान्वृत्रानुचरान् सूर्येणा
दित्येन पर्यदधात् परिवेष्टितान् अवहितान् अकरोत् । तथा च ब्राह्मणं । आदित्यो ह्येवोद्यन् पुरस्ताद्रक्षांस्यपहंति ॥८॥ परि यदिंद्र ॥ हे इंद्र यद्यदा रोदसी
उभे द्युलोकभूलोकावुभौ महित्वा स्वदीयेन महिम्ना विश्वतः सीं सर्वतः परिगृह्य पर्यबुभोजीः परितो भुक्तवानसि । तदानीं त्वममन्यमानान् मंत्रार्थ

मनुष्यातुं अशक्तान पि केवलं पाकान् यजमानान् अभिमन्यमानैः अस्मदीया एते यजमाना रक्षणीया इत्यभिमानं कुर्वद्भिः अस्मभि
र्मंत्रैः दस्युं चोरं शत्रादिकं यमसुरं निरधमः निःसारितवानसि। धमतिर्गतिकर्मेति यास्कः॥७॥ न ये दिवः। ये जलविशेषाः दिवो द्युलोकात् पृ
थिव्याः अंतं भूमेः स्थानं न आपुः न प्राप्ताः मेघरूपमापन्नेन वृत्रेण निरुद्धत्वात् अत एव भूमिप्राप्त्यभावात् धनदां धनप्रदां भूमिं मायाभिः सस्यो
पकारादिभिः कर्मभिः न पर्यभूवन् परितो न व्याप्ताः जलपानसस्याभिवृद्ध्याद्युपकारेण न चक्रुरित्यर्थः। तदानीमयमिंद्रो मेघभेदनाय वज्रं
युजं स्वहस्तयुक्तं चक्रे। तेन तमो ज्योतिषा द्योतमानेन वज्रेण तमोपि अंधकाररूपा मेघान् गाः गमनशीला नूनमुदकानि निरधुक्षत्। निःशेषेण दु
ग्धवान् मेघं भित्वा जलं वृष्टवानित्यर्थः॥८॥ अनुस्वधां। आपो जलानि अस्य इंद्रस्य स्वधामन्नं त्यादिरूपं मनुलक्ष्य अक्षरन् मेघाद्भ्रष्टा
अभवन्। तदानीं अयं वृत्रो नाव्यानां नावा तरणयोग्यानां अपां मध्ये आ समंतात् अवर्धत वृद्धिं प्राप्तः। प्रभूते जले वर्तमानेपि न ममार किंत
र्हि वृद्ध एव तदानीमिंद्रः सध्रीचीनेन सह गच्छता मनसा युक्तं तं वृत्रं ओजिष्ठेन अतिबलेन हन्मना हननसाधनेन वज्रेण अभि द्यून् कति
चिद्दिवसान् अभिलक्ष्याहं तेषु दिवसेषु हतवान्। जलमध्ये पतितस्यापि वृत्रस्य मनो यत्रेंद्रोस्ति तत्रैव सह गच्छति तादृशमपि ज्ञात्वा इंद्रो हतवा
नित्यर्थः॥९॥ न्याविध्यत्। इलीबिशस्य इलाया भूमेः बिले शयानस्य वृत्रसंबंधीनि दृढानि बिशस्येति यास्कः। दृळ्हानि दृढानि असुरेण निरू
ढानि प्रभूतान्युदकानि इंद्रो न्यविध्यत् नितरां विद्धवान्। यद्वा। दृढानि प्रबलानि सेन्यानि नितरां विद्धवान्। तत ऊर्ध्वं शृंगिणं गोमहिषा
दिशृंगसमानैः आयुधैः रूपेतं शुष्णं जगतः शोषकं वृत्रं व्यभिनत् विविधं ताडितवान्। हे मघवन् धनयुक्तेंद्र त्वं यावत्तरः यावत्ते ओजोस्ति या
वदोजः यावद्बलमस्ति तेन सर्वेण युक्तस्त्वं पृतन्युं पृतनां युद्धमिच्छंतं शत्रुं वृत्रं वज्रेण अवधीः हतवानसि॥१२॥ अभि सिध्मः। सिध्मः इंद्रस्य सिध्मग
साधको वज्रः शत्रून् अभि इंद्र वैरिणो अभिलक्ष्य अजिगात् गतवान्। जिगातिर्गतिकर्मसु पाठात्। स च इंद्रः तिग्मेन तीक्ष्णेन श्रेष्ठेन नाना
युधेन तेन वज्रेण पुरो वृत्रस्य पुराणि भेत्तुं विविधं भिंनं वानूनं ततः स इंद्रो वज्रेण स्वकीयेन वृत्रं समसृजत्। संयोजितवान्। संयोज्य च
शत्रून् आदानः वृत्रं हिंसन् स्वां मतिं स्वकीयां हर्षोत्तां बुद्धिं प्रातिरत् प्रकर्षेण वर्धितवान्॥१३॥ आवः कुत्सं। हे इंद्र कुत्समेतं नामकं गोत्रप्रवर्तकमृषि

२१

प्रावः रक्षितवानसि। यस्मिन् कुत्से चाकन् स्तुतिं कामयमानो वर्त्तते तं कुत्समिति पूर्वेणान्वयः। तथा दशद्युं एतन्नामकं दशद्युं दिद्युतदीप्य
मानमृषिं प्रावः प्रकर्षेण रक्षितवानसि। कीदृशं युध्यंतं स्वकीयैः शत्रुभिः सह युद्धं कुर्वंतं तं वृषभं गुणैः श्रेष्ठं शफच्युतः। त्वदीयाश्वस्य शफोच्युतो
रेणुर्धूलिः द्यां द्युलोकं नक्षत् अश्नोति व्याप्नोति। श्वैत्रेयः श्वित्र्याख्यायाः योषितः पुत्रः पुरा शत्रुभयात् जले मग्नः सन् त्वदनुग्रहात् नृषह्याय नृभिः पुरुषैः
सोढव्याय ऐषितः तस्मात् जलात् उत्थितवान्॥१४॥ आवः शमं। हे मघवन् धनवन् इंद्र श्वित्र्यं श्वित्र्याः पुत्रं पूर्वोक्तं पुरुषं आवः रक्षितवानसि किम
र्थं क्षेत्रजेषे शत्रुभिः सह युद्धवेलायां क्षेत्रप्राप्त्यर्थं कीदृशं शमं त्वदीयपरिपालनेन निवृत्त्याकुलतां परित्यज्य शांतं वृषभं गुणैः श्रेष्ठं तुग्र्यासु
गांजलेषु गतं मग्नं नित्यर्थः। तुग्र्या अप्सु रेति उदकनामसु पठितत्वात्। अत्रास्माभिः सह युद्धे ज्योक् चिरकालं न पि तस्थिवांसः अवस्थिताः संतः अ
क्रन् वैरिणः शत्रुयंतमकुर्वन् शत्रूयतां शत्रुं आसनइच्छतां तेषां अधरा वेदना निकृष्टानि दुःखानि लंमकः कुरु तु अधशब्दो अंतरिक्षवचनः तत्र
भवन्तु ग्याः॥१५॥ त्रिश्चिन्नः। हे नवेदसा अश्विना मेधाविनौ अश्विनौ देवौ नवेदा इति मेधाविनाम। नवेदाः कविर्मनीषीति लितं नामसु पठितत्वात्।
तादृशौ युवां त्रिश्चित् त्रिवारमपि अद्यास्मिन् कर्मणि नोस्मदर्थं भवतम् आगच्छतं अत्र त्रिरिति वचनं सवनत्रयापेक्षितं आदरातिशयद्योतनो
र्थं वा त्रिपत्याहि देवाद्यूति स्मृत्यंतरात् युवा युवयोः यामो गमनसाधनभूतो रथः विभुर्व्याप्तः उत अपि च रातिर्दाने विभुरिति शेषः युवयोर्युक्तयोरु
भयोर्यत्रं हि परस्परं नियमरूपः संबंधः कदाचिदपि नापैतीत्यद्ध। युव युवभौ मनीषिभिर्मेधाविभिः ऋत्विग्भिः मनीषीति मेधाविनामसु मनीषीने
धावीति तं नामसु पठितत्वात्। अभ्यायंसेन्या अभितो नियंतव्यौ अनुग्रहवशात् तदधीनौ भवतम्॥१६॥ त्रयः पवयः। मधुवाहने मधुद्रव्याणां ना
नाविधखाद्यानां वहनेन युक्ते अश्विनोः संबंधिरथे पवयः वज्रसमाना दृढाश्चक्रविशेषास्त्रयः त्रिसंख्याकाः संति इत्। इदं च चक्रत्रयसद्भा
वप्रकारं विश्वे सर्वे देवाः सोमस्य चंद्रस्य वेनां कमनीयां भार्यां अनुलक्ष्य यात्रायां विदुः जानंतीति पदार्थः सोमस्य वेनया सह विवाहः तदानीं नाना
विधखाद्ययुक्तं चक्रत्रयोपेतं प्रोष्ठे रथमारूढा अश्विनौ गच्छतः इति सर्वे देवा जानंतीत्यर्थः। तस्य रथस्योपरि स्कंभासः स्तंभा अर्थं हस्तालंबनभूता
स्तयादित्यर्थः। हे अश्विनौ युवां तादृशेन रथेन नक्तं रात्रौ त्रिर्यथिः त्रिवारं गच्छथः। तदा दिवा दिवसे पित्रि यथिः त्रिवारं गच्छथः। रात्राव है

निचरथमारुह्य पुनःपुनः क्रीडतमित्यर्थः ॥७॥ समाने अहन्। हे अश्विना वश्विनौ देवौ युवं युवां युभौ समाने अहन् एकस्मिन्ननुष्ठानदिने
त्रिरवद्यगोहन त्रिवारमनुष्ठानगतानां दोषाणां संवरकारिणौ भवतं। अद्यास्मिन्दिने यज्ञं यज्ञगतं हविः मधुना मधुरसेन त्रिर्मिमिक्षतं त्रि
वारं सिंचतं। किंच दोषा उषसः अश्वरात्रिर्दिवसाश्च रात्रिषु दिवसेषु नो रंतर्येन वाजवतीर्बलकारिणीरिषोऽन्नानि अस्मभ्यं पिन्वतं सिंचतं प्र
यच्छतमित्यर्थः ॥७॥ त्रिर्वर्तिर्यातं। हे अश्विना युवां त्रिर्वर्तिर्यातं अस्मदीयवर्तनसाधनं गृहं त्रिर्यातं त्रिवारं प्राप्नुतं। तथा अनुव्रते अस्मदनु
कूलव्यापारयुक्ते जने त्रिर्यातं त्रिवारं तदनुग्रहाय गच्छतं। त्रिः सुप्राव्ये त्रिवारं सुष्टु प्रकर्षेण भवद्भ्यां रक्षणीये प्रवर्तमाने मानस्मात्रे धेवत्रि
भिरेव प्रकारैः शिक्षतं पुनः पुनरनुशासनमुपदेष्टव्यमित्यर्थः। तथा नांद्यं नंदनीयं संतोषकरं फलं त्रिर्वहतं प्रापयतं। अस्मे अस्मासु पृक्षो
न्नं त्रिः पर्वतं त्रिवारं प्रयच्छतं। तत्र दृष्टांतः। अक्षरेवाक्षराण्युदकान्यक्षरात्स्रोतः सलिलं नाम नामसु पाठात्। तानि पर्जन्यो यथा प्रयच्छति तद्वत् ॥
७॥ त्रिर्नो रयिं। हे अश्विना युवं नोऽस्मान्रयिं धनं त्रिर्वहतं त्रिवारं गापयतं तद्देवताता देवताता देवैर्युक्ते कर्मणि त्रिः त्रिवारमागच्छतमिति
शेषः। उत पिप्रतं धियो। उत धियोऽस्मद्बुद्धीः त्रिवारं रक्षतं सौभगत्वं सौभाग्यं त्रिर्वहतमिति शेषः। उत पित्वं अश्रवांस्यन्नानि नोऽस्मभ्यं त्रिर्व
हतं। वां युवयोः संबंधि त्रिचक्रं चक्रत्रययुक्तं रथं सूर्यस्य दुहिता पुत्री दुहिता दुर्हिता दूरेहिता इति यास्कः। सा आरूढवती देवता ॥७॥
त्रिर्नो अश्विना। हे अश्विना नोऽस्मभ्यं दिव्यानि द्युलोके भवानि भेषजा औषधानि त्रिर्दत्तं तथा पार्थिवानि पृथिव्यां संभवान्यौषधानि त्रि
र्दत्तं अद्भ्यः अंतरिक्षसकाशादपि औषधानि त्रिर्दत्तं आपः अंतरिक्षनाम आपः पृथिवी भूरिति तं नामसु पाठात्। शंयोरेतं नामक
स्य बृहस्पतिपुत्रस्य तेन शंयुं बार्हस्पत्यमकर्वथं इति ब्राह्मणांतरात्। तस्य संबंधिनमोमानं सुखविशेषं ममकाय सूनवे मदीयाय पुत्राय
दत्तं शुभस्पती शोभनस्यौषधजातस्य पालकौ युवां त्रिधातु वाते पित्ते श्लेष्मधातुत्रयप्रशमनविषयसुखं वहतं प्रापयतं ॥७॥ त्रिर्नो
अश्विना यजता। हे अश्विना दिवे दिवे दिनं दिनं दिवे दिवे इति द्विगुणं अहर्नामसु पठितं। यजता यष्टव्यौ युवां नोऽस्मदीयां पृथिवीं वेदरू
पां भूमिं परि सर्वतः प्राप्य त्रिधातु कुशत्रययुक्तं आस्तीर्णबर्हिषि अशोयतं त्रा मनं कुरुतं। हे रथ्या रथस्वामिनौ परावतः दूरान् तिस्रः

त्रिसंख्याका इष्टिकपाशुकसौमिकवेदीः गच्छतं। तत्र दृष्टांतः। स्वसराणि शरीराणि आत्मेव वातः यथा प्राणिनामात्मभूतः प्राणवायुः
तदीयानि शरीराणि गच्छति तद्वत् ॥०॥ त्रिरश्विना॥ सप्तमातृभिः इमं मे गंग इत्यादिमंत्रोक्ताः सप्तसंख्याकाः गंगाद्या नद्यो मातरः उत्पा
दिकाः येषां जलविशेषाणां ते सप्तमातरः। तैः सिंधुभिः स्यंदनस्वभावैर्जलैः वसतीवरीनामभिस्त्रिभिः सोमाभिषवः कृत इति शेषः। त
था चान्यत्र ब्राह्मणे समाम्नातं। अष्टौ कृत्वोऽभिषुणोति एकादश कृत्वो द्वितीयं। द्वादश कृत्वस्तृतीयं। आहावाः यथोक्तजलयुक्तस्य सो
मस्याधारभूताः कूपसंख्याकास्त्रयः त्रिंशत्संख्याकाः द्रोणकलशआधवनीयपूतभृदाख्यानिष्पन्ना इति शेषः। तेषु त्रिषु पात्रविशेषु
त्रेधा त्रिप्रकारैः सवनत्रयगतैः अविह्वलं सवनाख्यं हविः संपादितं द्रव्यं वर्तत इति शेषः। तिस्रः पृथिवीः उपरि त्रिभ्यः पृथिव्यादिलोके
भ्यः ऊर्ध्वप्रवाः। प्रवंतौ गच्छंतौ युवां दिवो नाकं द्युलोकसंबंधिनमादित्यं प्रक्षेते कीदृशं नाकं द्युभिः अहोभिः अक्तुभिः रात्रिभिश्च हितं स्थापितं।
अहनि सूर्य उदेति रात्रावस्तं गच्छतीत्येवमहोरात्राभ्यां सूर्योऽवस्थाप्यत इत्यर्थः ॥७॥ क्व त्री चक्रा। हे नासत्यावश्विनौ त्रिवृतः त्रिसंख्या
कैः त्रिभिरुपेतस्य भवदीयस्य रथस्य ईषाद्वयं पूर्वभागे संयुज्यते तस्य एका त्रिः पृष्ठभागे वियुज्यते तत्र कोणद्वयं संपद्यते ईदृशस्य रथ
स्य संबंधीनि त्री चक्रा त्रीणि चक्राणि क्व कुत्र स्थितानि इत्यस्माभिर्न दृश्यंते पेक्षाध विशेषाः सनीळाः नीळं गृहं सह नीडं रथस्योपरि
पवेशस्थानं तेन सह वर्तंत इति सनीळास्ते काष्ठविशेषाः बंधुरो नील बंधुना धारभूतास्त्रयः अक्षेण सहिते द्वे ईषे इत्येवं त्रिसंख्याका
क्व कुत्र स्थिता इति अस्माभिर्न ज्ञायंते वाजिनो बलवतो रासभस्य भवदीयाश्वस्थानीयस्य गर्दभस्य योगो रथेन योजनं कदा कस्मिन्काले
निष्पन्नमित्यस्माभिर्न दृश्यते येन चक्रत्रयनीडकाष्ठत्रयरासभयोजनसहितेन रथेन यतं अस्मदीयपज्ञस्थानं उपयाथः युवां प्रा
प्नुथः तादृशस्य रथस्येति पूर्वत्रान्वयः ॥ आ नासत्या। हे नासत्यावश्विनौ इह कर्मण्यागच्छतं। अत्रास्माभिर्हविर्हूयते युवां च मधुपे
भिर्मधुरद्रव्यपानयुक्तैः आसभिः भवदीयैरास्यैः मध्वो मधुरद्रव्याणि हवींषि पिबतं। सविता सूर्यः उषसः पूर्वमुषःकालात्पुरा युवयो

रश्विनोः संबंधिनं रथं त्रयाताम् घशार्थं इष्यति हि प्रेरयति । खलु कीदृशं चित्रं पूर्वैः कैश्च कृत्रपादिभिर्विचित्रं अक्षां जनसाधनेनोपेतं
गच्छतं । आ नासत्या त्रिभिः । हे नासत्या असत्येनानृतेन रहितौ अश्विना अश्विनौ देवौ युवां त्रिभिरेकादशैर्देवैः सो दिव्यैकादशैः स्येत्या
दिमंत्रप्रतिपादितैर्मंत्रैस्त्रिसंख्याकैरेकादशात्मकवर्गत्रयगतैर्देवैः सह मधुपेयं सोमपानात्मकमधुरद्रव्यपानमभिलक्ष्य इहास्मिं
देवयजनदेशे आ यातं आगच्छतं । आयुस्मदीयं मायुष्यं प्रतारिष्टं वर्धयतं रपांसि अस्मदीयानि पापानि निर्मृक्षतं निःशेषेण शोधयतं ॥
द्वेषद्वेषकर्तॄन् सेधतं प्रतिषेधतं । सचाभुवा अस्माभिः सहभवंतौ भवतं । आ नो अश्विना त्रिवृता ॥ हे अश्विना त्रिवृता रथेन अ
प्रतिहतगतित्वात् त्रिषु लोकेषु वर्तमानेन रथेन सह नोऽस्माकं अर्वाक् अभिमुखं सुवीरं शोभनैर्वीरैः पुत्रपौत्रादिभिरुपेतं रयिं धनं
आ वहतं आनीय प्रापयतं । अस्मदीयस्तुतिं शृण्वंतौ वा युवां अवसे अस्मद्रक्षणार्थं जोहवीमि आह्वयामि नोऽस्माकं वाजसातौ संग्रामे धा
जसातौ महाधन इति संग्रामनामसु पाठात् । वृधे वर्धमानाय च भवतं ॥ ह्वयाम्यग्निं ॥ स्वस्तये अस्माकमविनाशाय स्वस्तीत्यविनाशि
नाम यास्कः । प्रथममादौ अग्निं ह्वयामि इहास्मिन्कर्मण्येवं अस्मद्रक्षणाय मित्रावरुणौ ह्वयामि जगतो जंगमस्य प्राणिजातस्य निवेश
नीं उपवेशनहेतुभूतां रात्रीं रात्रिदेवतां ह्वयामि जंगमाः सर्वे प्राणिनो दिवसे स्वस्वव्यापारान्कृत्वा स्वस्वगृहे रात्रावुपविशंतीति प्र
सिद्धं ऊतये अस्मद्रक्षार्थं सवितारं देवं ह्वयामि ॥ आ कृष्णेन रजसा ॥ सविता सूर्यः कृष्णेन रजसा कृष्णवर्णेन लोकेन कृष्णं कृष्यतेर्नि
कृष्टो वर्ण इति यास्कः । लोका रजांस्युच्यंत इति च । अंतरिक्षलोको हि सूर्यगमनात् सुराकृष्णवर्णो भवति तेनांतरिक्षमार्गेण आवर्तमानं पु
नः पुनरागच्छन् अमृतं देवं मर्त्यं मनुष्यं च निवेशयन् स्वस्वस्थाने व्यवस्थापयन् उपघान्नं मरणरहितं प्राणं मर्त्यं मरणरहितं शरीरं च नि
वेशयन् तथा चारण्यकारे अमृतो मर्त्येना सयोनिरिति एतस्य मंत्रभिगतस्य व्याख्याने रूपं ब्राह्मणे पथोक्ता थे विगम्यते मर्त्यानि
हीमानि शरीराणि अमृतैषा देवतेति यथोक्तरूपेणोपेतः सविता देवो भुवनानि सर्वान् लोकान् पश्यन् वेक्ष्यमाणः प्रकाशयन्नित्यर्थः

२२

हिरण्ययेन स्वर्णनिर्मितेन रथेन आ याति अस्मत्समीपमागच्छति ॥ याति देवः । देवो दीप्यमानः सविता प्रवता प्रवणवता मार्गेण याति
गच्छति । तथा उद्वता उत्कर्षेण ऊर्ध्वदेशयुक्तेन मार्गेण याति उदयानंतरं आमध्याह्नं ऊर्ध्वो मार्गः ततउपरि आसायं प्रवणो मार्ग इति विवेकः ॥
तथा यजतो यष्टव्यः स देवः शुभ्राभ्यां श्वेताभ्यां हरिभ्यां अश्वाभ्यां याति देवयजनदेशं गच्छति सविता देवो विश्वा दुरितानि सर्वाणि दुरितान्य
पबाधमानो विनाशयन् परावतः दूरदेशात् परावत इति दूरनामसु पठितत्वात् तादृशाद् द्युलोकात् आ याति यागदेशं आगच्छति ॥ अभीवृ
तं कृशनैः । सविता रक्षमोस्थात् आस्थितवान् आरूढवानित्यर्थः । कीदृशं अभीवृतं अभितो वर्धमानं कृशनैर्विश्वरूपं हिरण्येन नानारू
पं कृशनं लोहमिति सुवर्णनामसु पाठः । क्वचित्स्वर्णनिर्मितगजपंक्तिः क्वचिन्मनुष्यपंक्तिः एवं बहुरूपं हिरण्यशम्यं अश्वानां स्कंधे धुरथ
योजनवेलायां नियंतुं प्रक्षेप्यमाणाः शंकवः शम्याः ताः स्वर्णमय्यो रथे वर्तंते बृहंतं प्रौढं कीदृशः सविता यजतो यष्टव्यः चित्रभानुः विविध
रश्मियुक्तः कृष्णा रजांसि अंधकारयुक्तान् पापरूपान्वा लोकानुद्दिश्य तमोनिवारणार्थं तत् विषीवलं स्वकीयं प्रकाशरूपं दधानः ॥ विज
नान् श्यावाः धृतं नामकाः सूर्यस्याश्वाः श्यावाः सवितुरिति निघंटौ सूक्तत्वात् । ते च शितिपादश्वेतैः पादैरुपेताः हिरण्यप्रउगं शमीषयोरग्रं
युगं बंधनस्थानं प्रउगमित्युच्यते । तत्स्वर्णमयं तद्युक्तं रथं वहंतो जनान्प्राणिनो व्यख्यन्विशेषेण प्रकाशितवंत इत्यर्थः । शश्वत्सर्वदा विशः
प्रजा दैव्यस्य इतरदेवसंबंधिनः सवितुः प्रेरकस्य सूर्यस्य उपस्थे समीपस्थाने तस्थुः स्थितवत्यः न केवलं प्रजाः किंतु हि विश्वा भुवनानि सर्वे च
लोकाः प्रकाश्यसूर्यसमीपे तस्थुः ॥ तिस्रो द्यावः । द्यावः स्वर्गोपलक्षितः प्रकाशमाना लोकास्तिस्रः त्रिसंख्याकाः संति तत्र द्वौ लोकौ स
वितुः सूर्यस्य उपस्था समीपस्थाने वर्तेते द्युलोकभूलोकयोः सूर्येण प्रकाशितत्वात् एका मध्यमा भूमिर्मंतरिक्षलोकः यमस्य भुवने पि
तृपतेर्गृहे विराषाट् विराङ्गंतॄन्सहते प्रेताः पुरुषा अंतरिक्षमार्गेण यमलोकं गच्छतीत्यर्थः । अमृतो अमृतानि चंद्रनक्षत्रादीनि जला
नि वा अधि तस्थुः सवितारमधिगम्य स्थितानि । तत्र दृष्टांतः रथ्यमाणिं न रथाद्बहिरक्षछिद्रे प्रक्षिप्तः कीलविशेषः आणिरित्युच्यते रथ
संबंधिनमाणिमधिगम्य यथा रथस्तिष्ठति तद्वत् यस्तु मानवः तत् सवितारं पंचिकेत जानाति स मानवः इहास्मिन् विषये वदतु कथयतु

केनापि वक्तुमशक्यः सवितुर्महिमेत्यर्थः॥ ७॥ वि सुपर्णः॥ सुपर्णः शोभनपतनः सूर्यस्य रश्मिः सुपर्णा इति पंचदश रश्मिनामानीति तं नामसु
पठितत्वात्। अंतरिक्षोपलक्षितान् त्रीन् लोकान् यस्थानानि व्यख्यत् विशेषेण व्यापितवान् प्रकाशितवान्। कीदृशो रश्मिः गभीरवेपाः गंभीरकंपनः
रश्मेः प्रकंपनं चलनं केनापि द्रष्टुमशक्यमित्यर्थः। असुरः सर्वेषां प्राणदः तथा चान्यत्राम्नायते सर्वेषां भूतानां प्राणानिरापोदेति सुनीथः
सुनयनः शोभनप्राणः पि मार्गे प्रकाशेनाभीष्टं देशं प्रापयतीत्यर्थः। तादृशो रश्मियुक्तः सूर्यः इदानीं रात्रौ क्व कुत्र वर्त्तते तदेतद्रहस्यं कश्चिके
त को जानाति न कोपीत्यर्थः। अस्य सूर्यस्य रश्मिः कतमां द्यां ततान कं द्युलोकं रात्रौ व्याप्तवान् एतदपि को जानाति॥ ७॥ अष्टौ व्यख्यत्॥ पृथि
व्याः संबंधिनीः अष्टौ ककुभः प्राच्याद्याश्चतस्रो दिशः आग्नेय्याद्याश्चतस्रो विदिश इत्येवमष्टौ दिशः व्यख्यत् सविता प्रकाशितवान् तथा योज
ना प्राणिनः स्वस्वभागेन योजयितॄन् धन्व अंतरिक्षोपलक्षितान् त्रीन् त्रीन् त्रिसंख्याकान् पृथिव्यादिलोकान् सप्त सिंधून् गंगादिनदीः समुद्रा
न्वा सविता व्यख्यत्। हिरण्याक्षः हितरमणीयचक्षुर्युक्तः हिरण्मयाक्षो वा सविता देवः आगात् इहागच्छतु किं कुर्वन् दाशुषे हविर्दत्तवते
यजमानाय वार्याणि वरणीयानि रत्नानि दधत् प्रयच्छन्॥ ७॥ हिरण्यपाणिः सविता॥ हिरण्यपाणिः सुवर्णमयहस्तयुक्तः यद्वा यजमानेभ्यो
दातुं हिरण्यं हस्ते धृतवान्। विचर्षणिः विविधद्रष्टान् युक्तः विचर्षणिः पश्यतीत्यर्थः। विचर्षणिर्विश्वचर्षणिस्तं नामसु पाठात्। उभे द्यावापृ
थिवी अंतः उभयोर्लोकयोर्मध्ये ईयते गच्छति अमीवां रोगादिबाधां अप बाधते सम्यक् निराकरोति तथा सूर्यं वेति। यद्यपि सवितृसूर्ययो
रेकदेवतात्वं तथापि मूर्त्तिभेदेन गंतृगंतव्यभावः। कृष्णेन तमसः कर्षकेन निवर्त्तकेन रजसा तेजसा द्याम् अभि आकाशं ऋणोति सर्वतो व्याप्नो
ति द्यावापृथिवी दिवश्च पृथिव्यामिति। दशामीमृचमाह॥ ७॥ हिरण्यहस्तः॥ हिरण्यहस्तः असुरः प्राणदाता सुनीथः सुष्ठु नेता प्रशास्य इत्य
र्थः। सुनीथः पाक इति प्रशस्यनामसु पाठात्। सुमृळीकः सुष्ठु सुखयिता। स्ववान् धनवान् वृद्धिमुखः कर्मदेशो यातु। किंचायं देवः प्रति
दोषं प्रतिरात्रि गृणानः स्तूयमानः अस्थात् स्थितवान् किं कुर्वन् रक्षसः बाधकत्वेन रक्षणनिमित्तभूतान् रक्षांसि तद्वन्निस्तानि ति या

३८

तुधानान् असुरान् अपसेधन् निराकुर्वन्॥ ७॥ ये ते पंथाः॥ हे सवितः ते तव ये पंथाः मार्गाः पूर्व्यासः पूर्वसिद्धाः अरेणवः धूलिरहिताः अंत

रिक्षे सुकृताः सुष्ठु संपादिताः सुगेभिः सुखं गंतुं शक्यैः तेभिः पथिभिः तैर्मार्गैः आगत्य अस्मिन् दिने नोऽस्माकं रक्ष च पालनमपि कुरु। तथा हे देव नो
ऽस्मान् अनुशास्तॄन् अधिब्रूहि च देवानामग्रे धिकत्वेन कथय च॥ प्रवो यह्वं॥ हे ऋत्विग्यजमाना देवयन्तीनां देवान् कामयमानानां पुरूणां बहूनां विशां प्रजा
रूपाणां वो युष्माकम् अनुग्रहाय यह्वं महांतं। यह्वः ववक्षिथेति महन्नामसु पाठात्। अग्निं सूक्तेभिर्वचोभिः सुकृतरूपैः वाक्यैः प्र ईमहे प्रकर्षेण याचा
महे। ईमहे याच्ञाकर्मसु पाठः। अन्य इत्। अन्ये ऋषयः यमग्निं सीं सर्वतः ईळते स्तुवंति। तमग्निमिति पूर्वत्रान्वयः। जनासः अग्निं जना
सः अनुष्ठातारो जनाः सहोवृधं बलस्य वर्धयितारं अग्निं दधिरे धृतवंतः। हविष्मंतः हविर्युक्ता वयं हे अग्ने ते त्वां विधेम परिचरेम। विधतिः
परिचरणकर्मा। विधेम सपर्यतीति परिचरणकर्मसु पठितत्वात्। वाजे अन्नेषु संत्य दानशील हे अग्ने स त्वमद्यास्मिन् दिने इह कर्मणि नोऽस्मा
न्प्रति सुमनाः शोभनमनस्कः अविता रक्षिता भव॥ ७॥ प्र त्वा दूतं॥ हे अग्ने होतारं होमनिष्पादकम् आह्वातारं वा विश्ववेदसं सर्वज्ञं त्वं देवानां
दूत्ये प्रवृत्तं। अग्निर्वै देवानां दूत आसीदिति श्रुत्यंतरात्। तादृशं त्वां वृणीमहे प्रकर्षेण वरणं कुर्मः। महो महतः सतः नित्यं वर्त्तमानस्य ते त
व अर्चयो दीप्तयः विचरंति विविधं प्रचरंति भानवः त्वदीयाः रश्मयो दिवि द्युलोके स्पृशंति तत्रस्थान् प्राणिनः प्रकाशयंतीत्यर्थः॥ विश्ववेदसं॥ ७॥
अग्ने
देवासस्त्वा॥ हे वरुणादयः त्रयो देवाः प्रत्नं पुरातनं त्वां समिंधते सम्यक् दीपयंति यो मर्त्यो मनुष्यो यजमानः ते तुभ्यं दाशत् हविर्दत्तवान् स य
जमानः त्वया सहायभूतेन विश्वं सर्वं धनं जयति॥ ७॥ मंद्रो होता गृहपतिः॥ हे अग्ने त्वं मंद्रो हर्षहेतुः होता देवानाम् आह्वाता विशां यजमानरूपाणां
प्रजानां गृहपतिः गृहस्य पालको दूतो देवदूतोऽसि। त्वे त्वयि विश्वा सर्वाणि व्रता कर्माणि संगतानि। व्रतं कर्वरमिति कर्मनामसु व्रतशब्दः पठितः॥
पृथिव्यादयो देवाः ध्रुवाणि स्थिराणि यानि कर्माणि अकृण्वत कृतवंतः पृथिवी धारयति पर्जन्यो वर्षति सूर्यः प्रकाशयति तान्येतानि त्वयि सं
गतानि पूर्वत्रान्वयः। त्वे इदग्ने॥ हे यविष्ठ युवतम अग्ने सुभगः सौभाग्ययुक्ते त्वयि एव विश्वं सर्वं हविराहूयते सर्वतः प्रक्षिप्यते स त्वं नोऽस्मान्प्रति
सुमनाः शोभनमनस्को भूत्वा अद्यास्मिन् दिने उतापि च अपरं श्वः अपरं श्व इत्यादिकमुत्तरं कालं सर्वस्मिन्नपि काले नैरंतर्येण सुवीर्याणि शो
भनवीर्योपेतानि देवान् यक्षि यज। तं घेमित्था नमस्विनः॥ हे अग्ने नमस्विनः अन्नयुक्ता नमस्कारयुक्ता वा। नम आयुः सूनृतेति अन्ननामसु पाठात्।

नमः। शश्वत्स्यां नवा चित्तं ताहशाः यजमानाः स्वराजं सतो दीयमानं तं घृतमेव पूर्वे कृर्स सर्वगुणविशिष्टं त्वां इत्था अनेन प्रकारेण हविःप्रदानादिरूपेण उपासते ॥ मनुषो
मनुष्याः यजमानाः होत्राभिः सप्तभिर्वषट्कर्तृभिः सप्त होत्राः प्राचीर्वषट्कुर्वन्तीति श्रुत्यंतरात् ॥ अभितां समिधं तं सम्यग्दीपयंति। कीदृशा मनुष्याः स्त्रिधः शत्रून् अति तितिर्वां
सः अतिशयेन तरंतः ॥ ७ ॥ घ्नंतो वृत्रं ॥ हे अग्ने घ्नंतः तस्य सहायेन तं देवाः अपरंतः वृत्रं मतरं तीर्णवंतः ॥ तदनंतरं रोदसी द्यावापृथिव्यौ अपोनरिक्षं क्षयाय निवासार्थं उरु विस्तारो
यथा भवति तथा चक्रिरे अपशब्दोन्तरिक्षवाची आपः पृथिवीति तंनामसु पठितत्वात्। कण्वे कण्वनामके महर्षौ वृषा कामानां वर्षिता द्युम्नी धनवानाहुतः सर्वतो होमयुक्तश्च भुव
त्।भवतु। तत्र दृष्टांतः। गविष्टिषु गोविषयेच्छायुक्तेषु संग्रामेषु अश्वः कंदन् शब्दं कुर्वन् यथा भीष्टप्रापकस्तथेति शेषः ॥ ७ ॥ संसीदस्व महाँ असि ॥ हे अग्ने संसीदस्व बर्हिषि उपविश महानसि
गुणाधिको भवसि। देववीतमः अतिशयेन देवान्कामयमानः ॥ शोचस्व दीप्यस्व। हे प्रियमेध्य मेधार्ह प्रशस्य स्वेत्वरुषं गमनशीलं दर्शतं दर्शनीयं धूमं विशेषेण संपादय ॥ ७ ॥ यं त्वा देवासो ॥ हे
हव्यवाहन हविषो वाहक अग्ने मनवे मनोरनुग्रहार्थं देवासः सर्वे देवाः यजिष्ठं अतिशयेन पूज्यं यं त्वा दधिरे। यं त्वा इह देवयजनदेशे दधुः धृतवंतः मेधातिथिः मेधातिथिर्युक्तः कण्वः एतन्नामको महर्षिः। यंत्वा
धनस्पृतं धनेन प्रीणयितारं कृतवान् दधुः इति शेषः। तथा वृषा यं इंद्रोयं सां दधे सः तं संसीदस्वेति पूर्वत्रान्वयः। व्याकरणं दधुः लिट्युसि किति आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः। यजिष्ठ्येष्वृश्छांद
सुअश्वं दसीत्यगुणवचनस्यापि अतिशायिनि इष्ठनि रिष्टे मेयस्येति तलोपः। निवाद्या धुदात्तत्वं। हव्यवाहन ॥ ७ ॥ यमग्निं ॥ मेधातिथिः यागयोग्याः अतिथयः ऋत्विग्रूपा यस्य तादृशः काण्वऋषिः।
कृतादधि आदित्यादूर्ध्वं इत्ययमग्निम् इधे दीप्तवान् तस्याग्नेर्योगमनस्य आवारक्षयः यद्दीदयुः प्रकर्षेण दीप्यंते। तथा तमग्निमिमाः अस्माभिः प्रयुज्यमानाः ऋचो वर्धयंतीति शेषः। वयमपि तमग्निं वर्ध
यामसि तत्रैव वर्धयामः ॥ ७ ॥ रायस्पूर्धि ॥ हे स्वधावः अन्नवन् स्वधा अन्नं इति तन्नामसु पाठात्। अस्माकं स्यो धनानि पूर्धि पूरय देहि इति विवृतियास्कः। हे अग्ने ते तव देवेषु आप्यं प्रापणीयं सख्यं अस्ति हि वि
धतेः खलु। तच्च सख्यस्य अवणीयस्य वाजस्य अन्नस्य राजसि ईश्वरो भवसि स त्वं नोस्मान्मृळय सुखय। महान् गुणैरधिकोसि ॥ ७ ॥ ऊर्ध्व ऊषुणः ॥ हे यूप यद्यूपात्मकदारुनिष्ठाग्ने नोस्माकं ऊतये रक्षणा
य ऊर्ध्वः उन्नतः तिष्ठ। तत्र दृष्टांतः। सविता देवो न यथा। सूर्यो देवः उन्नतस्तिष्ठति तद्वत्। ऊर्ध्वः उन्नतः सन् वाजस्यान्नस्य सनिता दाता भवसि तस्माद् अंजिभिः आज्येन यूपमंजद्भिः वाघद्भिः यज्ञवहद्भिः ऋत्विग्भिः
सह विह्वयामहे अन्नदानाय त्वां विशेषेण ह्वयामः। तस्मादन्नस्य दाता भवेति पूर्वत्रान्वयः ॥ ७ ॥ ऊर्ध्वो नः ॥ हे यूप यद्यूपनिष्ठाग्ने ऊर्ध्वः उन्नतः सन् नोस्मान् केतुना ज्ञानेनांहसः पापान्निपाहि नितरां पालय विश्वमत्रि
णं सर्वभक्षकं राक्षसं संदह सम्यग्भस्मीकुरु नोस्मान् ऊर्ध्वान् उन्नतान् कृधि कुरु चरथाय लोके चरणाय जीवसे जीवनाय च नोस्माकं दुवो धनं च देवेषु विदाः लंभय ॥ ७ ॥ पाहि नो अग्ने ॥ हे अ
ग्ने अस्मान् रक्षसः बाधकाद्राक्षसादेः पाहि पालय तथा अराव्णः धनादीनामदातुः धूर्तेः हिंसकात् पाहि। उत रिषतो हिंसकाद्व्याघ्रादेः सकाशात् पाहि उत वा अथवा जिघांसतो हंतुमिच्छतः शत्रोः सकाशा
त्पाहि ॥ ७ ॥ घनेव विष्वक् ॥ हे तपुर्जंभ तपमानरश्मियुक्ताग्ने अराव्णः अस्मभ्यं देयस्य धनस्य अदातॄन् वैरिणः विष्वक् सर्वतो वि जहि विशेषेण मारय। तत्र दृष्टांतः। घना इव यथा कठिनेन दृढ
पाषाणादिना भांडानि भंगं करोति तद्वत्। यो नोस्मान् परि द्रुह्यति द्रोहकारी निर्भर्त्सनादिना बाधते यश्चान्यो मर्त्यः मनुष्यः शत्रुः अक्तुभिः रात्रिभिः परि शिशीते तनूकरोति। अ
स्मान्प्रहरतीत्यर्थः। स रिपुः भर्त्सनप्रहरकारी द्विविधोपि शत्रुर्नोस्मान् प्रति ईशत ईश्वरः शक्तो मा भूत् ॥ ७ ॥ अग्निर्वव्ने ॥ अग्निर्देवः सुवीर्यं शोभनपुत्रोपेतं धनमुद्दिश्य प्रवत्ययाचितः

३९

सोग्निः कण्वाय महर्षये सौभगं शोभनधनादिरूपं भाग्यं प्रायच्छदिति शेषः। तथा मित्रा अस्मिन्मित्राणि प्रावत्प्रकर्षेण रक्षितवान् उत अपि
च मेध्यातिथिं मेधयोग्यैरतिथिभिरुपेतं ऋषिं प्रावत्। तथा उपस्तुतं अन्यमपि स्तोतारं यजमानं सातौ धनादिदाननिमित्तं प्रावदिति शेषः।
।७। अग्निना तुर्वशं ॥ अग्निना सहावस्थिता तुर्वशनामकं यदुनामकं उग्रदेवं नामकं च राजऋषीन्प्रावत उ दूरदेशाद्वा महे आह्वयामः स
योग्निः नववास्त्वं नामकं बृहद्रथनामकं तुर्वीतिनामकं च राजर्षीन् नयत् इहानयतु कीदृशोग्निः दस्यवे सहः अस्मदुपद्रवहेतोश्चोरस्य अभि
भविता नयत् णीञ् प्रापणे। लेट्यडागमः। इतश्च लोपः इकारलोपः। नववास्त्वं नववास्तु यस्यासौ नववास्तुः। छंदसीत्यनुवृत्ते रमि पूर्वत्वा
भावे यणादेशः। बृहद्रथं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। एकोनविंशतिं तृचमाह ।७। नि त्वामग्ने। हे अग्ने ज्योतिः प्रकाशरूपं त्वा त्वां बहु
विधाय जनाय मनुः प्रजापतिः निदधे देवयजनदेशे स्थापितवान्। हे अग्ने त्वं ऋतजातः ऋतेन यज्ञेन निमित्तभूतेन जातः उक्षितो हविर्भिः
स्तर्पितः सन् कण्वे तन्नामके महर्षौ दीदेथ दीप्तवानसि। यमग्निं कृष्टयो मनुष्याः कृष्टय इति मनुष्यनामसु पठितत्वात् नमस्यंति नम
स्कुर्वंति स त्वमिति पूर्वत्रान्वयः ।७। त्वेषासो अग्ने ॥ अग्नेरर्चयो ज्वालास्त्वेषासो दीप्ताः अमवंतो बलवंतः भीमासो भयंकराः अंतः अतीतये अ
स्माभिः प्रत्येतुं न शक्या इति शेषः। हे अग्ने रक्षस्विनो बलवंतः यातुमावतः यातुधानान् रूक्षान् सदमित् सर्वदैव संदह सम्यक् भस्मीकुरु तथा विश्वं
सर्वं अत्रिणं भक्षितं अस्मान्बाधकं शत्रुं संदह ।७। त्वेषासः। त्विषी दीप्तौ। पचाद्यच्। चित इत्यंतोदात्तत्वं अमवंतः। अम रोगे। अमति रुजति
इत्यमो बलं पचाद्यच्। वृषादित्वाद्युदात्तत्वं तदेषामस्तीति मवंतः प्रतीतये तादौ च निति कृत्यतौ इति गते प्रकृतिस्वरत्वं। रक्षस्विनः रक्षांसि अनेन तिरस्को बलं
इत्यमो बलं... रक्षः सव्यापाराः यातुमाः आतोनुप
करणे अस्कन् अस्मायामेधेति मत्वर्थीयो विनिः। यातुमावतः। यातवो यातनाः तन्निमित्तो निर्ममत इति राक्षसव्यापाराः यातुमाः आतोनुप
सर्गे कः ।७। क्रीळं वः शर्धो मारुतं। मरुद्भ्यः पुरो ब्राह्मसकं पालं नित्यस्यामिष्टो। हे कण्वाः कण्वगोत्रोत्पन्नाः महर्षयः यद्वा मेधाविनः ऋत्वि
जः वो युष्मदर्थं मारुतं मरुत्संबंधि रूपं शर्धो बलं अभि प्रगायत। अभितः प्रकर्षेण स्तुध्वं। कीदृशं शर्धः क्रीळं विहरणशीलं अनर्वाणं भ्रातृव्यरहि
तं अत एव अत्यंतरेभ्यो भ्राजमानं रथेशुभं स्वकीयरथे अवस्थि
तं। अत एव अस्तृतरेभ्रालणेन मंत्रांतरमेवं व्याख्यातं। अनर्वाणं प्रेहीत्याह। भ्रातृव्यो वा अर्वा भ्रातृव्यापनुत्यायेति। रथेशुभं स्वकीयरथे अवस्थि
तं। ...गोभमानं। क्रीळं क्रीड विहारे पचाद्यच्। शर्धः शृधु प्रसहने शर्धयत्यनेन शत्रून् इति। शर्धो बलं असुन्। निवाद्याद्युदात्तत्वं ।७। ये पृषतीभिः ये मरु
द्भ्यः शोभमानं। क्रीळं क्रीडविहारे चापे घञ्। शर्धः शृधु प्रसहने शर्धयत्यनेन शत्रून् इति। शर्धो बलं असुन्।

तः पृषत्यादिभिः साकं स्वभानवः स्वकीयदीप्तियुक्ताः ॥ अजायंत इति संपंनाः ॥ पृषत्याः बिंदुयुक्ताः मृग्यो मरुद्वाहनभूताः पृषत्यो मरुतामिति
निघंटावुक्तत्वात् ॥ ऋष्टयः आयुधानि वश्याः शब्दविशेषाः परकीयसेनाभीतिहेतवः ॥ वाशी वाणीति वाङ्नामसु पठितत्वात् ॥ अंजयो लंकारानि
तान्सुमद् इति विशेषः ॥७॥ इहेव ॥ येषां मरुतां हवेषु स्थिताः कशाः स्वस्ववाहनताडनहेतवो ॥ यद्वदान्य द्वदंति यं ध्वनिं ध्वनिं कुर्वंति तं ध्वनिं इहैवात्रैव
स्थित्वा शृण्वे शृणोमि स ध्वनिविशेषो यामन् संग्रामे चित्रं विविधं शौर्यं नृंजते नितरां करोति ॥ ऋंजतिः प्रसाधनकर्मेति यास्कः ॥७॥ प्र वः शर्धाय ॥
हे ऋत्विजः वो युष्माकं संबंधिने शर्धाय प्रसहनशीलाय घृष्वये शत्रुघर्षणयुक्ताय त्वेषद्युम्नाय यशसे द्युम्नं द्योततेर्यशो वान्नं वेति यास्कः ॥ शु
ष्मिणे बलवत्सु शुष्मिशुष्मिनिति बलनामसु पाठात् ॥ ब्रह्म ॥ एवंभूताय मरुद्गणाय हविर्लक्षणं मंत्रमुद्दिश्य प्रगायत स्तुध्वं कीदृशं ब्रह्म ॥ देवत्तं देवैर्दत्तं ॥
देवत्तनुग्रहात्लब्धं ॥७॥ प्रशंसा गोषु ॥ मरुन्मारुतं धृष्णि सहनशीलं तेजो यदस्ति तत्प्रशंस हे ऋत्विक् सभूहरसस्य गोक्षीररूपस्य संबंधितत्ते
जः अंभे मुखे उदरे वा वृधे वृद्धं मरुतां शंस ॥७॥ को वो वर्षिष्ठः ॥ दिवश्च द्युलोकस्यापि ग्मश्च भूलोकस्यापि गौः ग्मेति भूनामसु पठितत्वात् ॥ नदत्
धूतयः कंपकारिणः हे नरः नेतारः मरुतः वो युष्माकं मध्ये कः प्रबल इति प्रश्नः ॥ वर्षिष्ठः श्रेष्ठः ॥ नि वो यामाय ॥ हे मरुतः वो युष्माकं यामाय गमना
र्थं मानुषः गृहस्वामी कश्चिन्मनुजः निदध्रे गृहदार्ढ्यार्थं स्थूलं स्तंबं निक्षिप्तवान् ॥ भवदीयगमनेन चालितं गृहं पतिष्यतीति भीत्या तं निवारणा
य दृढं स्तंबं प्रक्षेपे ॥ कीदृशाय यमाय उग्राय तीव्राय मन्यवे चालनार्थं भूमिं मन्यमानाय युज्यते हि भवद्गमनात् क्षीतिः यतो भवद्भ्याचालितः पर्व
तो बहुविधो पर्वयुक्तो गिरिः शिखरिलिहीतकं गच्छेत् ॥७॥ येषामज्मेषु ॥ हे मरुतः येषां युष्माकं यामेषु गमनेषु अज्मेषु क्षेपकेषु सत्सु पृथि
वी भूमिः रेजते कंपते ॥ तत्र दृष्टांतः ॥ जुजुर्वाँ इव विश्पतिः ॥ यथा वयो हानिरोगादिना जीर्णः प्रजापालको राजा वैरिभयात्स कंपते तद्वत् ॥ अज्मेषु ॥
७॥ स्थिरं हि जानं ॥ एषां मरुतां जानं जन्मस्थानं आकाशं स्थिरं हि चंचलरहितं खलु ॥ मरुन्मरुतां जननी स्थानीया द्याकाशात् ॥ वयः पक्षिणो निरेत
वे निर्गंतुं समर्था भवंतीति विशेषः ॥ तादृशाद्याकाशाद्वज्जन्मेति मरुतां स्तुतिः ॥ यद्यस्मात्कारणात् शवः व भवदीयं बलं अनुक्रमेण सीसर्वत ॥ दिना
तद्दिने न द्यावापृथिव्योर्विभज्य वर्त्तते ॥ अतो भवदीयं जानं स्थिरं हीति पूर्वत्रान्वयः ॥७॥ उदु त्ये सूनवः ॥ त्ये पूर्वप्रकृता गिरः सूनवः वाचः उत्पादकाः मरु
तः वायवो हि ताल्वोष्ठादि संचरतो वाचमुत्पादयंति ॥ अज्मेषु स्वकीयेषु गमनेषु सत्स्व काष्ठाः अपः आपो पिकाष्ठा उच्यंते क्रोशस्थिता भवंतीति

३५

उत्तु उत्कर्षेणैव ॥ अत्नत ॥ अतनिषत ॥ विस्तारितवंतः ॥ उदकं विस्तार्य तत्पानार्थं वाश्राः भारवे पिता गाः अभिज्ञु जान्वभिमुखं यथा भवति त
था यातवे गंतुं प्रेरितवंत इति विशेषः ॥७॥ त्यं चिद्घा ॥ त्यं चित् प्रसिद्धं घोमेघः तमपि मेघं वामभिः स्वकीयगमनैः प्रच्यावयंति मरुतः प्रकर्षेण गमयंति ॥
कीदृशं अयामोपेतं पृथुं तिर्यग्विस्तृतं ॥ मिहो नपातं ॥ सेचनीयस्य जलस्य न पातयितारं वृष्टिं अकुर्वंतमित्यर्थः ॥ अमृध्रं केनाप्यहिंस्यं ॥७॥ मरुतो
यद्ध वो बलं ॥ हे मरुतः यद्यस्मादेवं कारणाद्वो युष्माकं बलमस्ति ॥ अस्मादेव कारणाज्जनान् प्राणिनः अचुच्यवीतन स्वस्वव्यापारेषु प्रेरयत ॥
तथा गिरीन्मेघानचुच्यवीतनेति प्रेरयत ॥७॥ यद्ध यांति मरुतः ॥ हे मरुतः आशुभिः वेगवद्भिः स्वकीयैर्वाहनैः यद्ध यदा खलु मरुतो यांति गच्छंति
तदानीं अध्वन् मार्गे सर्वतः संब्रुवते असंभूयध्वनिं भवद्यं कुर्वंति ॥ येषां मरुतां संबंधिनं शब्दं यः कश्चिच्छृणोति ॥७॥ प्रयात शीभं ॥ हे मरुतः आशुभिः
वेगवद्भिः स्वकीयैः वाहनैः शीभं नाम शीघ्रं तत् क्षिप्रमिति क्षिप्रनामसु पाठात् ॥ प्रयात प्रकर्षेण गच्छत ॥ कण्वेषु मेधाविषु अनुष्ठातृ
षु वो युष्माकं दुवांसि परिचर्याणि संति ॥ तत्रैषु तेष्वेव परिचारकेषु कण्वेषु मादयाध्वै तृप्ता भवत ॥ पंचदशी मृचमाह ॥७॥ अस्ति हि ष्मा ॥
हे मरुतः वो युष्माकं मदाय तत्पर्याप्तं अस्ति हि ष्म अस्माभिः प्रयुज्यमानं हविर्विविधं खलु एषां युष्माकं रेत्यभूता वयं स्मसि ष्म विधा महे ख
लु जीवसे जीवितं विश्वं चिदायुः सर्वमप्यायुः प्रयच्छेति विशेषः ॥७॥ कद्ध नूनं ॥ हे मरुतः कद्ध कदा खलु नूनं अवश्यं हस्तयोर्दधिध्वे यूयमस्मान् हस्ते धा
रयथ ॥ तत्र दृष्टांतः ॥ पिता पुत्रं न हस्तयोः यथा लोके पिता हस्तयोः स्वकीयं पुत्रं धारयति तद्वत् ॥ कीदृशा मरुतः कधप्रियः स्तुतिप्रीताः वृक्त
बर्हिषः वृक्तं छिन्नं बर्हिर्दर्भो येषां मरुतां यजमानायु हे मरुतः तथाविधाः क्व नूनं कद्ध ॥ हे मरुतः नूनं इदानीं क्व यूयं कुत्र स्थिताः क कदा युष्मा
कं अर्थं अरणं देवयजनदेशे गमनं विलंबमाकुरुत इत्यर्थः ॥ दिवो गंत द्युलोकात् गच्छत पृथिव्या न गतं भूलोकात् मा गच्छत वो युष्मान् क्व रण्यंति दे
याः वयजनरूपा याः पृथिव्या अन्यत्र कुत्र शब्दयंति ॥ तत्र दृष्टांतः ॥ गावो न यथा गावो रण्यंति शब्दयंति तद्वत् ॥७॥ क्व वः सुम्ना ॥ हे मरुतो वो यु
ष्माकं संबंधीनि नव्यांसि नवतराणि सुम्ना प्रजायस्करूपाणि भूतानि प्रजावेध ग्रावः स्मनमि तिश्रूयंतेरात् क्व कुत्र वर्तंते ॥ तथा सुविता
शोभनानि प्राप्यानि मुक्तादीनि भवदीयानि क्व कुत्र वर्तंते विश्वानि सर्वाणि सौभगा सौभाग्यरूपाणि गजाश्वादीनि क्वो कुत्र वा वर्तंते ॥ भवदी

ये:सुम्नादिभिः सर्वैः सहेहागंतव्यमित्यर्थः॥७॥ यद्यूयं पृश्निमातरो मर्तासः स्यातन। स्तोता वो अमृतः स्यात्॥ हे पृश्निमातरः पृश्निनामकधेनुपुत्राः म
रुतो यूयं यद्यपि मर्तासो मनुष्याः स्यातन भवेत तथापि वो युष्माकं स्तोता यजमानः अमृतः स्यात्। देवो भवेत्। मर्तासो मनुष्याः स्यातन भवेत त
थापि वो युष्माकं स्तोता यजमानः अमृतः स्यात् देवो भवेत्॥ मा वो मृगो न यवसे। हे मरुतो वो युष्माकं जरिता स्तोता जोष्यः अप्रीयो
मा भूत्। तत्र दृष्टांतः। मृगो न यवसे। यथा तृणे भक्षणीये मृगः कदाचिदपि असेव्यो न भवति किंच सर्वदा तृणं भक्षयति तद्वत्। किंच स स्तोता य
मस्य पथा यमलोकसंबंधिमार्गेण मा गात् मा गच्छतु तस्य मरणं माभूदित्यर्थः॥ मो षु णः॥ हे मरुतः नो अस्मान् निर्ऋतिः रक्षोजातिः देवता दु
र्हणा वधीत् सर्वथा वधमा काषीत्। कीदृशी। परा परा उत्कृष्टात् उत्कृष्टा अतिबलेत्यर्थः। अत एव दुर्हणा केनापि निहंतुं दुःशका सा निर्ऋतिः तृष्णया स
ह पदीष्ट पततु अस्मदीयात् गच्छ बाधिका निर्ऋतिः विनश्यत्वित्यर्थः॥ सत्यं त्वेषा पदीति। धन्वंश्चिन्मरुदेशे रुद्रियासः रुद्रेण पालितत्वात् तदीया
मरुतः आ सर्वतः अवातां वायुरहितां मिहं वृष्टिं कृण्वंति कुर्वंति। तदेतत् सत्यं। कीदृशाः रुद्रियासः त्वेषा दीप्ताः अमवंतो बलवंतो मरुतां रूपा
लनमाख्यानेषु प्रसिद्धं॥७॥ वाश्रेव विद्युदिति। वाश्रेव शब्दयुक्ता प्रसूतवत्सा नवती धेनुरिव विद्युन्मिमाति शब्दं करोति मिमातिः शब्दक
र्मेति विद्युद्गर्जनं प्रसिद्धम्। माता धेनुः वत्सं न वत्समिव सिषक्तु इष्यं विद्युन्मारुतः सेवते सिषक्तिः सेवनार्थः सिषक्तु सचते इ
ति सेवमानस्येति यास्कोक्तत्वात्। यद्यस्मात्कारणात् देषां मरुतां संबंधीनि वृष्टिः असर्जि गर्जनसहिते विद्युत्काले वृष्टिर्भवति तस्माद्विद्यु
तो मरुत्सेवनमुपमानं वाश्रा इव दिवा चिदिति हे मरुतः उदवाहेन उदकधारिणा पर्जन्येन मेघेन तमः पुमांसा पदिवा चिदहन्यपि तमः कृण्वंति अं
धकारं कुर्वंति यद्यदा पृथिवीं भूमिं व्युंदंति विशेषेण क्लेदयंति तदानीमतिवृष्टिकाले तमः कुर्वंतीति पूर्वेणान्वयः। अध स्वनादिति मरुतां सं
बंधिनः स्वनादध्वने गर्जनरूपादनंतरं पार्थिवं पृथिवीसंबंधि विश्वं सद्म सर्वं गृहं आसमंतात् अरेजत अकंपतेति शेषः। तथा मानुषाः गृहवर्तिनो
मनुष्याः अपि प्रारेजंत प्रकर्षेण कंपितवंतः॥७॥ मरुतो वीळुपाणिभिरिति॥ हे मरुतो यूयं वीळुपाणिभिः दृढहस्तैः सहिताः संतः रोधस्वती
रनुकूलयुक्ता नदीरनुलक्ष्य अखिद्रयामभिः अखिद्रगमनैः यात गच्छतैव। स्थिरा व इति। हे मरुतः वो युष्माकं नेमयो रथचक्रवलयाः स्थिराः

३८

संतु। तथा रथाः अश्वासः अश्वाश्च स्थिराः संतु। अभीशवः अंगुलयः अभीशवः दीधितय इति तन्नामसु पाठात्। सुसंस्कृताः अश्वबंधनरज्जु
परिग्रहणे स्वलंकृताः सावधानाः संतु॥७॥ अच्छा वदेति। हे ऋत्विक्समूह तना तनेन पा देवतास्वरूपप्रकाशयत्या वाचा ब्रह्मणस्पतिं मंत्रस्य हवि
र्लक्षणस्यान्नस्य पालकं मरुद्रूपं अग्निं दर्शतं दर्शनीयं दर्शनीयं मित्रं न मित्रमिव जरायै स्तोतुं अच्छ आभिमुख्येन वद ब्रूहि॥७॥ मिमीहि श्लो
कमिति। हे ऋत्विक्समूह आस्ये स्वकीयमुखे श्लोकं स्तोत्रं मिमीहि निर्मितं कुरु। तच्छ्लोकं ततनः विस्तारय। तत्र दृष्टांतः। पर्जन्य इव यथा मेघः
वृष्टिं विस्तारयति तद्वत्। उक्थं शस्त्रयोग्यं। गायत्रं गायत्रछंदस्कं गाय पठ॥७॥ पंचदशीमृचमाह। वंदस्वेति। हे ऋत्विक्संघ मारुतं मरुत्संबंधिनं ग
णं समूहं वंदस्व नमस्कुरु स्तुहि वा। कीदृशं गणं त्वेषं दीप्तं पनस्यं स्तुतियोग्यं। अर्किणं अर्कैर्मंत्रैरुपेतं। अस्मे अस्माकं इह अस्मिन्कर्मणि वृद्धा अस
न्मरुतः वृद्धा भवंतु॥७॥ प्र यद्वित्थेति। हे धूतयः स्थावरादीनां कंपनकारिणो मरुतः यद्यदा मानं मननीयं शुष्मं बलं परावतः दूरात् आरे परावत इ
ति दूरनामसु पाठात्। इत्था अस्मादंतरिक्षात् अस्यथ यूयं प्रास्यथ भूमौ प्रक्षिपथ। तत्र दृष्टांतः। शोचिर्न तेज इव यथा सूर्यस्य तेजोंतरिक्षाद्भूमौ
प्रक्षिप्यते तद्वत्। तदानीं कस्य यजमानस्य क्रत्वा क्रतुना यूयं संगच्छध्वं। कं यजमानमुद्दिश्य पाथ देवयजनदेशं गच्छथ। कं ह कं यजमानमनुगृह्णी
थेति शेषः॥७॥ स्थिरा व इति। हे मरुतः वः आयुधा युष्माकमायुधानि पराणुदे शत्रूणामपनोदनाय स्थिराणि भवंतु। उत अपि च प्रतिष्कभे शत्रूणां
प्रतिबंधाय वीळु संतु दृढानि संतु। युष्माकं तविषी बलं पनीयसी अतिशयेन स्तोतव्यं भवतु। अस्मासु छद्मधारिणो मर्त्यस्य मनुष्यस्य शत्रोर्मा
बलं भवतु॥७॥ परा ह यदिति। हे नरो नेतारो मरुतो यद्यदा स्थिरं वस्तु पराहथ वृक्षादिकं पराहपनं कुरुथ। गुरु पाषाणादिकं गुरुत्वोपेतं वर्तयथ प्रेरयथ त
दानीं पृथिव्याः संबंधिनो वनिनो वनवतो वृक्षान्वियाथन वियुज्य मध्ये गच्छथ। अरण्यगतानां मध्ये यस्य कस्यापि वृक्षस्य भग्नत्वादितरवृक्षाणां प
रस्परवियोगेन प्रौढो मार्गो भवति। तथा पर्वतानामाशाः पर्वतपार्श्वदिशः वि आथन वियुज्य गच्छथ॥७॥ नहि व इति। हे रिशादसः शत्रुहिंसकाः मरु
तः अधि पृथिव्यां लोकस्योपरि वो युष्माकं शत्रुर्नहि विविदे न च बभूव। तथा भूम्यामपि शत्रुर्न बभूव। हे रुद्रासो रुद्रपुत्राः मरुतः युष्माकं नेको नूनं
च शत्रोः संख्यानां युजा योगेन परस्परं केनमयेन आधृषे वैरिणां सर्वतो धर्षणाय तविषी बलं नूचित् क्षिप्रमेव तनासु विस्तृता भवतु॥७॥ प्र वेपयंति।
पर्वतान्नोरुहिमवदादीन्प्र वेपयंति मरुतः प्रकर्षेण प्रकंपयंति। वनस्पतीन्वटाश्वत्थादीन् वि विंचंति परस्परं वियुक्तान्कुर्वंति। हे मरुतो देवासो देवाः

सर्वया विशा प्रजया सवितापूयं प्रो आरत प्रकर्षेण सर्वतो गच्छत। तत्र दृष्टान्तः। दुर्मदा इव यथा मदोन्मत्ता स्वेच्छया सर्वतः क्रीडन्ति तद्वत्॥ ७॥ ८॥ उ
पो रथेष्विति। हे मरुतः रथेषु भवदीयेषु पृषतीः बिन्दुयुक्ताः उपसामीप्येन अयुग्ध्वं योजितवन्तः। प्रष्टिः एतत्संज्ञको वाहनत्रयमध्यवर्ती मृगविशेषः लो
हितः मृगाणां तत्संज्ञा तिलोहितवर्णः। वहति रथं यन्ति। वो युष्माकं यामाय पृथिवी चित् अन्तरिक्षमपि अश्रोत् आभिमुख्येन आशृणोत्। अनुजानी
तीत्यर्थः। पृथिवीत्यन्तरिक्षनाम। पृथिवी भूः स्वयंभ्विति तन्नामसु पाठात्। मानुषाः भूलोकवर्तिनः पुरुषाः अबीभयन्त। स्वयं भीताः सन्तो अन्येषां भी
तिमुत्पादितवन्तः॥ ७॥ आ वो मक्ष्विति। हे रुद्राः रुद्रपुत्राः मरुतः तनाय कं अस्मदीयपुत्रार्थं मक्षू शीघ्रं वो युष्मदीयमवो रक्षणं आवृणीमहे। सर्वतः प्रार्थ
यामहे। मक्ष्विति क्षिप्रनामसु पाठात्। पुरा पूर्वस्मिन्काले कमार्तेभ्यो अवसा अस्मदीयरक्षणेन निमित्तेन यूयं प्राप्तवन्तः। इत्था अनेन प्रकारेण
विभ्युषे भीतियुक्ताय कण्वाय मेधाविने यजमानाय तदनुग्रहार्थं नूनं क्षिप्रं गत प्राभुत॥ ७॥ युष्मेषित इति। हे मरुतः यः कश्चिदभ्वः शत्रुः युष्मेषितः
युष्माभिः प्रेषितः मर्त्येषितः मनुष्यैरन्यैर्वा प्रेषितः सन् नः अस्मान् अति आ ईषते आभिमुख्येन प्राप्नोति तं शत्रुं शवसा। अनेन वियुयोत विभक्तं कुरुत।
तथा ओजसा बलेन वियुयोत युष्माकाभिः ऊतिभिः युष्मत्संबन्धिभिः रक्षणैश्च वियुयोत। युष्मेषितः युष्माभिरिषितः॥ ७॥ असामि हीति। असा
मि हि संपूर्णमेव यथा भवति तथा प्रयज्यवः प्रकर्षेण यष्टव्याः प्रचेतसः प्रकृष्टज्ञानयुक्ताः हे मरुतः कण्वं मेधाविनं यजमानं एतन्नामकं ऋषिं
याद ददाधारयत। हि यस्माद्यूयं कण्वनामकमृषिं धारितवन्तः तस्मात्कारणात् असामिभिः ऊतिभिः संपूर्णैः रक्षणैः नो अस्मान् अतिगन्त। आगच्छत। तत्र
दृष्टान्तः। वृष्टिं न विद्युतः यथा विद्युतो वृष्टिं गच्छन्ति तद्वत्। असामि सामि अर्धं न सामि असामि॥ ७॥ असाम्योज इति। हे सुदानवः शोभनदानोपे
ताः मरुतः असामि संपूर्णं ओजो बलं बिभृथ धारयथ। हे धूतयः कम्पनकारिणो मरुतः असामि संपूर्णं शवो बलं परिमन्यवे परिवृताय ऋषि
द्विषे ऋषीणां द्वेषं कुर्वते शत्रवे न हिनाशार्थं द्विषं द्वेषकारिणे हतास्य [illegible] इषुं न। यथा शत्रोरुपरि बाणं मुञ्चन्ति तद्वत्। अत्र निरुक्तं।
असामि। सामि प्रतिषिद्धं सामि स्यतेः। असाम्योजो बिभृथा सुदानवः असुसमाप्तं बलं बिभृथ कल्याणदाना इति॥ ९॥ उत्तिष्ठ हे ब्रह्मणस्पते ए

३८

तन्नामक देव उत्तिष्ठ। अस्मदनुग्रहार्थं त्वदीयनिवासादुत्थानं कुरु। देवयन्तो देवान्कामयमानाः वयं त्वा त्वां ईमहे याचामहे। सुदानवः शोभन
दानयुक्ताः मरुतः उपप्रयन्तु सामीप्येन प्रकर्षेण गच्छन्तु। हे इन्द्र त्वं च ब्रह्मणस्पतिना सह प्राशूः सोमस्य प्राशको भव। यद्वा राक्षस्य हिंसको भ

व॥ ७॥ त्वामिद्धीति। हे सहसस्पुत्र बलस्य बहुपालक ब्रह्मणस्पते पुत्रः पुरुत्रायते निपरणाद्वेति निरुक्तं। मर्त्यो मनुष्यो हिते शत्रुभिः प्रक्षिप्ते
धने निमित्तभूते सति त्वामित्वामेव उपब्रूते हि समीपं प्राप्य स्तौति खलु। तद्धनसंपादनाय प्रार्थयत इत्यर्थः। हे मरुतः यो धनार्थी मर्त्यः वो युष्मान्
ब्रह्मणस्पतिसहितान् आचके स्तौति। स मर्त्यः स्वश्व्यं शोभनाश्वयुक्तं वीरं शोभनवीरयुक्तं च धनं आदधीत धारयेत्॥ ७॥ प्रैतु ब्रह्मणस्पतिरिति। ब्र
ह्मणस्पतिर्देवः प्रैतु अस्मान्प्राप्नोतु। देवाः ब्रह्मणस्पत्यादयः देवाः वीरं शत्रुं निरृषेण दूरे प्रेरयन्तु। तं नर्यं मनुष्येभ्यो हितं पङ्क्तिराधसं ब्राह्मणोक्त
हविष्पङ्क्त्यादिभिः समृद्धं यज्ञं प्रति नो अस्मान् अच्छ आभिमुख्येन नयन्तु॥ ७॥ यो वाघत इति। यो यजमानो वाघते ऋत्विजे सूनरं सुष्ठु नेतव्यं वसु धनं
ददाति स यजमानो ब्रह्मणस्पतेः प्रसादादक्षितिक्षयरहितं श्रवो अन्नं धत्ते धारयति। तस्मै तादृशाय यजमानार्थं इळां एतन्नामकां मनोः पुत्रीं। इळा
वै मानवी यज्ञानुकाशिन्यासीदिति श्रुत्यन्तरात्। आ यजामहे। वयं ऋत्विजः सर्वतो यजामः। कीदृशीमिळां सुवीरां शोभनैर्वीरैर्भटैर्युक्तां सुप्रतूर्तिं
सुष्ठु प्रकर्षेण हिंसाकारिणीं अनेहसं केनाप्यहिंस्यां॥ ७॥ प्र नूनमिति। ब्रह्मणस्पतिर्देवः उक्थ्यं शस्त्रयोग्यं मन्त्रं नूनं अवश्यं प्रवदति होतृमुखे स्थितः
सन् ब्रूते। यस्मिन्मन्त्रे इन्द्रादयः सर्वे देवाः ओकांसि स्थानानि चक्रिरे। तादृशं सर्वदेवप्रतिपालकं मन्त्रमिति पूर्वत्रान्वयः॥ ७॥ तमिद्वोचेमेति। हे देवाः
ब्रह्मणस्पतिप्रभृतयः तमित्तमेव शं आदि सर्वदेवताप्रतिपादकं मन्त्रं विदथेषु यज्ञेषु वोचेम वयं ऋत्विजो ब्रवाम। कीदृशं शंभुवं सुखस्य भावयिता
रं अनेहसं अहिंसनीयं दोषरहितं। हे नरो नेतारो देवाः इमामस्माभिरुच्यमानां मन्त्रवाचं प्रतिहर्यथ। यूयं कामयध्वे चेत् तर्हि विश्वेत्सा वि
वामा वननीया वाक् वो युष्मानश्नवत् व्याप्नुयात्॥ ७॥ को देवयन्तमिति। देवयन्तं देवान्कामयमानं जनं को अश्नवत्। ब्रह्मणस्पतिव्यतिरिक्तः
को वा देवो व्याप्नुयात्। तथा वृक्तबर्हिषं अनुष्ठानाय छिन्नबर्हिषं यजमानं को नामान्यो देवो अश्नवत्। दाश्वान् हविर्दत्तवान् यजमानः पस्त्याभिः सु
ब्वैः ऋत्विग्भिः सह। प्र प्रास्थित देवयजनदेशं प्रति प्रस्थितवान्। अन्तर्वावत् अन्तःस्थितबहुधनोपेतं क्षयं। अन्तःस्थितपुत्रपौत्रादिभिर्युक्तं बहु
धनोपेतं क्षयं निवासस्थानं गृहं दधे धृतवान्भवति॥ ७॥ उप क्षत्रमिति। ब्रह्मणस्पतिर्देवः क्षत्रं बलं उपपृञ्चीत संपर्कं कुर्यात्। [illegible]
राजभिर्वरुणादिभिः सह हन्ति शत्रून् मारयति। भये [illegible] क्षेमं बिभर्ति। [illegible] निवासस्थाने धारयति। न तु पलायते। [illegible]
णो वज्री आयुधवतोऽस्य ब्रह्मणस्पतेः महाधने प्रभूतधननिमित्ते युद्धे यस्त प्रवर्तयिता अन्यः कोऽपि नास्ति। [illegible] प्रवर्तते इत्यर्थः। महाधन इति सं

३७

ग्रामनामा महाधने समीक इति तं नामसु पाठात्। तथा तत्कृतात् तरस्योल्लंघनस्य कर्त्ता अन्यः कोपि नास्ति। तथैवार्भे स्वल्पे युद्धेपि अन्यः प्रवर्त्त
यिता नास्ति॥७॥ तत्र प्रथमामृचमाह॥७॥ यं रक्षंतीति। प्रचेतसः प्रकृष्टज्ञानयुक्ता वरुणादयो देवाः यं यजमानं रक्षंति। स यजमानो नू चित् क्षि
प्रमेव दभ्यते दम्नोति शत्रुभिर्न हिनस्ति॥७॥ द्वितीयामृचमाह। यं बाहुतेवेति। यं यजमानं पिप्रति वरुणादयो देवा धनैः पूरयंति। तत्र दृष्टांतः। बाहुतेव।
स्वकीयो बाहुवर्गोपेक्षितं धनमानीय यथा पूरयति तद्वत्। तथा यं मर्त्यं मनुष्यं यजमानं रिपो हिंसकान् नू पांति रक्षंति स सर्वो यजमानः अरिष्टिः के
नाप्यहिंसितः सन् एधते वर्द्धते च॥ विदुर्गेति॥ राजानो वरुणादयः एषां स्वकीययजमानानां पुरा पुरस्तात् दुर्गा आगंतुदुःखानि शत्रुनगराणि
विघ्नंति विशेषेण नाशयंति तथा द्विषः शत्रूनपि विघ्नंति॥ तथा दुरिता यजमानसंबंधीनि दुरितानि तिरो नयंति विनाशयंति। सुगः पंथेति॥
हे आदित्यासः ऋतं यते यज्ञं गच्छते भवत्संमुखाय पंथाः मार्गः सुगः सुष्ठु गंतुं शक्यः॥ अनक्षरः कंटकरहितश्च अत्रास्मिन् मार्गे वः युष्मा
कं अवखादः अवमंतव्यः यद्वा अवखादो जुगुप्सितस्तद्विशेषो नास्ति तस्मादिहागंतव्यमित्यर्थः॥७॥ यं यज्ञमिति॥ हे नरो नेतारः आ
दित्याः यं यज्ञं ऋजुना पथा अविकलेन मार्गेण नयथ॥ पारं प्रापयथ॥ स यज्ञः वः धीतये युष्मत्पानाय उपभोगाय प्रनशत् प्राप्नोतु॥
सं रत्नमिति। हे आदित्याः सतादृशो भवद्भिरनुगृहीतो मर्त्यो मनुष्यो यजमानः अस्तृतः केनाप्यहिंसितः सन् रत्नं रमणीयं विश्वं वसु
सर्वधनं अच्छ आभिमुख्येन गच्छति प्राप्नोति तत अपि च त्मना आत्मना स्वेन सह तोकं अपत्यं संगच्छति॥७॥ कथा राधामेति॥ हे सखा
यः सखिभूताः ऋत्विजः मित्रादीनां त्रयाणां महिमरूपं भरः रूपे अलस्तदनुरूपं स्तोमं स्तोत्रं कथा केन प्रकारेण राधाम साधयाम॥ मा
नो घ्नंतमिति। हे मित्राद्या देवाः देवयंतं देवान्कामयमानं यजमानं यः शत्रुः अपपतितमपि शपंतं मा प्रतिवोचो भवद्भिरेव विचार्य शी
क्षणीय इत्यर्थः। अहं तु स्मन्नेरित धनैरेव वो युष्मान् आविवासे सर्वतः परिचरामि॥७॥ चतुरश्चिदिति॥ घ्नंतं शपंतं च मा प्रतिबोचेरिति यदुक्तं तत्
त्रापूपतिरुच्यते दुरुक्ताय स्पृहयेत् दुरुक्तं वाक्यं न कामयेत। किंतु दुरुक्ताद्बिभीयात्। तत्रावशिष्टो मंत्रभागः सर्वोपि दृष्टांतः। चिदित्युपमार्थे
वर्त्तते। अक्षद्यूतं कुर्वतो रुभयोर्मध्ये यः पुमान् चतुरः संख्याकान् कपर्दकान् ददमानात् ददतो हस्ते धारयतः पुरुषात् आ निधातोः कपर्दनि

३९

पात पर्यंतं बिभीयात्। अस्य जयो भविष्यति न भविष्यतीत्यन्यो भीतिं प्राप्नुयात्। अत्र यथा भयं तथा दुरुक्तादेतव्यमिति धर्मरहस्यं।
तस्मादहं घ्नंतं शपंतं मा प्रतिवोचेदित्यभिप्रायः। अत्र निरुक्तं चतुरोऽक्षान्धारयत इति॥७॥ सं पूषन्निति॥ हे पूषन् जगत्पोषक पृथिव्यभिमानिदेव।
अध्वनो मार्गान् संतिर अस्मान् अभीष्टस्थानं सम्यक् प्रापय। अंहो विघ्नहेतुं पाप्मानं वितर विनाशय। पूषा विशेष्यते। विमुचो नपात् बल
विमोचकहेतोर्नैव पुरुषस्य पुत्र नपात् जा इति तं नामसु पाठात्। अत्यंतरे अद्भ्यः पृथिवी इति जलभूम्योः सक्तिः श्रूयते तथान्यत्राप्युदकसार
त्वं पृथिव्याः श्रूयते यथा पांसार आसीत् तस्मात् ह घन हत्वा पृथिव्यभवदिति। इयं वै पूषेयं हीदं सर्वं पुष्यतीति यदिदं किंचेति। हे देव पूषन् नः पु
रः अस्माकं पुरतः प्रसक्षु प्रसक्तो भव। पुरतो गच्छेत्यर्थः॥७॥ यो नः पूषन्। हे पूषन् यः अति पूषी नोस्मान् आदिदेशति। अनेन मार्गेण न गंत
व्यमित्येवमाज्ञापयति। कीदृशः अघः आहंता वृकः अस्मदीयधनस्यादाता अपहर्तेत्यर्थः। दुःशेवः सेवितुं दुःशकः दुष्टस्वभावस्तं तादृ
शं प्रतिपक्षिणं पथो मार्गात् दपज हि स्म अवश्यमपाकुरु वृकः कुकरक आदानो॥७॥ अप त्यं परि। त्यं तादृशं पूर्वोक्तगुणयुक्तं शत्रुं मार्गादधि
दूरं अत्यंतदूरदेशं प्रति अपाज अपगमय कीदृशं परिपंथिनं मार्गप्रतिबंधकं मुषीवाणं तस्कररूपं मुषीवा इति तस्करस्य नाम मुषी
शो मलिम्लुच इति तं नामसु पाठात्। ह्वरश्चितं कौटिल्यानां संचेतारं॥७॥ त्वं तस्य। हे पूषन् त्वं तस्य चोरस्य पुरसंपादकं देहं पराभिति छिन
वदीयेन पादेनाक्रम्य तिष्ठ। कीदृशस्य द्वयाविनः प्रत्यक्षापहारः परोक्षापहारश्चेति यद्द्वयं तद्युक्तस्य अघशंसस्य अस्मास्वघमनिष्टं शं
सतः अघशंस इति तस्करनाम॥७॥ आ तत्ते दस्र। हे मंतुमः ज्ञानवन् दस्र दर्शनीय पथो वै पथ्यकारी पूषन् त्वदीयं तदवः रक्षणं
र्णा। आ वृणीमहे सर्वतः प्रार्थयामहे येन रक्षणेन पितॄन् अंगिरःप्रभृतीन् पितॄन् हे दस्र अचोदयः प्रेरितवानसि तद्रक्षणमिति पूर्वत्रान्वयः॥
॥७॥ अधा नो विश्वसौभग। हे विश्वसौभग सर्वधनयुक्त सौभाग्ययुक्त हिरण्यवाशीमत्तम। अतिशयेन सुवर्णमयायुधवन् पूषन् अ
ध पूर्वोक्तात् मदीयप्रार्थनानंतरं नो अस्माकं धनानि सुवर्णमणिमुक्तादीनि सुषणा सुष्ठु दानयुक्तानि कुरु॥७॥ अति नः सश्चतः। सश्चतः अस्मद्बाधनाय प्राप्तवतः शत्रून् अति अस्मानतिक्रम्य नय अन्यत्र प्रापय। नो अस्मान् सुपथा शोभनमार्गेण कुरु। हे पूषन् इह अस्मिन् कर्मणि अस्मद्रक्षणोपायरूपं विदो जानीहि॥७॥ अभि सूयवसं। हे पूषन् सूयवसं शोभनतृण
सुपथा शोभनमार्गेण कुरु। हे पूषन् इहास्मिन्कर्मणि क्रतुं प्रज्ञानं अस्मद्रक्षणोपायरूपं विदो जानीहि॥

(६०)

णोपैतेक्षितः सर्वोषधिपुरुदेशमभिनय अस्मानभितः प्रापय अध्वने मार्गाय न बध्वारो नूतनः संतापो न भवति तिरोषः मार्गेगच्छता
नस्माकं इदानीं तनः क्रेशः कोपि माभूदित्यर्थः ॥ गतार्थमन्यत् ॥ ७ ॥ शग्धि पूर्धि हे पूषन् अस्माननुग्रहीतुं शक्तो भव । पूर्धि अस्मद्गृहं धनेन
पूरय किंच प्रयंसि अन्यदप्यपेक्षितं वस्तु प्रयच्छ शिशीहि अस्मान् सर्वेषु मध्ये तीक्ष्णान् कुरु । तेजस्वीकुर्वित्यर्थः ॥ उदरमस्मदीयं प्रासि पूर
नेन सोमरसेन तथा पूरयानपूषणमिति पूषणं देवं न मेधामसि वयं न तु निंदामः किंतु सूक्तैर्वेदगतैरभिगृणीमसि सर्वतस्तुमः दस्मं द
र्शनीयं पूषणं प्रति वसूनि धनानि ईमहे याचामहे मेधामसि मेधे भाहिंसनयोः ॥ ७ ॥ कद्रुद्राय कत् कदा रुद्राय एतन्नामकाय देवाय
शंतमं अतिशयेन सुखकरं स्तोत्रं वोचेम पठामः कीदृशाय प्रचेतसे प्रकृष्टज्ञानयुक्ताय मीढुष्टमाय सेक्तृतमाय अभिष्टकामवर्षि
सर्थः तव्यसे अतिशयेन प्रवृद्धाय हृदे अस्मदीयहृन्निश्राय ॥ ७ ॥ यथा नो अदितिः अदितिर्भूमिः नोस्माकं रुद्रियं रुद्रसंबंधि भेषजं
यथा येन प्रकारेण सिध्यति करत् तथा करोतु । किंच यथा येन प्रकारेण पश्वे अस्मदीयाय पश्वे महिषादिपशवे नृभ्यः अस्मदीयपुरुषेभ्यः
विशेषेण गवे गोजातये हितं रुद्रियं सिध्यति तथा करोतु किंच तोकाय अस्मदीयापत्याय रुद्रियं यथा सिध्यति तथा करोतु भेषज
स्य रुद्रसंबंधित्वं मंत्रांतरे समाम्नातं यातेरुद्र शिवा तनूः ॥ ७ ॥ यथा नो मित्रो वरुणः मित्रो वरुणश्च नोस्मान् यथा येन प्रकारेण चिकेत
सजोषसः समानप्रीतयः विश्वे सर्वे देवाः यथा चिकेतति अनुग्राह्यत्वेन जानाति रुद्रोपि यथा चिकेतति तथा भवति विशेषः ॥ य
थाशब्दोपेतमंत्ररूपस्य तथा कदा वोचेमेति पूर्वत्रान्वयः ॥ ७ ॥ गाथपतिं रुद्रमभिलक्ष्य वयं शंयोः बृहस्पतिपुत्रस्य संबंधि तत्र सिद्धस
र्वप्रजाहितं सुम्नं सुखमीमहे याचामहे कीदृशं रुद्रं गाथपतिं स्तुतिपालकं मेधपतिं यज्ञपालकं जलाषभेषजं सुखरूपौषधोपेतं ।
यद्वा । उदकरूपौषधोपेतं उदकं हि रुद्र नाम भिषंत्रितं सदौषधं भवति गाथेति वाङ्नाम गाथा गणा इति तन्नामसु पठितं ॥ ७ ॥ यः शुक्र इ
व यो रुद्रः सूर्य इव शुक्रः सूर्य इव दीप्तिमान् हिरण्यमिव रोचते यथा सर्वेषां प्राणिनां हिरण्यं प्रीतिकरं भवति । तथा रुद्रोपि सर्वदेवा
नां सर्वेषां मध्ये श्रेष्ठः वसुः निवासहेतुश्च रोचते ॥ ७ ॥ शं नः करति । नोस्माकं संबंधिभ्यो वेदादिभ्यः सुगं सुष्ठु गम्यं शं सुखं करति ददातु ।

४०

करोति अर्वते अश्वाय अर्वच्छब्दोश्वनाम अर्वा वाजीति तत्र नामसु पाठात् । मेषाय मेषजातिपुरुषाय मेष्यै तज्जातीयस्त्रीभ्यः पु
रुषेभ्यः स्त्रीभ्यः गवे गोजातये ॥ ७ ॥ अस्मे सोम । हे सोम देव नृणां शतस्य पर्याप्तां श्रियमस्मे अस्मासु धेहि निधेहि । आधिक्येन स्थापय
तथा महि महत् तुविनृम्णं प्रभूतबलयुक्तं श्रवोन्नं अधिनिधेहि ॥ ७ ॥ मा नः सोम । सोमपरिबाधः सोमपरितो बाधकाः यागरहिताः
नोस्मान्मो जुहुरंत मा हिंसंतु तथा अरातयः शत्रवो मां जुहुरंत हे इंदो सोम वाजे बलविषये न विषे वास्मान् आभज स्वतः सेवु
स्व ॥ ७ ॥ यास्ते प्रजाः हे सोम ते तव संबंधिन्यो याः प्रजाः संति स्तोत्रं या कुर्वंति । ताः प्रजाः मूर्धा स्थानीयः त्वं नाभा सन् हनपुक्ते यत्र गृह
वेनः कामयस्व । कीदृशस्य ते अमृतस्य मरणरहितस्य परस्मिं धामन् उत्तमे स्थाने प्रशस्तस्य हे सोम आभूषंतीः सर्वतः त्वां अलंकु
र्वतीः प्रजाः वेदः जानीहि ॥ ७ ॥ अग्ने विवस्वत् हे अग्ने त्वं उषसः उषोदेवतायाः सकाशात् राधो धनं दाशुषे हविर्दत्तवते यजमाना
य आवह आनीय प्रापय । सोग्निर्विशेष्यते । अमर्त्य मरणरहित जातवेदः जातानां वेदितः तमेनं शब्दं यास्को व्याचष्टे । जातवेदाः
कस्माज्जातानि वेद जातानि वैनं विदुः प्रज्ञावोग्निमभिसर्पंतीति च । कीदृशं राधः विवस्वत् विविष्टनिवासोपेतं चित्रं नानाविधं किं
च अद्य अस्मिन् दिने उषर्बुधः उषःकाले प्रबुद्धान् देवान् आवह ॥ ७ ॥ जुष्टो हि दूतः हे अग्ने त्वं जुष्टत्वादिगुणयुक्तोसि जुष्टः सेवितः दू
तः देवानां वार्त्ताहरः हव्यवाहनः हविषां वोढा अध्वराणां यज्ञानां रथीः रथस्थानीयः । तथा च मंत्रांतरं ब्राह्मणेनैव व्याख्यातं । रथी
रध्वराणामित्येष हि देवरथी वा इति ब्राह्मणांतरं च रथीरध्वराणामित्याह रथो ह वा एष भूतेभ्यो देवेभ्यो हव्यं वहतीति तादृशस्त्वं
अश्विभ्यां देवताभ्यां उषसा देवतया च सजूः सहितो भूत्वा अस्मे सुवीर्यं शोभनवीर्योपेतं । बृहत् प्रभूतं श्रवोन्नं अस्मे धेहि । अस्मासु धार
य ॥ ७ ॥ अद्या दूतं । अद्य अस्मिन् दिने अग्निं वृणीमहे प्रार्थयामहे कीदृशं दूतं वोळ्हारं । वसुं निवासहेतुं पुरुप्रियं बहूनां प्रियं धूमकेतुं
धूमध्वजयुक्तं भाऋजीकं प्रसिद्धज्वालं कृतं । भाऋजीकः प्रसिद्धभा इति यास्कः च न व्युष्टिषु उषःकालेषु यज्ञानां यजमा
नानां अध्वरश्रियं यागसेवितं ॥ ७ ॥ श्रेष्ठं यविष्ठं व्युष्टिषु उषःकालेषु देवान् इतरान् सर्वदेवान् अच्छ आभिमुख्येन यानव एगंतु अतिं

देयमीळे स्तौमि। कीदृशं। श्रेष्ठं अतिशयेन प्रशस्तं यविष्ठं युवतमं अतिथिं सततगमनं अक्षमां स्याकृतं स्तुष्टआसमंतात् हो मादि करणं दाशुषे हविर्दत्तवते यजमानाय प्रयुष्टं प्रीतं जातवेदसं जातानां वेदितारं ॥७॥ स्तविष्यामि त्वां। हे अमृत अमरणरहितविश्वस्य भोजन कृत्स्नस्य जगतः पालक हव्यवाहन हविषां वोढः मियेध्य यज्ञार्ह एवंविध हे अग्ने विश्वस्य त्रातारं सर्वस्य जगतो रक्षकं अमृतं मरणरहितं न्यज्ञिष्ठं अतिशयेन यष्टारं त्वां महं अनुगुणा तास्तविष्यामि स्तुतिं करिष्यामि ॥७॥ सुशंसो बोधि। हे यविष्ठ्य युवतमाग्ने यस्त्वं गृणते स्तुवते यजमानाय धर्मस्तदा सः कृष्टं शंसनीयः मधुजिह्वः मादयितृज्वालः स्याहुतः सुष्टु आभिमुख्येन हुतः सन् बोधि अस्माभिः प्रायं बुध्यस्व किंच प्रस्कण्वस्य एतन्नाम कण्वपुत्रस्य महर्षेः प्रस्कण्वः काण्वस्य पुत्रः कण्वः प्रस्कण्व इति। यास्कवचनात्। तस्य जीवसे जीवनार्थं मायुः प्रतिरन् प्रकर्षेण वर्धयन् दैव्यं देवसंबंधिनं जनं नमस्य पूजय ॥७॥ होतारं विश्व। होतारं होमनुष्पादकं विश्ववेदसं सर्वं धनं लाभमग्निं विशः प्रजाः समिंधुतेसम्यक्दीपयंति खलु हे पुरुहूत बहुभिराहूताग्ने सत्वं प्रचेतसः प्रकृष्टज्ञानान् युक्तान् देवानिह कर्मणि अकर्मणि द्रवत् क्षिप्रं आवह आभिमुख्येन प्रापय द्रवदिति क्षिप्रनाम ॥७॥ सवितारमुषसं। हे स्वध्वरतो भनयागे युक्ताग्ने क्षपः व्युष्टिषु उषःकाले षु सवित्रादीदेवानावह। ननु यत्ते स्वध्वरे त्वामत्युत नीपाग्ने स बोधनं। अग्निमिति। हविष्व देव्यं देवतां तारयुच्यते। सुतसोमासः अभिषुतसोमाः कण्वासो मेधाविनः ऋत्विजः हव्यवाहं हविषः प्रापकं आहवनीयं त्वां निधते दीपयंति ॥७॥ पतिर्ह्यध्वराणां। हे अग्ने विशां प्रजानां संबंधिनो ये अध्वराः यागास्तेषां पतिः पालकस्त्वं दूतोसि देवानां धर्ता हरो भवसि खलु उषर्बुधः उषःकाले प्रबुद्धान्स्वर्दृशः सूर्यदर्शिनो देवान् अद्यास्मिन् दिने सोमपीतये सोमपानार्थमावह अभिमुख्येन प्रापय ॥७॥ अग्ने पूर्वा। हे विभावसो विशिष्टप्रकाशान् रूपधनवंनग्ने विश्वदर्शतः सर्वैर्दर्शनीयस्त्वं पूर्वा उषसो नु अनीनानुषः कालान न्तुं लक्ष्य दीदेथ दीप्तवान सि तादृशस्त्वं ग्रामेषु जननिवासस्थानेषु अविता सि रक्षको

भयं सियत्ते ष्वनुष्ठीयकर्मसु पुरोहितं देयो: पूर्वस्यां दिशि अवस्थितः मनुषो मिसः ऋत्विग्यजमानानां मनुष्याणां हितोसि ॥७॥ नि त्वा यज्ञस्य। हे अग्ने मनुष्वत् यथा मनुर्यागदेशे निदधाति तद्वद्वयं त्वां निधीमहि अस्मिन्त्रपयामः कीदृशं यज्ञस्य साधनं यज्ञनिष्पादकं होतारं ऋत्विजं ऋतौ वसंतादियष्टारं प्रचेतसं प्रकृष्टज्ञानयुक्तं जीरं शीघ्रं अमूर्णां वृयो हानिकरं देवानां हूतस्थानीयं अमर्त्यं मरणरहितं ॥७॥ यद्देवानां। हे मित्रमहः मित्राणां पूजकाग्ने यद्यदा पुरोहितस्त्वं वेदेः पूर्वस्यां दिशि स्थापितः अंतरः देवयजनमध्ये वर्तमानः संदेवानां दूत्यं दूतकर्म यासि प्राप्नोसि तदा नौ अग्नेस्तवार्चयो दीप्तयः भ्राजंते दीप्यंते। तत्र दृष्टांतः सिंधोरिव यथा समुद्रस्य प्रस्वनितासः प्रकृष्टध्वनियुक्ताः ऊर्मयस्तरंगा भ्राजंते तद्वत् ॥७॥ श्रुधि श्रुत्कर्ण। हे श्रुत्कर्ण श्रवणसमर्थाभ्यां कर्णाभ्यां युक्त अग्ने श्रुधि अस्मदीयवचनं शृणु। यो मित्रो देवः यश्चार्यमा ये चान्ये प्रातर्यावाणः प्रातः प्रातःकाले देवयजनं गच्छंतो देवाः तैः सर्वैः सयावभिः आहवनीयाग्निना सह यास मानगतिभिः अन्यैर्वह्निभिः देवैः सह अध्वरं क्रतुमुद्दिश्य बर्हिषि वेदौ आसीदंतु उपविशंतु ॥७॥ शृण्वंतु स्तोमं। मरुतो देवास्तोमं अस्मदीयं स्तोत्रं शृण्वंतु कीदृशाः कृदानवः सुष्टु फलस्य दातारः अग्निजिह्वाः अग्निर्जिह्वास्थानीयो मुख्यो येषु मरुत्स्तादृशाः ऋतावृधः सत्यस्य यज्ञस्य वा वर्धकाः तथा च वरुणः गृहीतकर्मा विरुणो देवः अश्विभ्यां देवाभ्यां उषसा देवतया सजूः सह सोमं पिबतु ॥७॥ त्वमग्ने वसून्। हे अग्ने त्वमिह कर्मणि वस्वादीन्यज उत अपि च जनमन्यमपि देवतारूपं जनं यज कीदृशं स्वध्वरं शोभनयागयुक्तं मनुजातं मनुना प्रजापतिना जातं उत्सादितं घृतप्रुषं उदकस्य सेक्तारं ॥७॥ श्रुष्टीवानो हि। हे अग्ने विचेतसः विशिष्टप्रज्ञायुक्ता देवाः दाशुषे हविर्दत्तवते यजमानाय श्रुष्टीवानो हि श्रुष्टिः फलस्य दानं तद्वंतः खलु हे रोहिदश्व रोहिंनामकैः अश्वैः उपेत। गिर्वणः गीर्भिः स्तुतिभिर्वननीयाग्ने गिर्वणो देवो भवति गीर्भिरेनं वनयंतीति यास्कः त्रयस्त्रिंशतम नया संख्यया संख्यातांस्तां देवानावह इहानय ॥ प्रियमेधवत्। हे महिव्रत प्रभूतकर्म जातवेदोग्ने प्रस्कण्वस्य कण्वपु

त्रस्य महर्षेर्हवमाख्यानं श्रुधि शृणु । तत्र चत्वारो दृष्टांतः । प्रियमेधात्रिविरूपांगिरोनामका एतेषामाह्वानं यथा शृणोति तद्वत् ।
अत्र निरुक्तं प्रियमेधाः प्रिया अस्य मेधा यथैतेषामृषीणां । कण्वप्रभृतीय यथा प्रायमिति विरूपो नानारूपो महिव्रतो महाव्रत
मिति । ७ । महिकेरवः । महिकेरव औढकर्मणः । प्रियमेधाः प्रियेण यज्ञेनोपेताः ऋषयः ऊतये रक्षणार्थं अग्निं मूरूषत आह्वा
यंत । कीदृशं अध्वराणां यज्ञानां मध्ये शुक्रेण शोचिषा शुद्धेन प्रकाशेन राजंतं दीप्यमानं । ७ । घृताहवन संत्य हे घृताहवन घृ
तेनाहूयमान संत्य फलप्रदाग्ने इमा उ गिरः अस्माभिः प्रयुज्यमाना अपि स्तोत्ररूपा वाचः स्तुश्रुधि सुष्ठु शृणु कण्वस्य महर्षेः
सूनवे पुत्राः याभिर्गीर्भिरवसे रक्षणार्थं त्वां हवंते त्वामाह्वयंति । ७ । त्वां चित्रश्रवस्तम हे चित्रश्रवस्तम अतिशयेन विविधरू
पान्नयुक्त । पुरुप्रिय । बहूनां यजमानानां प्रीतिकराग्ने त्वां हव्यापघोदवे हविर्वोढुं विक्षु जंतवः प्रजास्तुत्यं नायजमाना हवंते आ
ह्वयंति । कीदृशं शोचिष्केशं दीप्तियुक्तकेशोपेतं । तथा च वाजसनेयिन आमनंति । शोचिंदधत्येनस्य समिद्धस्य रश्मयः केशा इति ।
चित्रश्रवस्तमः श्रवइत्यन्ननाम । ७ । नित्वाहोतारं हे अग्ने विप्रा मेधाविनो दिविष्टिषु त्वा निदधिरे स्थापितवंतः । कीदृशं होता
रं आह्वातारं ऋत्विजं ऋतुषु यजनशीलं वस्तुवित्तमं अतिशयेन धनस्य नेतृभयितारं । श्रुत्कर्णं श्रवणयोग्यकर्णोपेतं सप्रथस्त
मं अतिशयेन प्रख्यातं । ७ । आ त्वा विप्राः । हे अग्ने स्तुतसोमाः अभिषुतसोमयुक्ताः विप्राः मेधाविन ऋत्विजः प्रयो अभिह
विर्लक्षणमभिलक्ष्य त्वा आचुच्युवुः त्वामागमयंति । कीदृशं त्वां बृहत् महांतं भासमानं कीदृशाः विप्राः दाशुषे मर्त्याय हविः प्रद
स्यमानस्य संबंधि हविः बिभ्रतो धारयतः । ७ । प्रातर्याव्णः सहस्कृत हे सहस्कृत बलेन मथित संत्य फलदातः वसो निवा
सहेतुभूताग्ने इह देवयजनदेशे अद्यास्मिन्दिने सोमपेयाय सोमपानार्थं प्रातर्यावभिः प्रातरागच्छतो देशान्दैव्यं जनं अन्यमपि
देवताजनं बर्हिरासादय यज्ञं प्रापय । अर्वाचं दैव्यं हे अग्ने अभिमुखं अवाचं अभिमुखं दैव्यं जनं देवतारूपं प्राणिनं सूक्तिभिः
समानाह्वाने । देवताः तारः सहरक्ष हे सहस्कृत दानवः ऋद्युफलदातारो देवाः अयं सोमः युष्मद्धर्थं सोमः पुरतो वर्तते तं सोमं पात पिबत ।

४२

कीदृशं प्रतिरो अपरतं नामकं पूर्वस्मिन्नन्हि अभिषुतो यः सोमः उत्तरेहनि हूयते तस्यैतन्नामधेयं । ७ । एषो उषाः एषो एषे वास्माभिः
परिदृश्यमाना प्रिया सर्वेषां प्रीतिहेतुः अपूर्व्या पूर्व्यं मध्यरात्रादिकालेषु विद्यमाना न भवति किंत्विदानींतनी उषाः उषोदेवता । दि
विद्युलोकस्य सकाशादागत्य व्युच्छति तमो वर्जयति अश्विनौ वां युवां बृहत् प्रभूतं यथा भवति तथा स्तुषे स्तौमि । ७ । या दस्रा । या देवाया
उभावश्विनौ यक्ष्यमाणगुणयुक्तौ तौ स्तुष इति शेषः । इत्यन्वयः । कीदृशौ दस्रा दर्शनीयौ सिंधुमातरा समुद्रमातृकौ यद्यपि सूर्याचं
द्रमसावेव समुद्रजौ तथाप्यश्विनोः केषांचिन्मते तद्रूपत्वात्तथात्वं रयीणां धनानां मनोतरा मनसा तारयितारौ धिया कर्मणि वसू
विदा निवासस्थानस्य लंभयितारौ । ७ । वच्यंते वां हे अश्विनौ वां युवयोः संबंधिरथः जूर्णायां नानाशस्त्रैस्तुतायां अधिविष्टपि स्वर्गलो
केयद्यदा विभिरश्वैः पतात् पतति गच्छति तदानीं वां युवयोः ककुहासस्तुतयो वच्यंते अस्माभिरुच्यंते । ७ । हविषा जारः । हे अश्विनौ देवौ अ
पां जारः स्वकीयतापेनोदकानां जरयिता सूर्यः हविषा अस्मद्दत्तेन पिपर्ति देवान्पूरयति उदिते सूर्ये हि हविः प्रदानात् सूर्यस्य पुरः कल्पं इष्ट
व्यं । अतः सूर्योदयकाले युवाभ्यामागंतव्यमित्यर्थः । कीदृशो जारः पपुरिः उक्तक्रमेण पूरकस्वभावः । पिता पालकः कुटस्य चर्षणिः कर्मणो द्र
ष्टा । अत्र निरुक्तं । हविषा पां जरयिता पिपर्ति पपुरिरिति । ७ । आदारो वां । हे मतवचसा अभिमतस्तोत्रौ नासत्या अश्विनौ वां युवयोर्मतीनां बु
द्धीनामादारः प्रेरकोयः सोमोस्ति सोमस्य तं सोमं पातं युवां पिबतं कीदृशं सोमं धृष्णुया धर्षणशीलं मदकरत्वेन तीव्रमित्यर्थः । ७ । या नः
पीपरत् । हे अश्विना ज्योतिष्मती रसवीर्यादिरूपैर्ज्योतिर्युक्ता या इषं अन्नं नोस्मान्पीपरत् पारयेत् तमसि पारयेत् । किंरूपात्तमसो दारि
द्ररूपं अंधकारं तिरः अंतर्हितं विनष्टं कृत्वा तां इषं तादृशमन्नं अस्मे अस्मभ्यं रासाथां युवां दत्तं । ७ । आ नो नावा । हे अश्विना मती
नां स्तुतीनां पाराय गंतवे पारं गंतुं नावा नौरूपेण गमनसाधनेन नोस्मान्त्वायातं समुद्रमध्यादागच्छतं भूमौ वा गंतुं रथं भ
वदीयं युञ्जाथां । सज्यकुरुतं । ७ । अरित्रं वां । हे अश्विनौ वां युवयोः दिवस्पृथु द्युलोकादपि विस्तीर्णं अरित्रं गमनसाधनं नौरूपं सिं
धूनां समुद्राणां तीर्थे अवतरणप्रदेशे विद्यते रथिरो षः रथश्च भूमौ गंतुं विद्यते । इदं यः सोमाः धिया भवद्विषयेण कर्मणा युयुज्रे

४३

युक्ता बभूवुः ॥७॥ दिवस्कण्वासः। हे कण्वासः कण्वपुत्राः। यद्वा। मेधाविनः ऋत्विजः अश्विना विरुं दृष्यते तिरोषः। कथमिति। तदुच्य
ते। दिवो द्युलोकस्य सकाशात् इंदवः सूर्यरश्मयः प्रादुर्भूताः सिंधूनाम पांसु शिरूपाणां स्पंदनस्वभावानां पदे स्थाने अंतरिक्षे वसूअ
स्मदादिनिवासहेतुभूतं उषःकालीनं ज्योतिः आविर्भूतमिति शेषः। अस्मिं निवासरे युवां स्वं वव्रिः स्वकीयं रूपं कुह धित्सथः। कुत्र
स्थापयतुमिच्छथः। अत्रागत्य प्रदर्शनीयमिति तात्पर्यार्थः ॥७॥ अभूदुभाः। भा उ सूर्यस्य दीप्तिस्तु अंशावेउषःकालीनरश्मिः सिध्यर्थी
अभूदु प्रादुर्भूते सूर्यश्च हिरण्यं प्रति स्वकीयोदयेन हिरण्यसदृशो भूत्। अग्निश्च। असितस्वकीयदीप्तेः सूर्यप्रवेशेन स्वयं कृष्णो भूत्वा जिह्वया
स्वकीयया ज्वालया व्यद्युतत् प्रकाशितवान्। तस्मादयमश्विनोर्युवयोरागमनकाल इत्यर्थः ॥७॥ अभूदु पारं। ऋतस्य सूर्यस्य पारमेतवे
रात्रेः पारभूतमुदयाद्रिं गंतुं पंथा मार्गः साधुयाः समीचीनाः अभूदु। निष्पन्न एव द्विवः द्योतमानात्मकस्य सूर्यस्य स्तुतिः प्रसृतादीप्तिः
व्यदर्शि विशेषेण दृष्टा तस्माद् अश्विनौ युवाभ्यामागंतव्यं ॥७॥ तत्तदित् जरितास्तोता अश्विनोः संबंधितत्तदित् शुभः पुनः कृतं सर्वमपि अ
वोस्मद्विषयं रक्षणं प्रति भूषति प्रत्येकमलंकरोति तदा प्रशंसतीत्यर्थः। कीदृशयोरश्विनोः मदे हर्षे निमित्तभूते सति सोमस्य पिप्रतोः सो
मं पूरयतोः ॥७॥ वावसाना। हे शंभू सुखस्य भावयितारावश्विनौ मनुष्वत् मनाविव विवस्वति परिचरणवति यजमाने ववसाना निवास
शीलौ युवां सोमस्य पीत्या सोमपाननिमित्तं गिरा स्तुतिनिमित्तं च आगतं आगच्छतं ॥७॥ युवोरुषा। हे अश्विनौ परिज्मनोः परितो
गंत्रोः युवयोर्युवयोरुभयोः श्रियमनु आगमनरूपां शोभामनु सस्त्य उषाः उपाचरत् उषःकालदेवता इहागच्छत्। युवयोरागतयोः सतोः
पश्चादागतेत्यर्थः। युवां च अक्तुभिः रात्रिभिः ऋतापतगतानि हर्वीषि वनथः कामयेथे संभजेथे ॥७॥ उभा पिबतं। हे अश्विना उभा युवा
मुभौ पिबतं सोमपानं कुरुतं ततनऊर्ध्वं उभा युवामुभौ अविद्रियाभिः प्रशस्ताभिः रक्षाभिर्नोस्माकं शर्म सुखं यच्छतं ॥ ॥७॥ ॥७॥
॥ इति श्रीसायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके तृतीयोध्यायः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥७॥
॥ ॥ हरिः ॐ शम् ॥ ॥ अयं वां मधुमत्तमः। हे ऋतावृधा ऋतस्य सत्यस्य यज्ञस्य वा वर्धयितारौ अश्विना अश्विनौ वां युवयोः अयं पुरो

४३

वर्तः सोमः सुतो अभिषुतः। कीदृशः मधुमत्तमः अतिशयेन माधुर्यवान् तिरो अह्न्यं तिरोभूते पूर्वस्मिं दिने अभिषुतं तं सोमं पिबतं दाशुषे
हविर्दत्तवते यजमानाय रत्नानि रमणीयानि धनानि धत्तं प्रयच्छतं ॥७॥ त्रिवंधुरेण। हे अश्विनौ त्रिवंधुरेण उन्नतानतरूपेण त्रिबंधन
काष्ठेयुक्तेन त्रिरता अप्रतिहतगतिनता लोकत्रयेन वर्तमानेन रूपेण साशोभनेन स्वर्णयुक्तेन रथेनायातं इहागच्छतं कण्वासः
काण्वपुत्राः मेधाविनः ऋत्विजो वा वां युवयोः अध्वरे यागे ब्रह्म स्तोत्ररूपं मंत्रं हविर्लक्षणमन्नं वा कृण्वंति कुर्वंते षां कण्वानां हवमाह्वानं
शृणुतं सकृत् आदरेण शृणुतं ॥७॥ अश्विना मधु। हे ऋतावृधा यज्ञवर्धकौ वश्विनौ मधुमत्तमं सोमं पातं पिबतं हे दस्रावश्विनौ सोमपानार्थी
अद्य अस्य दाशुनानंतरं अद्यास्मिं दिने रथे स्वकीये वसु विभ्रता अस्मदुपयुक्तं धनं धारयंतौ दाश्वांसं हविः प्रदं यजमानं उपगच्छतं स
मीपे प्राप्नुतं ॥७॥ त्रिषधस्थे बर्हिषि। हे विश्ववेदसा सर्वज्ञावश्विनौ त्रिषधस्थे कक्षात्रयरूपेण स्तीर्णतया त्रिषु स्थानेषु अवस्थिते बर्हिषि
दर्भे स्थितौ मध्वा मधुरेण रसेन यज्ञं मिमिक्षतं सेक्तुमिच्छतं हे अश्विनौ वां युष्मदर्थं सुतसोमा अभिषुतसोमयुक्ताः अभिद्यवः अभिगतदी
प्तयः कण्वासो युवामुभौ हवंते आह्वयंते ॥७॥ याभिः कण्वं। हे अश्विनौ युवामुभौ याभिरभिष्टिभिरपेक्षिताभिः रक्षाभिः कण्वं महर्षिं प्रावतं र
क्षितवंतौ हे शुभस्पती शोभनस्य कर्मणः पालकौ ताभिः रक्षाभिरस्मान्तु ऊतं सुष्ठ्ववतं सुष्ठु रक्षितं स्पृहमन्यत् ॥७॥ सुदासे दस्रा। हे दस्रा
दर्शनीयावश्विनौ सुदासे शोभनदानयुक्ताय पिजवनपुत्राय पुरा रथेन स्वविभ्रता युवां पृक्षो अन्नं वहतं प्रापितवंतौ तद्वदंतरिक्षात् समुद्रम
अंतरिक्षनामसु समुद्र इति पठितं नामसु पाठात्। उत वा दिवः परि अथवा द्युलोकस्य परि पुरुस्पृहं बहुभिः स्पृहणीयं धनं अस्मे धत्तं
अस्मासु स्थापयतं सुदानी इति द्रष्टव्यः ॥७॥ यन्नासत्या। हे नासत्या असत्यरहिताश्विनौ युवां यद्यदि परावति दूरदेशे स्थः वर्तेते।
यद्वा अथवा अर्वति [illegible] अधिके समीपे स्थः अतो अस्मात् दूरात् समीपात् वा सूर्यरश्मिभिः साकं सूर्योदयकाले सुवृता शोभनवर्तनेन युक्तेन रथे
न नोस्मान् प्रति आगतं आगच्छतं ॥७॥ अर्वांचा वां। हे अश्विनौ अध्वरश्रियो यागसेविनः सप्तयो अश्वाः सवने उप अस्मत् अनुष्ठानानि। प्री
णिसदनान्येवोपत्र[illegible] अर्वांचा अभिमुखौ वां युवां वहंतु प्रापयंतु हे नरा अश्विनौ सुकृते सुष्ठुकर्मकारिणे सुदानवे शोभनदानयुक्ता
य यजमानाय इषमन्नं पृंचंता संपोजयंतौ युवां बर्हिः आसीदतं दर्भे प्रासुवृक्तं। अर्वांचा ॥७॥ तेन नासत्या। हे नासत्या सूर्यत्वचा सूर्यसह

44

तेन स्वर्यरदिनि सदृशो न तेन रथेन प्रसिद्धेनु आगतमागच्छतं दाशुषे हविर्दत्तवते यजमानाय पृक्षधुनं शश्वत्सर्वदा येन ऊहथुः प्रापितौ ते
न रथेनेति पूर्वत्रान्वयः ॥ किमर्थमागमनमिति तदुच्यते मध्वा मधुरस्यास्य सोमस्य पीतये सोमपानार्थं नो ॥७॥ उक्थेभिरर्वाक् ॥ उक्थैः शस्त्रैः प्रभूत
धनाव अश्विनौ अवसे अस्मद्रक्षणार्थं उक्थेभिरुक्थैः शस्त्रैः अर्कैः अर्चनसाधनैः स्तोत्रैश्च अर्वागस्मदाभिमुख्येन निह्वयामहे नितरां आह्वया
मः ॥ हे अश्विना कण्वानां कण्वपुत्राणां मेधाविनां प्रिये सदसि यज्ञस्थाने शश्वत्सर्वदा सोमं पपथुः हि कं पुरा पीतवन्तौ खलु ॥७॥ सह वामेन ॥
हे दुहितर्दिवः द्युदेवतायाः पुत्रि उषः कालदेवते नोऽस्मदर्थं वामेन धनेन सह व्युच्छ प्रभातं कुरु हे विभावरि उषोदेवते बृहता प्रभूतेन द्युम्नेनान्ने
न सह व्युच्छ ॥ हे देवि त्वं दास्वती दानयुक्ता सती राया यशो लक्षणेन धनेन सह व्युच्छ ॥७॥ अश्वावतीर्गोमतीः ॥ अश्वावतीर्बहुभिरश्वोपेता गोम
तीर्बहुगोभिर्युक्ता विश्वसुविदः कृत्स्नस्य धनस्य सुष्ठु लम्भयित्र्यः उषोदेवता वस्तवे प्रजानां निवासाय भूरि प्रभूतं यथा भवति तथा व्यर्थं तं
प्राप्ताः ॥ हे उषोदेव मामुद्दिश्य सूनृताः प्रियहितवाचः उदीरय ब्रूहि मघोनां धनवतां संबन्धि राधो धनं चोदय अस्मदर्थं प्रेरय ॥७॥ उवासोषाः ॥
उषोदेवी उवास पुरा निवासमकरोत् प्रभातं कृतवतीत्यर्थः ॥ नु अथापि उच्छातु व्युच्छतु प्रभातं करोति कीदृशी देवी रथानां जीरा प्रेरयित्री उषः
काले हि रथाः प्रेर्यंते अस्याः उषसः आचरेषु आगमनेषु ये रथा दधिरे ध्रुताः सज्जीकृता भवंति ते षां रथानामिति पूर्वत्रान्वयः ॥ रथप्रेरणे दृ
ष्टांतः ॥ श्रवस्यवो धनकामाः समुद्रे न यथा समुद्रमध्ये नावः सज्जीकृत्य प्रेरयंति तद्वत् ॥७॥ उषो ये ते ॥ हे उषः ते तव यामेषु गमनेषु सत्सु ये सू
रयो विद्वांसो भिक्षुः दानाय धनाय धनार्थं मनः स्वकीयं प्रयुंजते प्रेरयन्ति दानशीलाः उदराः प्रभाथः प्रातःकाले दातुमिच्छंतीत्यर्थः ॥ एवं दा
तुमिच्छतां नृणां तं नाम कदानविषये लोकप्रसिद्धं नाम कण्व एव तमो तितमाः येन मेधावी कण्वो महर्षिरत्राह ॥ अत्र चोषः काले गृणाति उच्चारयति
यो दातुमिच्छति यथा नामग्रहणेन दातारं प्रशंसति ॥ ता उभा यद्युषः काल एवं तथा कुरुते इत्यक्षतुतिः ॥७॥ आघा योषेव ॥ उषादेवी प्रभुंजती प्र
कर्षेण सर्वं पालयंती आ यातिप्रदितिमागच्छति खलु ॥ तत्र दृष्टांतः ॥ सूनरी सुष्ठु नृत्यस्य नेत्री योषेव गृहिणीव कीदृशी उषा वृजनं गमनवती
लं जंगमं जातं प्राणिनं जरयंती जरां प्रापयंती अस्य उषस्यागतायां वयो हा प्राणिना जीर्णा भवंति उषः काले यद्वशात् उक्तं प्राणिजातं ईयते
निद्रां परित्यज्य स्वस्वकृत्यार्थं गच्छति ॥ पद्वत् पादयुक्ताः पक्षिणः उत्पातयति पक्षिणो ह्युषः काले समुत्थाय तत्र तत्र व्रजंति ॥७॥ वि या सृजति ॥ या देवी सा
मनं समीचीनं चेष्टावंतं पुरुषं विसृजति प्रेरयति रहारामादिचेष्टाकृतान् पुरुषान् उषः काले श्रायनाउत्थाप्य स्वस्वव्यापारे प्रेरयति द्रुति प्रति

४४

द्वं किं च उषाः अर्थिनो याचकान् विसृजति ते हि उषःकाले समुत्थाय स्वकीय दातृगृहं गच्छंति र्नुदंती उषोदेवता पदं स्थानं न वेति न का
म पते उषः काले श्री प्रं गच्छतीत्यर्थः ॥ हे वाजिनीवति उषोदेवते व्युष्टौ त्वदीये प्रभातकाले पतिवांसः पतनयुक्ता वयः पक्षिणः न किरासतेन
तिष्ठंति किंतु स्वस्वनीडाद्विनिर्गत्य गच्छंतीत्यर्थः ॥७॥ एषायुक्त ॥ एषा उषोदेवी तं अयुक्त स्वकीयानां रथानां शतं योजितवती सुभगा सौभा
ग्ययुक्ता ॥ इयमुषा परावतो दूरस्थानात् सूर्यस्योदयनात् अधिकाद् द्युलोकान्मानुषान् अभि मनुष्यान् उद्दिश्य रथेभिः शतसंख्याकैः युक्तैः वियाति वि
शेषेण गच्छति ॥ ॥७॥ विश्वमस्योः ॥ विश्वं सर्वं जगत् जंगमं प्राणिजातं अस्या उषसश्चक्षसे प्रकाशायन नाम प्रह्वी भवति ॥ रात्रौ तम
सि निमग्नाः सर्वे जनाः त्वं निवारयित्री उषसस्तु पलभ्य नमस्कुर्वतीत्यर्थः ॥ कुतः यस्मादेषा सूनरी सुष्ठु नेत्री अभिमतफलस्य प्रापयित्री
उषा ज्योतिष्कृणोति सर्वं प्रकाशयति ॥ किं च मघोनी मघवती धनवती दिवो दुहिता द्युलोकसकाशादुत्पन्ना उषाः द्विषः द्वेष्टॄन् अपोच्छतु ॥ अ
पवर्जयतु तथा स्रिधः तथा स्रिधः शोषयितॄन् अपोच्छतु अपवर्जयतु ॥ तस्मादिष्टप्राप्त्यनिष्टपरिहारहेतुतामुषोदेवतां विश्वं जगं नमस्करो
तीत्यर्थः ॥७॥ उषआभाहि ॥ हे दुहितः द्युलोकस्य पुत्रि उषः उषोदेवते चंद्रेण सर्वेषामाह्लादकेन भानुना प्रकाशेन आसमंतात् भाहि प्रकाशस्व
किं कुर्वती दिवि दिविषु दिवसेषु दिवे भूरि प्रभूतं सौभगं सौभाग्यं अस्माकमावहंती संपादयंती तथा व्युच्छंती तमांसि वर्जयंती ॥७॥ विश्वस्य
हि ॥ हे सूनरी उषोदेवि विश्वस्य सर्वस्य प्राणिजातस्य प्राणिनं चेष्टनं जीवनं प्राणधारणं त्वे त्वयि वर्त्तते यत् यस्मात्वं व्युच्छसि तमो वर्जय
सि ॥ हे विभावरि विशिष्टप्रकाशयुक्ते तादृशी त्वं नोऽस्मान्प्रति बृहता प्रौढेन रथेन आ याहि ॥ हे चित्रामघे विचित्रधनयुक्ते उषोदेव
यते अस्मदीयं हवमाह्वानं श्रुधि शृणु ॥७॥ उषोवाजं ॥ हे उषः वाजं हविर्लक्षणमन्नं हि ... वंस्व संभजस्व स्वीकुर्वित्यर्थः ॥ यो वाजश्चि
त्रः श्लाघनीयः मानुषे मनुष्ये जने जाते यजमाने वर्त्तते तं वाजमिति पूर्वत्रान्वयः ॥ तेन कारणेन सुकृतः सुष्ठुकृतवतो यजमानान् अध्वरा
न् हिंसारहितान् यागानुपावह प्रापय यजमानान् वह्न्यो यज्ञनिर्वाहकस्य तानागमयंति स्तुवंति ॥ तान् सुकृत इति पूर्वेण संबंधः ॥ एतदुक्तं भवति
यजमानैः प्रत्तं हविः स्वीकृत्य पुनरपि तेषां यज्ञं संपादयेति वा ॥७॥ विश्वान्देवाँ ॥ हे उषः त्वं सोमपीतये सोमपानाय अंतरिक्षाद् दिवो अधि
श्वान् सर्वान् देवान् आवह अस्मदीयदेवयजनदेशं प्रापय हे उषः ~~त्वं सोमपीतये सोमपानाय~~ सा त्वं अस्मासु गोमद् गोमंतं वसुमद्भिर्गोभिर्युक्तं अश्वा

४८

वत् अश्वैरूपेतं उक्थं प्रशस्यं स्थवीर्यं शोभनवीर्योपेतं धाजिमन्तं अस्मासु धाः निधेहि। स्थापयेत्यर्थः॥ ७॥ यस्याः रुशन्तः। यस्या उषसः स्र
र्चयः प्रकाशाः रुशन्तः शुभ्राः भद्राः कल्याणाः प्रत्यदृक्षत प्रत्यदृश्यन्त सा तथाभूता उषा नोस्मभ्यं रयिं ददातु। कीदृशं रयिं विश्ववारं
विश्वस्य वारकं। यद्वा। विश्वस्य वारणीयं सुपेशसं पेश इति रूपनाम। शोभनरूपोपेतं सुगम्यं सुष्टुगम्यं। यद्वा सुगम्य इति सुखनाम तद्
युक्तात्। रायः धनं रुशन्तः रुशन्ति हिंसायां॥ ७॥ ये चिद्धि त्वामृषयः। हे महि महते पूजनीये वा उषो देवते त्वां ये चिद्धि ये खलु प्रसिद्धाः पूर्वे चिरंतना अ
ऋषयो मन्त्रद्रष्टारः ऊतये रक्षणाय अवसे संतनाम। अवसे अन्नाय च जुजुरे जुह्विरे आहूतवन्तः स्तुत्यरूपैः मन्त्रैः स्तुतवन्त इत्यर्थः। हे उषः
सा त्वादृशी त्वं राधसा अस्मानभि इति न हविर्लक्षणेन धनेन भुक्तेण शोचिषा दीप्तेन तन्नमो निधारयितुं समर्थेन तेजसा चोपलक्षिता सा
ती तेषां नः सीणामृष्ठ नोस्माकं स्तोमान् अभिस्तुतीः अभिलक्ष्य गृणीहि सम्यक् स्तुतिमिति इराये असाअस्मदीयाभिः स्तुतिभिः संतुष्टा भवेत्यर्थः।
॥ ७॥ उषो यदद्य। हे उषः त्वं अद्यास्मिन् प्रभातसमये यत् यस्मात् भानुना प्रकाशेन दिवोंतरिक्षस्य द्वारौ द्वारभूतौ पूर्वापरदिग्भागौ अंधकारे
णाच्छादितौ अपवृणोषि विश्लिष्य प्रापोषि तस्मात् अस्मभ्यं छर्दिः तेजस्वि गृहं प्रयच्छतात् देहि। कीदृशं छर्दिः अवृकं हिंसकरहितं पृथुवि
स्तीर्णं अपि च हे देवि देवनशीले गोमती बहुभिर्गोभिर्युक्ता इषं अन्नानि प्रत्युपसर्गस्यावृत्तेः प्रयच्छतादिदम् अनुषज्यते प्रयच्छतात् देहि त्वदाग
मनं स्यास्मद्रक्षणार्थत्वादस्मदभीष्टं गृहादिकं प्रयच्छेत्यर्थः। छर्दिरिति गृहनाम॥ ७॥ सं नो राया। हे उषः नोस्मान् व्याप्नेन स्वं मिमिक्षस्व
संसिञ्च संयोजयेत्यर्थः। कीदृशेन धनेन बृहता प्रभूतेन विश्वपेशसा पेश इति रूपनाम। बहुविधरूपयुक्तेन तथा इळाभिः गोभिः
स्मान् सं मिमिक्ष्व इषेति गोनाम। इळा जगतीति नामसु पाठात्। अकारः समुच्चये पदांते वर्तमानत्योक्तः च। एतस्मिन्नेवार्थे देव्यप्य
पितृभ्य एवाकार इति। किंच हे मह महनीये उषो देवते द्युम्नेन यशसा संमिथा हे वाजिनीवति अन्नवति भवनं भक्तक्रियायुक्ते वाजैः अन्नैः अस्मा
न् संमिमिक्ष्व। अन्नं वाज इत्यभिरूपनरात्॥ ७॥ उषो भद्रेभिः। हे उषः उषो देवते भद्रेभिः भंदनीयैः शोभनमार्गैः दीप्तैः अंतरिक्षलोकात् रोचमा

नात् दीप्यमानात् दिव इत्यर्थः। उपरि वर्तमानात् दिवि इति पूजनार्थः। पूजितादेवं विधात् अंतरिक्षलोकादागत्य आगच्छ। हे उषः अरुण्य

स्यवः अरुणवर्णाः गावः सोमिनः सोमयुक्तस्य जेयेमानस्य गृहं देवयजमानस्य पंथ्यं गृहं त्वामुपवहंतु प्रापयंतु॥ ७॥ सुपेशसं॥ हे
उषः त्वं यं रथं सु आधितिष्ठसि किंभूतं रथं सुपेशसं शोभनावयवं शोभनरूपयुक्तं वा पेश इति रूपनामेति यास्कः। यद्वा शोभनहिरण्ययु
क्तं पेशः रुशन् इति तं नामसु पाठात्। इहरा सुखं शोभनेन खेनाकाशेन युक्तं विस्तृतमित्यर्थः। यद्वा सुखहेतुभूतं। अथवा सुखमिति क्रिया
विशेषणं सुखं यथा भवति तथेत्यर्थः। हे दिवो दुहितः द्युलोकस्य कार्या उत्पन्ने उषो देवते तेन रथेन अधास्मिन् काले सुश्रवसं शोभनहविर्युक्तं
यजमानं प्रावय प्रकर्षेण गच्छ॥ ७॥ वयश्चित्ते। हे अर्जुनि शुभ्रवर्णे उषः उषो देवते ते तव ऋतून् अनुगमनान्यनु लक्ष्य द्विपत् द्विपान्मनुष्यादिकं
चतुष्पात् अश्वादिकं तथा पतत्रिणः पतत्रवन्तः पक्षोपेताः वयश्चित् पक्षिणः दिवो अंतेभ्यः आकाशप्रांतेभ्यः परि उपरि। आरन् प्रकर्षेण ग
च्छन्ति रात्रावंधकारेणाभिभूताः सर्वे प्राणिनस्त्वदागमनानंतरं चेष्टावंतो भवंतीत्यर्थः॥ ७॥ व्युच्छंती हि। हे उषः व्युच्छंती तमो वर्जयंती त्वं रश्मिभिः स्वकी
यैः तेजोभिः विश्वं सर्वभूतजातं तमोजातं रोचनं रोचमानं प्रकाशयुक्तं यथा भवति तथा आभासि आसमंतात् प्रकाशसे हि यस्मादेवं तस्मात् त्वां त्वाद
दृशीं वसूयवः वसुकामाः कण्वाः मेधाविनः ऋत्विजः कण्वगोत्रोत्पन्ना वा महर्षयः गीर्भिः स्तुतिलक्षणैर्वचोभिः अहूषत स्तुवंतीत्यर्थः॥ ७॥
उदु त्यं। केतवः प्रज्ञापकाः सूर्यभासः यद्वा सूर्यरश्मयः सूर्यं सर्वस्य प्रेरकमादित्यं उदु वहंति ऊर्ध्वं वहंति उ इति पादपूरणार्थः। उ कं च मिताक्षरेष्व
नर्थकाः कमीमिद्विति … इति। किमर्थं विश्वाय विश्वस्मै भुवनाय दृशे द्रष्टुं सर्वे जनाः सूर्यं पश्येयुरिति तथा ऊर्ध्वं वहंतीत्यर्थः। कीदृशं सूर्यं प्रसिद्धं जातवेद
संजातानां प्राणिनां वेदितारं जातप्रज्ञं जातधनं वा देवं द्योतमानं। अत्र निरुक्तं उदु हंति तज्जातवेदसं भाः केतवो रश्मयो वा सर्वेषां भूतानां
संदर्शनाय सूर्यमिति॥ ७॥ अप त्ये ता॥ त्ये तायवो यथा। प्रसिद्धास्तस्करा इव नक्षत्रा नक्षत्राणि देवगृहा वै देवनक्षत्राणि श्रुत्यंतरात्। यद्वा इ
ह लोके कर्मानुष्ठायाथ स्वर्गं प्राप्नुवंति ते नक्षत्ररूपेण दृश्यंते तथा च श्रूयते। यो वा इह यजते अमुं लोकं नक्षते तं नक्षणं नक्षत्रत्वमिति। यद्वा
तेषां सुकृतीनां ज्योतींषि नक्षत्राण्युच्यंते सुकृतो वा एतानि ज्योतींषि यन्नक्षत्राणीत्याम्नानात्। यास्कस्त्वाह नक्षत्राणि नक्षतेर्गतिकर्मणो ने
मानि क्षत्राणीति च ब्राह्मणं। तथाविधानि नक्षत्राणि अक्तुभिः रात्रिभिः सह अपयंति अपगमयंति विश्वचक्षसे विश्वस्य सर्वस्य प्रकाशक

स्यस्तराः सूर्यस्य आगमनं दृश्यन्ते इति शेषः। तस्कराः नक्षत्राणि च रात्रिभिः सह सूर्यमागमिष्यंतीति भीत्या पलायंते इत्यर्थः। तायुरिति स्तेननाम। तायुस्तस्कर इति तन्नामसु पाठात्। अक्तुभिरिति रात्रिनामसु शर्वरी अक्तुरिति तत्र पाठात्। ७। अदृश्रमस्य। अस्य सूर्यस्य केतवः प्रज्ञापकाः रश्मयो दीप्तयो जनान् अनु व्यदृश्रं अजानात् सर्वान् अनुक्रमेण प्रेक्षंते सर्वं प्रकाशयंतीत्यर्थः। अत्र दृष्टांतः। भ्राजंतो दीप्यमाना अग्नयो यथा अग्नय इव। ७। तरणिर्विश्वदर्शतः। हे सूर्य त्वं तरणिः तरिता अन्येन गंतुमशक्यस्याध्वनो गंतासि। तथा च स्मर्यते। योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्धेन क्रममाण नमोस्तु त इति। यद्वा उपासकानां रोगात्तारयितासि। आरोग्यं भास्करादिच्छेदिति स्मरणात्। तथा च विश्वदर्शतः विश्वैः सर्वैः प्राणिभिर्दर्शनीयः। आदित्यदर्शनीयस्य चांडालादिदर्शनजनितपापनिर्हरणहेतुत्वात्। तथा च आपस्तंबः। दर्शनो ज्योतिषां दर्शनमिति। यद्वा विश्वं कृत्स्नं सकलं जातं दर्शतं द्रष्टव्यं प्रकाश्यं येन स तथोक्तः। तथा ज्योतिष्कृत् ज्योतिषः प्रकाशस्य कर्ता। सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः। यद्वा। चंद्रादीनां रात्रौ प्रकाशयिता। रात्रौ हि अंमयेषु चंद्रादिबिंबेषु सूर्यकिरणाः प्रतिफलिताः संतोंधकारं निवारयंति। यथा द्वारस्थदर्पणोपरि निपतिताः सूर्यरश्मयो गृहांतर्गतं तमो निवारयंति तद्वदित्यर्थः। यस्मादेवं तस्माद्विश्वं व्याप्तं रोचमानं अंतरिक्षमाभासि तं ताङ्गाप्ति प्रकाशयसि। यद्वा हे सूर्य अंतर्यामितया सर्वस्य प्रेरक परमात्मन् तरणिः संसारार्णवस्य तारकोसि यस्मात्त्वं विश्वदर्शतः विश्वैः सर्वैर्मुमुक्षुभिः दर्शनो द्रष्टव्यः साक्षात्कर्तव्य इत्यर्थः। अधिष्ठान साक्षात्कारो ज्ञातोपि तं निवर्तते ज्योतिषः सूर्यादेः कर्ता। तथा चाम्नायते। चंद्रमा मनसो जात इति। ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यजातं रोचमानं रोचमानं दीप्यमानं यथा भवति तथा भवसि प्रकाशयसि। चैतन्यस्फुरणे हि सर्वं जगद्दृश्यते। तथा चाम्नायते। तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति। ७। प्रत्यङ् देवानां। हे सूर्य त्वं देवानां विशः मनुनामकान् देवान् मरुतो वै देवानां विश इति श्रुत्यंतरात्। तान् मरुत्संज्ञकान् देवान् प्रत्यङ् उदेषि प्रत्यग्गच्छन् उदयं प्राप्नोषि तेषामभिमुखं यथा भवति तथेत्यर्थः। तथा मानुषान् मनुष्यान् प्रत्यङ् उदेषि प्रति~~गच्छन् उदयं प्राप्नोषि तेषामभिमुखं यथा भवति~~ तेथि तथा अस्मदभिमुख एव सूर्य उदेतीति मन्यंते तथा विश्वं व्याप्तं स्वः स्वर्लोकं दृशो

४६

दृशे प्रत्यङ् उदेषि यथा स्वर्लोकवासिनो जनाः स्वस्वाभिमुख्येन पश्यंति तथा उदेषीत्यर्थः। एतदुक्तं भवति। लोकत्रयवर्तिनो जनाः स्वस्वाभिमुख्येन सूर्यं पश्यंतीति। तथा चाम्नायते। तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति। ७। येना पावक। हे पावक सर्वस्य शोधक निवारक अनिष्टनिवारक सूर्य त्वं जनान् प्राणिनः भुरण्यंतं धारयंतं यादृशेन चक्षसा प्रकाशेन अनु पश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुम इति शेषः। यद्वोत्तरस्यामृचि संबंधः। तेन चक्षसा याहीति। तथा च यास्केनोक्तं। तत्त्वे वयं स्तुम इति वाक्यशेषः। अपि वोत्तरस्यामन्वयः। तेन व्येषीति। ७। वि द्यामेषि। हे सूर्य त्वं पृथु विस्तीर्णं रजो लोकं। लोका रजांस्युच्यंत इति यास्कः। कं लोकं। द्यां अंतरिक्षलोकं व्येषि विशेषेण गच्छसि। किं कुर्वन्। अहा अहानि अक्तुभिः रात्रिभिः सह मिमानः उत्पादयन् आदित्यगत्यधीनत्वादहोरात्रविभागस्य। तथा जन्मानि जननवंति भूतजातानि पश्यन् प्रकाशयन्। ७। सप्त त्वा। हे सूर्य देव द्योतमान विचक्षण सर्वस्य प्रकाशयितः। सप्त सप्तसंख्याकाः हरितोऽश्वाः रसोमहरणशीला रश्मयो वा त्वा त्वां वहंति प्रापयंति। कीदृशं। रथे वस्थितं इति शेषः। तथा शोचिष्केशं शोचींषि तेजांस्येव यस्मिन्केशा इव दृश्यंते स तथोक्तस्तं। हरित इत्यादि साश्वानां संज्ञा। हरित आदित्यस्येति निघंटावुक्तत्वात्। ७। अयुक्त सप्त। सूरः सर्वस्य प्रेरकः सूर्यः शुंध्युवः शोधिकाः अश्वस्त्रियः तादृशीः सप्त सप्तसंख्याकाः अयुक्त स्वरथे योजितवान्। कीदृश्यः। रथस्य नप्त्र्यः न पातयित्र्यः याभिर्युक्ताभिः रथो पातितो न पतति तादृशीरित्यर्थः। एवंभूताभिस्ताभिरश्वस्त्रीभिः स्वयुक्तिभिः स्वकीययोजनेन रथे संबंधाभिर्याति यज्ञगृहं प्रत्यागच्छति अतस्तस्मै हविर्दातव्यमिति वाक्यशेषः। ७। उद्वयं तमसः। वयमनुष्ठातारः तमसस्परि तमस उपरि रात्रेरूर्ध्वं वर्तमानं तमसः पापात्परि परिवर्तमानं वा पापरहितमित्यर्थः। तथाम्नायते उद्वयं तमसस्परीत्याह पाप्मा वै तमः पाप्मानमेवास्मादपहंतीति। ज्योतिस्तेजस्विनं उत्तरं उत्कृततरं उत्कृष्टतरं देवत्रा देवेषु मध्ये देवं दानादिगुणयुक्तं सूर्यं पश्यंतः स्तुतिभिः हविर्भिश्च उपासीनाः संतः उत्तमं उत्कृष्टतमं ज्योतिः सूर्यस्य रूपं अगन्म प्राप्नवाम। तथा च श्रूयते। अगन्म ज्योतिरुत्तममित्याह। असौ वा आदित्यो ज्योतिरुत्तममादित्यस्यैव सायुज्यं गच्छतीति। युक्तं चैतत्। तं यथा यथोपासते तदेव भवंतीति श्रुत्यंतरात्। ७। उद्यन्नद्येति। हे सूर्य सर्वस्य प्रेरक मित्रमहः सर्वेषामनुकूलदीप्तियुक्त अद्यास्मिन्काले उद्यन् उदयं गच्छन् उत्तरां उन्नततरां दिवमंतरिक्षं आरोहन् आभिमुख्येन व्याप्नुवन् यद्वा दिवमंतरिक्षं उत्तरां उन्नततरां आरोहन् उत्कर्षेण प्राप्नुवन् ने वहदस्त्वं मम हृद्रोगं हृदयगतमांतरं रोगं हरिमाणं शरीरगतिकांतिहरणशीलं बाह्यरोगं। यद्वा शरीरगतं हरिद्वर्णरोगमप्याशु नैव वर्णानिष

४८

र्थः। तदुभयमपि नाशय मांसतो नारंडभ्रु यद्विधा रोगा मोचयेत्यर्थः। मित्रमहः मित्रमनुकूलं महत्तेजो यस्यासौ ॥७॥ शुकेषु मे। मे मदीयं हरिमाणं
शारीरगतं हरिद्वर्णस्य भावं शुकेषु तादृशं वर्णं कामयमानेषु पक्षिषु तथा रोपणाकास्कशारिकारूपक्षिविशेषेषु दध्मसि स्थापयामः। अथो अपि च
हारिद्रवेषु हरितालद्रुमेषु तादृग्वर्णेषु सत्सु मे मदीयं हरिमाणं निदध्मसि निधीमहि स च हरिमा तत्र वस्करत्वेनास्तां अस्मान्माधितिष्ठत्वित्यर्थः॥७॥ उ
दगादयं पुरोवर्ती आदित्यः अदितेः पुत्रः सूर्यः विश्वेन सहसा सर्वेण बलेन सह उदगात् उदयं प्राप्तवान्। किं कुर्वन् मह्यं द्विषंतं रंधयन् मम उपद्रवका
रिणं रोगं हिंसन् न पि च अहं द्विषते अनिष्टकारिणे रोगाय मो रधं मैवं हिंसां करोमि। सूर्य एवास्मदनिष्टकारिणं रोगं विनाशयत्वित्यर्थः॥ अभि त्यं मेषं।
॥७॥ त्यं प्रसिद्धं मेषं शत्रुभिः स्पर्धमानं। यद्वा कण्वपुत्रं मेधातिथिं यजमानं इंद्रो मेषरूपेणागत्य तदीयं सोमं पपौ स ऋषिः तं मेष इत्यवोचत्। अत इदानीं
मपि मेष इत्युक्तो भिधीयते मेधातिथिं इति। एकस्य मंत्रैकदेशस्य व्याख्यानरूपं ब्राह्मणमेवाम्नायते मेधातिथिं ह काण्वायनिं मेषो भूत्वा जहारेति। श्रा
गत्य सोमं अपहृतवानित्यर्थः। पुरुहूतं पुरुभिर्यजमानैराहूतं ऋग्मियं ऋग्भिर्विशीयमाणं स्तूयमानमित्यर्थः। तुल्यो हि देवताविक्रियं तोयदा ऋग्भिर्म
यते शक्यत इति ऋग्मी नं वस्वो अर्णवं धनानां आवासभूमिं एवं गुणविशेषैर्युक्तमिंद्रं हे स्तोतारो गीर्भिः स्तुतिभिरभिमदत अभिमुख्येन हर्षं प्रापयत यस्य
पुण्यकर्माणि मानुष्या मनुष्याणां हितानि विचरंति विशेषेण दृश्यंते तत्र दृष्टांतः। द्यौर्न यथा सूर्यरश्मयः सर्वेषां हितकराः भुजे भोगाय मंहिष्ठं अतिश
येन प्रवृद्धं विप्रं मेधाविनं तथाविधमिंद्रमभ्यर्चत अभिपूजयत॥७॥ अभीमवन्वन्नूतयः। अवितारो रक्षितारो दक्षासो दक्षपितारः प्रवर्धयितारः
ऋभवः उरुभां भीति नैरुक्तः स्वसखायो भवंत्र मरुत उच्यते एवंभूता मरुतः इंद्रं अभीमवन्वन्नाभिमुख्येन ऊर्षे अभजंत वृत्रेण सह युध्यमानमिंद्रं सर्वे
देवाः पर्यत्यजन् मरुतस्तु तथा न पर्यत्याक्षुः। तथा चाम्नायते। विश्वे देवा अजहुर्ये सखायः। मरुद्भिरिंद्र सख्यं ते अस्त्विति ब्राह्मणेप्याम्नातं मक्षपु
लोके स्वतेजसा प्रतिपूरयती त्यं तरिक्षप्राः द्वादशस्वादित्येषु इंद्रस्य विद्यमानत्वात् शाखांतरेषु श्रूयते। तस्माद् इंद्रश्च विवस्वांश्चाजायतामिति। इंद्र
श्च विवस्वांश्चेत्यत इति चात विषीभिः शवत्तं तविषी इति बलनाम। तविषी शुष्ममिति तन्नामसु पाठात्। बलैः शक्ततुं अतिबलिनामित्यर्थः। अत एव मदच्यु
तं शत्रूणां मदस्य गर्वस्य च्यावयितारं। किंच। शतक्रतुं शतसंख्याकानां क्रतूनां आहर्तारं बहुविधकर्माणं वा। पूर्वोक्तमिंद्रं अयनी वृत्रवधं प्रति प्रेरयि
त्री सूनृतानेन मर्स्मिन् प्रयुक्ता। प्रहर भगवो जहि वीरयस्वेति ब्राह्मणोक्तरूपा प्रियसत्यात्मिका वागपि आरूढ दारूढवती। वृत्रवधं प्रति सापि वागिं

द्रवधस्योत्साहकारिण्यभूदित्यर्थः॥७॥ त्वं गोत्रमंगिरोभ्यः। हे इंद्र त्वं गोत्रमव्यक्तशब्दवं तं वृष्णु दकस्यावरणवंतं मेघं अंगिरोभ्यः अं
गिरसामृषीणामर्थाय अपावृणोः अपवरणं कृतवानसि। हे इंद्रे रावरकं मेघं वज्रेणोदकस्य मेघवर्षणं कृतवानित्यर्थः। यद्वा गोत्रं गो
समूहं पणिभिरपहृतं गुहायां निहितं अंगिरोभ्यः ऋषिभ्यो पावृणोः गुहाद्वारोद्घाटनेन प्रकाशयः। उत अपि च अत्रये महर्षये कीदृशा
य शतदुरेषु शतद्वारेषु यंत्रेषु असुरैः पीडार्थं प्रक्षिप्ताय गातुविन्मार्गस्य लंभयिताभूः। तथा विमदाय चिद्विमदनाम्ने महर्षयेपि सस
नं अन्नेन युक्तं वसु धनं आवहः प्रापितवान्। तथाजौ संग्रामे जयार्थं वसानस्यान्यस्यापि स्तोतुः आद्रिं वज्रं नर्तयन् रक्षणं कृतवानसि।
तिशेषः। अत स्तव महिमा केन वर्णयितुं शक्यत इति भावः॥७॥ त्वमपामपिधाना। हे इंद्र त्वमपामुदकानां अपिधा अपिधानानि आच्छाद
कान्मेघान पावृणोः अपावरिष्ठाः तथा पर्वते पर्वति पूरयितव्यप्रदेशायुक्ते स्वकीये निवासस्थाने दानुमत् दानुमतो हिंसायुक्तस्य
द्वादनुः असुरमाता सैव दानुः तद्वतः तादृशस्य वृत्रादेः वसु धनं अधारयः। शत्रून् जित्वा तदीयं धनमपहृत्य स्वगृहेन्यचिक्षिपदित्यर्थः। य
द्वा दानुमदिति वसु विशेषणं शोभनदानुमित्यर्थः। हे इंद्र त्वं यदा शवसा बलेन वृत्रं पाणां लोकानामावरितारं। तथा शाखांतरे समा
म्नातं। यदिमं लोकादवृणोत्तद्वृत्रस्य वृत्रत्वमिति। अहिं आसमंताद्धोतारं। तथा च वाजसनेयिनः समामनंति। सोग्नीषोमावभिसंब
भूव सर्वाविद्या सर्वं यशः सर्वमन्नाद्यं सर्वां श्रियं स मनुष्येषु सर्वमेतत्समभवत्तस्मादहिरिति। एवंभूतमसुरमवधीः वधं प्रापितः आदित्यं
तरे मेघदिवि द्युलोके दृशे द्रष्टुं सर्वमारोहयः वृत्रेणाहतं सूर्यं तस्मादमुंचत् इत्यर्थः॥७॥ त्वं मायाभिरपमायिनो धमः। हे इंद्र त्वं मायाभिः ज
पोपाय ज्ञानैः माया इति ज्ञाननाम शची माया इति तन्नामसु पाठात्। यद्वा आभिर्लोकप्रसिद्धैः कपटैर्मायिनः उक्तलक्षणमायोपेतान् वृत्रादी
नसुरान् अपाधमः। धमतिर्गतिकर्मेति यास्कः। ये असुराः स्वधाभिर्लक्षणैरन्नैः सुस्वादुभिः शोभनैः स्वकीये मुख एव अजुह्वत् अहोषुः। नाग्नौ।
तानसुरानिति पूर्वेण संबंधः। तथा च कौषीतकिभिराम्नायते। असुरा वा आत्मन्नजुहवुस्ते पराभवन्निति। वाजसनेयिभिरप्या
म्नातं। देवाश्च ह वा असुराश्चास्पर्धंत ततो हासुरा अभिमानेन कस्मै च न जुहुम इति स्वेष्वेवास्येषु जुह्वतश्चेरुस्ते पराबभूवुरिति। तथा हे
नृमणः नृषु यजमानेषु रक्षितव्येषु अनुग्रहबुद्धियुक्तं त्वं पिप्रोः पूरयितुः एतन्नाम्नोऽसुरस्य पुरः पुराणि निवासस्थानानि प्रारुजः प्राभां

णीः। एवं कृत्वा तेनास्करेणोपद्रुतं ऋजिश्वानं ऋजुगमनं एतत्संज्ञकं स्तोतारं दस्युहत्येषु दस्यूनामुपक्षयितॄणां हननेषु युक्तेषु संग्रामेषु
पद्यादस्यूनां हननेषु निमित्तभूतेषु प्रकर्षेण ररक्षिथ। मायिनः मायाच्छद्मस्य शुष्णयादिषु पार्णद्रिः ग्रीयादिव्यश्रेति मत्वर्थीय इनिः। शुष्णो सुमद्री
णो। ७। त्वं कुत्सं। हे इंद्र त्वं कुत्सं कुत्संज्ञकं महर्षिं शुष्णहत्येषु शुष्णः शोषयिता एतन्नाम्नोऽसुरस्य हननयुक्तेषु संग्रामेषु आविथ ररक्षिथ। तथा अतिथि
ग्वाय अतिथिभिर्गंतव्याय दिवोदासाय यत्रांबरं मेतन्नामानमसुरं अरंधयः हिंसां प्रापिपः। तथा महांतं चित् अर्बुदमपि अर्बुदं एतत्संज्ञकमसुरं प
दापादेन निक्रमीः नितरामाक्रमितवान्। यस्मादेवं तस्मात्त्वं नादेव चिरकालादेवारभ्य दस्युहत्याय उपक्षयितॄणां हननायजज्ञिषे सर्वज्ञात्वं दस्यु
हननशीलो भवसीत्यर्थः। ७। त्वे विश्वा। हे इंद्र त्वे त्वयि विश्वा तविषी सर्वं बलं सध्र्यक् सध्रीचीनं अपराङ्मुखं यथा भवति तथा हितानि हितं तव रा
धो मनः सोमपीथाय सोमपानाय हर्षते हृषति किंच तव बाह्वोर्हस्तयोर्हितो वस्थितो वज्रश्चिकेते अस्माभिर्ज्ञायते अतः शत्रोः शत्रूणां युतु वै
रिणः विश्वानि सर्वाणि वृष्णा वृष्णानि वीर्याणि अवबृश्च छेदनं कुरु। ७। विजानीहि। हे इंद्र त्वं आर्यान् विदुषो अनुष्ठातॄन् विजानीहि अतिविशेषेण बुध्य
स्व ये च दस्यवः तेषामनुष्ठातॄणां उपक्षयितारः शत्रवः तानपि विजानीहि इति शेषः। ज्ञात्वा च बर्हिष्मते बर्हिषा यज्ञेन युक्ताय यजमानाय
अव्रतान् व्रतमिति कर्मनाम कर्मविरोधिनः तान् दस्यून् रंधय हिंसां प्रापय। यद्वा यजमानस्य वशं गमय। रंध्यतिर्वशगमने इति यास्कः। किं कुर्वं
न् शासत् दुष्टानामनुशासनं निग्रहं कुर्वन्। अतः शाकी शक्तिपुक्तस्त्वं यजमानस्य चोदिता प्रेरको भव। यज्ञविघातकानस्मात्तिरस्कृत्य यज्ञान्यज
मानैः सम्यगनुष्ठापयेति भावः। अहमपि स्तोता ते तव तानि पूर्वोक्तानि कर्माणि विश्वेत् सर्वाण्येव सधमादेषु सह मदनयुक्तेषु यज्ञेषु स्तोतुं चा
कन् कामये जानीहि। ७। अनुव्रताय। इंद्रः अनुव्रताय अनुकूलकर्मणे यजमानाय अपव्रतान् पराङ्मुखकर्मणः यजमानान् रंधयन् हिंसयन्नश्नी
कुर्वन् वा। तथा आभूभिः आभिमुख्येन भवंतीत्याभुवः स्तोतारः स्तैरनाभुवः तद्विपरीतान् श्नथयन् हिंसयन् वर्तते [illegible]चित् वर्धतः पूर्वं वर्धमानस्यापि पु
नर्वर्धमानस्य यामिनः व्याप्तस्वर्गं प्राप्नुवतः तस्येंद्रस्य स्तवानः स्तुतिं कुर्वाणो वम्रः सुसुक्षिरणशीलः एतत्संज्ञक ऋषिः संदिहः सम्यगुपचिताव
ल्मीकवपाः जघान इंद्रेण परिहितोऽतराम् सन् पृथिव्याः सानुभूतं वल्मीकवपालक्षणं यज्ञसंभारं आहारहितदित्यर्थः। तथा च ब्राह्मणं तस्मा
न्नातं। यद्वल्मीकवपासंभारो भवति ऊर्जमेव पृथिव्या अनुरूपाति। अनु [illegible] अनुकूलव्रतं यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। ७। तक्ष
यत्। हे इंद्र यद् यदा उशना काव्यः सहसा आसीयेन बलेन ते सहः त्वदीयं बलं तनन् तक्षेतवान् सम्यक् कृतीक्ष्णमकार्षीदित्यर्थः। तदा शवः त्वदी

यं मज्मना सर्वस्य शोधकेन स्वतक्ष्यं येन रोदसी द्यावापृथिव्यौ वि बाधेते ते विभीतः इत्यर्थः। तथा चान्यत्राम्नातं यस्य शुष्माद्रो
दसी इ॥ अभ्यसेतामिति। पक्षे रोदसीयस्मात् आद्याद्विभीतस्ते बाधेत इत्यर्थः। हे नृमणः नृषु रक्षितव्येषु यजमानेषु अनुग्रहबुद्धियुक्त इंद्र आ
पूर्यमाणपूर्वोक्ते नबलेनासमंतात् पूर्यमाणं वातंवायुं मनोयुजः मनोव्यापारमात्रेण युक्ताः वातस्य वायोः संबंधिनः तव हर्यश्वाः गच्छंत इत्यर्थः।
एवंभूताः अश्वाः श्रवो अभि हविर्लक्षणमन्नमभिलक्ष्य आवहत् आभिमुख्येन प्रापयंतु। १०। मंदिष्ट यत्। यदा इंद्र उशने काव्यमयमाने
काव्ये सचा सह। मंदिष्ट स्तुतो भूत्। तदनी वंकुवंकुतरा अतिशयेन कुटिलं गच्छंतावश्वौ अधितिष्ठति रथे संयोज्यत मारोहतीत्यर्थः। यद्वा वं
कुरा अतिशयेन वक्रं गच्छंति। रथे वंकुगमनशीलाव संयोज्य योजनीयं तु उग्रः उद्गूर्णबलः इंद्रः ययिं गमनयुक्ता मेघान्स्रोतसा प्रवाहरूपे
णापो निरसृजत् उदकानि निरगमयत्। रथामुच्छस्य शोषयितुः असुरस्य दृंहिताः प्रवृद्धाः पुरो नगराणि निवाससंस्थानानि व्यैरयत् विविधं प्रेरितवा
न्। ११। आ स्मा रथं। अत्र कौषीतकि नइतिहासमाचक्षते। शर्यातनाम्नो राजर्षेर्यज्ञे भृगुगोत्रोत्पन्नश्च्यवनो महर्षिरश्विनग्रहमग्रहीत्। इंद्र
दृष्ट्वा क्रुद्धो भूत्। इंद्रं अनुनीय पुनः सोमं ते सौम्यं प्राहादिति। अयमर्थो स्यामृचि प्रतिपाद्यते। हे इंद्र त्वं वृषपाणेषु शुष्ठ्या सेचनसमर्थस्य सो
मस्य पानं वृषपाणानि तेषु निमित्तभूतेषु रथं आतिष्ठसि स्म स्वयमेव रथमारुह्य गच्छसि। न त्वन्यः कश्चिद्प्रवर्तयितेति भावः। एवं सति य
स्य सोमेषु त्वं मदसे हर्षं प्राप्नोषि ता स्ता सोमाः शार्यातस्य एतन्नाम्नो राजर्षेः संबंधिनः प्रभृताः प्रकर्षेण संपादिताः। अभिषवादिसं
स्कारैः संस्कृता इत्यर्थः। अतः सुतसोमेषु अभिषुतसोमेषु सेद्यिषु यज्ञेषु यथा च यथाकत यथाकामयसे एवमस्याः पि शार्यात
स्य सोमान् कामयस्व तथा सति दिविभक्लोके अनर्वाणं गमनरहितं स्थिरं स्वर्लोके स्तोत्रलक्षणं वचोऽयशो वो आरोहसे प्राप्नोषि। १२
यद्वा इमं यजमानं दिवि द्युलोके उक्तलक्षणं यशः प्रापयसि स्म। १२। अददा अर्भां। अश्वयमाख्यायाः अंगराजः कस्मिंश्चिद्दिवसे स्व
कीयान्निष्केषु रिक्थाः सह गंगायां जलक्रीडां चक्रे तस्मिन् समये दीर्घतमा नाम ऋषिः स्वभार्यया पुत्रैः सह विप्रकृतैश्च कर्बलो किं
मपि कर्मणे न शक्नोतीति तद्द्वेषेण गंगामध्ये प्रचिक्षिपे। स च ऋषिः केनचिद्ग्लुवेन अंगराजस्य क्रीडाद्देशं प्रति समागाम। स च रा
जा सर्वज्ञं तं महर्षिमवगत्य पूर्वादवती यैवमबोचत्। हे भगवन् मम पुत्रो नास्ति एषा महिषी अस्या केचित्सुतं मुत्पादयेति। १४

सच तथेत्यब्रवीत् सा महिषी राज्ञा तेन पुत्रेणाकामयं रुद्रतो राजपुत्रस्थितो मम योग्यो न भवतीति बुध्या स्वकीयां उशिक्संज्ञां दासीं प्रा
हैषीत् ॥ तेन च सर्वदा तेन ऋषीणां मंत्रकृतेन वारिणाऽभ्युक्षिता सती सैव ऋषिपत्नी बभूव तस्या मुख्येनः कक्षीवान्नाम ऋषिः स
एव राज्ञः पुत्रो भूत् स च बहुविधेन राजसूयादिना इजे तेन हृष्टेयंद्रैः परितुष्ट इंद्रो वृचया ख्यातरूपीं योषितं प्रादात् । अयमर्थः ॥१८॥
पूर्वार्द्धे प्रतिपाद्यते हे इंद्र त्वं महते वचस्यवे त्वदीयस्तोत्रलक्षणं वचः सा मनसा इच्छते कक्षीवते सुन्वते सवनेषु यज्ञेषु सोमाभिषवं
कुर्वते एतन्नाम्ने राज्ञे वृचयां वृचयाख्यां अर्भां अल्पवयस्कां युवतीमित्यर्थः एवंभूतां स्त्रियं अददाः ॥ तथा हे सुक्रतो शोभनकर्मन् शोभनप्र
ज्ञावान् हे इंद्र त्वं वृषणश्वस्य एतदाख्यस्य राज्ञः मेना अभवः मेना नाम कन्या भूः ॥ तथा च शाट्यायनिभिः अस्य मंत्रैकदेशव्या
ख्यानरूपं ब्राह्मणमेवमाम्नायते वृषणश्वस्य मेने इति वृषणश्वस्य मेना भूत्वा मघवा कुडवासेति तां च शाट्यायनोवनांस्य यमेवं इत्यध्यक्ष
मेत तथा चेतां डित्वादिभिराम्नातं । वृषणश्वस्य मेना नाम दुहिता सा ता मिंद्रश्चकमे इति अतः उक्तरूपाणि यानि कर्माणि त्वया कृतानि
तानि त्वदीयानि तानि विश्वेत् सर्वाणि एव सवनेषु यज्ञेषु प्रवाच्या प्रकर्षेण वक्तव्यानि स्तुतिभिः स्तोतव्यानीत्यर्थः ॥७॥ इंद्रो अश्रायि ॥ इं
द्रो देवः स्तुध्यः शोभनकर्मणो यजमानान्ससाज्ञात्वा निरेके नैर्धन्ये निमित्तभूते सति तान् रक्षितुं अश्रायि भसे विष्ट पज्रेषु पज्रा इत्यंगिर
सामाख्या । तथा च शाट्यायनिभिराम्नातं पज्रा वा अंगिरसः पशुकामानां तपोतप्यंत पेषु यजमानेषु गिरस्तोम स्तोत्रं निश्चलं तिष्ठति
दुवो नियूपः द्वारि निखाता स्थूणेव तान् रक्षध्य इति पूर्वेणान्वयः ॥ तस्मादिदानीमिति शयः + ति + प्रयंता धनस्य दाता इंद्र इंद्रः एव यजमाना
नां दातु अश्वयुः अश्वानीच्छन् गव्युः गा इच्छन् रथयुः रथानीच्छन् वसूयुः एव मन्युर्दीप्यमानः [illegible] क्षपीच्छन् अक्षपतिर्वर्तते ॥७॥ इदं नमो
वृषभाय स्वराजे ॥ इदं पुरोवर्त्तिनमस्तुतिलक्षणं वचः हे इंद्र तुभ्यमवाचि ॥ अस्माभिः प्रायोजि कीदृशाय वृषभाय वर्षणशीलाय स्वराजे
स्वकीयेन तेजसा राजमानाय सत्यशुष्माय सत्यभूतमिति बलं नाम शत्रूणां शोषकत्वात् । अवितथबलयुक्ताय तव स्त्र्यस्मत्तेव्रज्ञायाः
यस्मादेवं तस्मात् । अस्मिन् वृजने वर्जनवति संग्रामे सर्ववीराः विशेषेण ईरयंत्यमित्राणि निति वीराः भटाः तादृशाः सर्वैर्भटैरूपेता वयं
स्म इति निपातानां शब्दार्थः नवस्म सूरिमनुत्वया दत्ते शोभने गृहे सूरिभिः विद्वद्भिः पुत्रादिभिः सह स्याम भवेम निवसेमेत्यर्थः यद्वा
त्वं बंधि निशोभने यज्ञगृहे सूरिभिः विद्वद्भिः ऋत्विग्भिः सह स्याम शत्रूमेति गृहनो मः ॥७॥ त्यं स्कमेषं ॥ त्यं तं प्रसिद्धं मेषं शत्रुभिः सहस्पर्ध

मानं स्वर्विदं स्वरादिलोकोधारितस्य वेदितारं लंभ्यारंवा ॥ यद्वा ॥ स्वः स्तुत्य अरणीयं धनं तस्य लंभयितारं एवं गुणविशिष्टमिंद्रं । हे अध्वर्योसु मह
यस्मन्यस्तु पूजय यस्येंद्रस्य शातं संख्याकाः ऋत्विजः स्तोतारः साकं सहैव युगपदेवं इंद्रं तेस्तुतो प्रवर्त्तंते । यद्वा । यस्येंद्रस्य रथं शतं संख्या
काः अश्वाः साकं सह इंद्रं नेगमयंति । तमिंद्रं अवसे अस्मद्रक्षणाय सूक्तिभिः सुष्टु आवर्जकैः स्तोत्रैः रथं न यथा रथं प्रति आवर्त्तयामि । कीदृशं
रथं हवनस्य रंहवनं म्लानं या गंवा प्रति वेगेन गच्छंतं वेगगमने दृष्टांतः अत्यं नवाजं गमनसाधनं अश्वमिव ॥७॥ स पर्वतो न धरुणे ॥
अंधसो सोमलक्षणेनान्नेन जर्हषाणः इत्यर्थः ॥ हृष्यन् इंद्रः पयसाः शत्रूयाणां लोकानां आवरीतारं असुरं अवधीत् । हतवान् । कीदृशं शत्रुं नदी
वृतं नदनानां नद्यः आपः ॥ तासां आवरितारं किं कुर्वन् इंद्रः । अर्णांसि जलानि उब्जन् । अधः पातयन् । तदानीं सः इंद्रः । पर्वतो न पर्ववान् शिलोच्चय
इव धरुणेषु बलेषु वा वृधे प्रवृद्धो बभूव ॥७॥ स हि द्वरो द्वरिषु । स पूर्वोक्तगुणविशिष्टः इंद्रः द्वरिषु आवरीवर्तेषु शत्रुषु द्वरो हि अतिशयेनावरीता
खलु शत्रुजयशील इत्यर्थः ॥ यस्मात् ऊधनि उद्धृतजलवत्यंतरिक्षे वव्रः । संभक्तव्याप्यवर्त्तते । अत एव चंद्रबुध्नः सर्वासां प्रजानामाह्लादकमूलः ।
अंतरिक्षस्य सर्वाह्लादकत्वात् । मदवृद्धः । मायंते मिरिति मिर्मदाः सोमास्तैर्वर्धितः एवं भूतः इंद्रो मंहिष्ठ राति प्रवृद्धं प्रवृद्धदानं वा । तमिंद्रं मनीषिभिः
मनस ईप्सितृभिः प्राज्ञैः ऋत्विग्भिः सहस्वपस्यया धिया शोभनकर्मयोग्यया बुध्या अह्वे अह्वयामि । हि यस्मात् त्वं इंद्रः अंधसो अन्नस्य अस्मदपेक्षि
तस्य पप्रिः पूरयिता ॥७॥ आ यं पृणंति ॥ सः प्रसदनस्थानं बर्हिः बर्हिः शब्दो पलक्षितो यज्ञे एषां स्तोमानां ते सोमाः दिविस्वर्गे लोके अवस्थितं यमिं
द्रं आपृणंति आसमंतात् पूरयंति ॥ तत्र दृष्टांतः । स्वभवं नीतिसश्चवो नद्यः समुद्रं न । यथा नद्यः समुद्रं पूरयंति तद्वदित्यर्थः । कीदृशो नद्यः स्वाः स्वसमुद्र
स्य स्वभूताः तथा वा शायते समुद्रायवयुनाय सिंधूनां पतये न महिति । अभिश्रयः अभिमुख्येन गमनवत्यः ऊतयः अवितारो मरुतः वृत्रहत्ये वृत्रहन
नेनिमित्तभूते सति तमिंद्रं अनु तस्थुः अनुलक्ष्य स्थिताबभूवुः कीदृशाः मरुतः शुष्माः शत्रूणां शोषयितारः अवाताः वांति प्रातिकूल्येन गच्छंतीति
वाताः शत्रवः तै रहिताः अह्रुतप्सवः अकुटिलरूपाः शोभनावयवा इत्यर्थः ॥७॥ अभि स्ववृष्टिं ॥ ऊतयो मरुतः मदे सोमपानेन हर्षे सति अस्येंद्रस्य
युध्यतो वृत्रेण सह युध्यमानस्य पुरतः स्ववृष्टिं स्वभूतवर्षं इमं तं वृत्रं अभि आभिमुख्येन सस्रुः । जग्मुः रघ्वीरिव प्रवणे । यथा गमनस्वभावाः

आपः निम्नप्रदेशं गच्छंति। पत्‌ पदाश्रंध सा सोमलक्षणेनांनेन प्रीतेन घृष्यमाणः प्रगल्भः सन्‌ वज्री वज्रवानिंद्रः बलस्य संरण्वतः एतत्संज्ञ
कमसुरं भिनत्‌ द्विदारयत्‌ दरवीदित्यर्थः। तत्र दृष्टांतः। भिनत्ति त्रितः परिधीनिव देवानां हविषे पनिघुर्षणाय अग्नेः सकाशात्‌ अप्स्वेकतो द्वितस्त्रि
तइति त्रिः पुरुषाजज्ञिरे। तथा च तैत्तिरीयैः समाम्नातं। सोंगारेण पुः अभ्यपातयत्‌ तत एकतोजायत स द्वितीयमभ्यपातयत ततो द्वितोजाय
त स तृतीयमभ्यपातयत ततस्त्रितोजायत इति तत्र उदकपानार्थं प्रवृत्तस्य कूपे पतितस्य त्रितिरोधाय असुरैः परिधयः परिधायकाः कूप
स्याच्छादिकाः स्थापितास्तान्यथा सोभिनत्‌ तद्वत्‌। ७। परीं घृणा चरति। यो वृत्रः अपो वृत्वा उदकान्यावृत्य रजसो बुध्नं अंतरिक्षस्योपरिप्रदेशं
आशाय पदाश्रित्य अशेरत तस्य वृत्रस्य प्रवृणे प्रकर्षेण वननीयेनंतरिक्षे वर्त्तमानस्य दुर्गृभिश्वनः दुर्ग्रहव्यापनस्य हव्यापनं न केनापि ग्र
हीतुं शक्यते स इमां लोकान्‌ आवृणोदिति श्रुतेः। एवंभूतस्य वृत्रस्य हन्वोः मुखपार्श्वयोः हे इंद्र यद्यदा तन्यतुं प्रहारं विस्तारयंतं। यद्वा शब्दकारि
णं वज्रं तृतीयार्थे द्वितीया तन्यतुना वज्रेण निजघंथ नितरां प्रजहर्थ तदानीं इं एनं त्वां इंद्रं घृणा शत्रुजयलक्षणा दीप्तिः परिचरति परि
तो व्याप्नोति। त्वदीयं शवो बलं च त्विषे प्रदिदीपे। ७। हृदं नमहित्वा। हे इंद्र यानि ब्रह्माणि स्तोत्रशास्त्ररूपाणि मंत्रजातानि तव वर्धनावर्धयि
तृणि तानि त्वां त्वामृषंति हि नितरां प्राप्नोति एव। तत्र दृष्टांतः। ऊर्मयो जलप्रवाहा हृदं नद्यथा जलाशयं प्राप्नुवंति तद्वत्‌। त्वष्टा चित्त्वष्टा
चिदेव तेतव युज्यं योग्यं शवो बलं ववृधे प्रावर्धयत्‌। अपिच अभिभूत्योजसं शत्रूणामभिभवितॄणां ओजसा बलेन युक्तं वज्रं ततक्ष
तीक्ष्णी चकार। ७। जघन्वानू। हे संभृतक्रतो संपादितकर्मन्‌ संपादितप्रज्ञा वा इंद्र मनुषे जनाय गातुं मार्गं मिच्छन्‌ वृत्रं लोकानामावार
कमसुरं हरिभिरश्वैर्हरिभिर्युक्तस्त्वं जघन्वान्‌ हतवान्‌ खलु तदनंतरं आपो वृष्ण्यदकानि प्रावर्त्तयः इत्यध्याहारः। बाह्वोः त्वदीययोर्हस्त
योः आयसं आयोमयं वज्रं अयच्छथाः अग्रहीः आकारः समुच्चयार्थः सूर्यं च दिवि द्युलोके दृशे द्रष्टुं सर्वेषामस्माकं दर्शनाय अधारयः
स्थापयांचकर्षे। ७। वृहत्स्वश्चंद्रं। वृहद्धृहत्साम स्तोतारो यजमानाः भियसा वृत्रभयेन यत्‌ उपदातु अकृथं उक्थार्हं स्तोत्रयोग्यं अकृणवत तत्र
कुर्वन्‌ कीदृशं वृहत्साम स्वश्चं इत्यक्षीयेन चंद्रेणाह्लादकेन तेजसा युक्तं अभवदमति शत्रून्‌ नरुजत्यनेनेत्यमो बलं तद्युक्तं दिवः स्वर्गस्यारो
हणमारोहणहेतुभूतं एवंविधेन स्तोत्रेण वृत्राशंकिना इंद्रमस्तोषतेत्यर्थः। यत्‌ यदा मानुषप्रधनाः प्रकीर्णान्यस्मिंधनानि भवंतीति यु

५०

द्धं प्रधनमिति संग्रामनाम। मनुष्यरहितसंग्रामाः उत यस्य द्युलोकस्य रक्षितारो मरुतः नृषाचः आणरूपेणासेवमाना भू
वन्‌ इंद्रमिति ते नैव रूपेणान्वमदंननु पूर्वेणा हर्षमापयंत दानीं इंद्रः वृत्रवधं प्रति उद्युक्तो बभूवेति शेषः। ७। द्यौश्चिदस्यामवानू॥
अमवान्‌ बलवान्‌ द्यौश्चित्‌ द्युलोकोपि अस्याहेर्वृत्रस्य स्वनात्‌ शब्दाद्भियसा भयेन अयोयवीत्‌ दित्यर्थं पृथग्भूतः आसीत्‌ उक्तं पतेत्यर्थः। हे
इंद्र तेन वक्तस्याभिषवाद्भिः संस्कृतस्य सोमस्य पानेन मदे हर्षे जाते सति त्वदीयो वज्रः रोदसी द्यावापृथिव्यौ बद्धधानस्यवा
धनशीलस्य वृत्रस्य शिरः यद्यदा शवसा बलेन भिनत्‌ अच्छिनत्‌ तदानीं द्युलोकः भयरहितेन निश्चलो बभूवेति शेषः। ७। यदिन्विंद्र॥
यदिन्नु यदा खलु पृथिवी दशभुजिः दशगुणितः विश्वा सर्वाणि अहानि तत नंत विस्तारयेयुः हे मघवन्‌ धनवन्निंद्र अत्राह अत्रैव पू
र्वोक्तेषु एवदेशकालकर्तृकेषु ते त्वदीयं सहो वृत्रवधादिकारणं बलं विश्रुतं विख्यातं प्रसिद्धं शवसा त्वदीयेन बलेन कृता वर्हणात्‌
त्रादेर्वधरूपा क्रिया यां मनुभवनू अनुभवेत्‌ यथा द्यौर्महतीतथात्वत्कृतं वृत्रादेर्हिंसनमपि महदिति भावः। ७। त्वमस्य पारे। हे धृष
न्मनः शत्रूणां धर्षकमनो युक्त इंद्र अस्य अस्माभिः परिदृश्यमानस्य व्योम्नः व्यापनस्यांतरिक्षस्य रजसो लोकस्य पारे उपरिप्रदेशे वर्त्तमानः
स्वभूत्योजाः स्वभूतबलस्त्वं अवसे अस्मद्रक्षणार्थं भूमिं भूलोकं चकृषे कृतवानसि। किंच ओजसो बलवतो बलस्य प्रतिमानं प्रतिनिधिरभूः
तथा स्वः सुखं अरणायगंतव्यं आपः अंतरिक्षनाम आपोंतरिक्षलोकं आदिवं द्युलोकं च परिभूः परिगृहीतः परिभूर्भवति परिग्रहणार्थे
एषि प्राप्नोषि। ७। त्वं भुवः प्रतिमानं। हे इंद्र त्वं पृथिव्याः प्रथितायाः विस्तीर्णाभूमेः प्रतिमानं भुवः प्रतिमानं प्रतिनिधिर्भवसि यथा भूलो
को महान्‌ अचिंत्यशक्तिः एवं त्वमपीत्यर्थः। तथा ऋष्ववीरस्य वीरवंति विक्रांता भवंतीति वीरा देवाः ऋष्वा दर्शनीया वीराः यस्य सतथोक्तः त
स्य वृहतो वृंहितस्य प्रवृद्धस्य स्वर्गलोकस्य पतिर्भूः पालयितासि तर्हि अंतरिक्षं अंतराक्षांतं द्यावापृथिव्योर्मध्ये वर्त्तमानमाकाशं विश्वं सर्वमपि
महित्वेन सत्यं आप्राः प्राप्ताः निश्चयेन आसमंतात्‌ पूरयः अतस्त्वावान्‌ त्वत्सदृशोन्यः कश्चिन्न कश्चिदस्ति वा नास्तीति यदेतत्तदद्धा स
त्यमेव। ७। न यस्य द्यावापृथिवी। यस्येंद्रस्य व्यचो व्यापनं द्यावापृथिवी द्यावापृथिव्यौ नान्वानशुः ते न संबभूवतुः तथा रजसो अंतरि

८१

श्लोकस्य उपरि सिंधवः स्यंदनशीलाः आपः यस्येंद्र तेजसोंतमवसानं न आनशुः न प्रापुः उत अपि च सोमपानेन मदे च हर्षे सति स्वव
हिंसीकृतवृत्रि वृत्रादि युध्यतः युध्यमानस्यास्येंद्रस्य बलस्यांतं वृत्रादयो न प्रापुः। अतः हे इंद्र एकस्त्वं अन्यत्वव्यतिरिक्तं विश्वं सर्वं भूत
जातं आनुषक् आनुषक् च कृषसकलमपि भूतजातं त्वदधीनं अभूदिति भावः॥७॥ आर्चन्नत्र। हे इंद्र त्वां मरुतः अत्रास्मिन्संग्रामे आर्च
न्नहर भगवो जहि वीरयस्वेत्यनेन वचनेन पूजयन्नतस्मिन्नस्मिन्यद्यदा सर्वस्मिन्नाजौ संग्रामे विश्वे देवासः ते सर्वे दानादिगुणयुक्ताः
मरुतस्त्वा त्वामन्वमिंदन् अनुक्रमेण हर्षं प्रापयन्। यद्यदा त्वदीयमदानंतरं तेपि मदं प्राप्ताः हे इंद्र त्वं यद्यदा वृष्टिमता शत्रूनि
ति भृष्टिं अभ्रिः तद्यथा वधेन हन्नन साध्यनेन वज्रेण अभ्रिमत्वं च ब्राह्मणे समाम्नातं वज्रो वा एष यद्यूपः सोष्टाश्रिः कर्तव्योष्टाश्रिर्वै व
ज्र इति तेन वज्रेण वृत्रस्यानं प्रति आननं मुखं प्रति यद्वाश्वासहेतुं घ्राणं प्रति निजघंथ नितरां प्राहर्षः॥७॥ यू उ षु वाचं। हे महते इं
द्राय स्कवाचं शोभनां स्तुतिं निभरामहे नितरां प्रयुंज्महे उ इति पादपूरणः। यतः विवस्वतः परिचरतो यजमानस्य सदने यज्ञगृहे इंद्रा
य गिरः स्तुतयः क्रियंते हि यस्मात् सः इंद्रः नू चित् क्षिप्रमेव रत्नं रमणीयं मस्कराणं धनं अविदत् विंदति। तत्र दृष्टांतः। ससतामिव यथा
स्वपतां पुरुषाणां धनं चोरः क्षिप्रं लभते तद्वदतोस्मभ्यं धनं दातुं शक्त इति भावः। द्रविणोदेषु धनस्य दातृषु पुरुषेषु दुष्टुतिः असमीचीना
स्तुतिर्न शस्यते नाभिधीयते। अतः स्कवाचं प्रभरामहे इति पूर्वेण संबंधः॥७॥ दुरो अश्वस्य। हे इंद्र त्वं अश्वस्य दुरो दातासि तथा गोः प
श्वादेः दुरो दातासि तथा यवस्य यवादेर्धान्यस्य दातास्य दुरो दातासि वसुनो निवासहेतोर्धनस्य इनः स्वामी पतिः सर्वेषां पालयिता
शिक्षानरः शिक्षतिर्दानकर्मा शिक्षाया दानस्य नेतासि प्रदिवः प्रगल्भः दिवो दिवसा यस्मिंस्स तथोक्तः अकामकर्शनः कामान्कर्शय
ति नाशयतीति कामकर्शनः न कामकर्शनः अकामकर्शनः। अव्ययपूर्वपदप्रकृतिस्वरत्वं हविर्दत्तवतां यजमानानां कामानभिमतफ
लप्रदानेन न पूरयतीत्यर्थः। सखिभ्यः समानख्यानेभ्यः ऋत्विग्भ्यः सखा सखिवदस्यंतं प्रियः एवंभूतो यः इंद्रस्तं प्रति इदं स्तोत्रं लक्षणं वचः
गृणीमसि ब्रूमहे॥७॥ शचीवइंद्र। शचीवः शचीति प्रज्ञानाम हे इंद्र शचीवः प्रज्ञावन्। पुरुकृत्सभृतस्य वृत्रवधादेः कर्तः। द्युमत्तम अतिश

येन दीप्तिमन्तः अभितः सर्वत्र वर्तमानानं वसु यदस्ति न दिदं न येत् नवैव स्वभूतमिति चेकिते भृशमस्माभिः ज्ञायते अतः कारणात् इनं संगृभ्य स
म्यक् गृहीत्वा अभिभूते शत्रूणामभिभवितः ~~परिहीनं मा काः परेः अपर येत्यर्थः~~ आभर अस्मभ्यमाहर देहीत्यर्थः। त्वायतः त्वामात्मन इच्छतो जरितुः
स्तोतुः कामम् अभिलाषं माजूनयीः परिहीनं मा काः परेः ऽपर येत्यर्थः॥७॥ एभिर्द्युभिः। हे इंद्र एभिरस्माभिर्दत्तैः द्युभिः दीप्तैश्चरू पुरोडाशादिभिः एभि
रिंदुभिः पुरोवर्तिभिस्तुभ्यं दत्तैः सोमैश्च प्रीतस्त्वं अस्माकं अमदारिद्र्यं गोभिस्त्वया दत्तैः पशुभिः अश्विना अश्वयुक्तेन धनेन च निरुंधानो निवर्त
यंस्तु मनाः शोभनमनाः भव। वयमिंदुभिरस्मत्कृतदत्तैः सोमैः प्रीतेनेंद्रेण दस्युं उपक्षपयितारं शत्रुं दस्योंतो हिंसंतः अत एव युतद्वेषसः पृथग्भूत
शत्रुकाभूत्वा इषा इंद्र दत्तेनान्नेन दस्युं संरभेमहि तथा वाजेभिः बलैः संरभेमहि। कीदृशैर्वाजैः पुरुश्चंद्रैः पुरूणां बहूनां आल्हादकैः अभिद्युभिः अ
भितो दीप्यमानैः किंच देव्या द्योतमानया प्रमत्या त्वदीयया प्रकृष्टया बुध्या संरभेमहि कीदृश्या वीरशुष्मया वीरं विशेषेण शत्रूणां क्षेपणं समर्थ
शुष्मं बलं यस्याः सा तथोक्ता। गोअग्रया स्तोतृभ्यो दानार्थम् अग्रे प्रमुखत एव गावो यस्याः सा तथोक्ता अश्वावत्या अश्वैरुपेतया॥७॥ ते त्वा मदाः।
हे सत्पते सतां पालक इंद्र वृत्रहत्येषु वृत्रहनने निमित्तभूते षु सत्कृते पूर्वोक्ताः मदाः मादकाः मरुतः त्वा त्वाममदन् ते सोमासः अभिषुताः सो
मोश्च ममदन् यद्यदा कारवे स्तुतिकर्त्रे बर्हिष्मते यज्ञवते यजमानाय दश सहस्त्राणि अपरिमितानि वृत्राण्यावरकाणि उपद्रवजातानि अप्रति
शत्रुभिरप्रतिगतस्त्वं निबर्हयः न्यवधीः तदानीमिति पूर्वेण संबंधः॥७॥ युधायुधा नुप। हे इंद्र धृष्णुया शत्रूणां धर्षकः त्वं युधा युद्धेन संबद्धं उपय
देषि उपैव गच्छसि सर्वदा युद्धशीलो भवसीत्यर्थः। घेति पादपूरणः। शत्रूणाम् असुराणां पुरा पुरेण नगरेण रहः इदं पुरो बहूनि पुरं शत्रुनगरं ओज
सा बलेन संहंसि सम्यग्विनाशयसि शत्रूणां पुराण्यभैत्सीरित्यर्थः। हे इंद्र त्वं नम्या शत्रुषु नमनशीलेन सख्या सहायभूतेन वज्रेण परावति दूर
देशे नमुचिं नामानं अनया संतया प्रसिद्धं मायिनं मायाविनं असुरं यद्यस्मात् निबर्हयः नितरामहिंसीः अतस्त्वमेवंरूपस इत्यर्थः॥७॥ त्वं करंजो।
हे इंद्र त्वं करंजं एतत्संज्ञकमसुरं उत अपि च पर्णयं एतन्नामानमसुरं च अतिथिग्वस्य एतत्संज्ञकस्य राज्ञः प्रयोजनाय तेजिष्ठया अतिशयेन ते
जस्विन्या वर्तनी वर्तन्या शत्रुप्रेरणकुशलया शत्रुक्षयावधीः हतवानसि तथा अनुदः अनुपश्चाद्यतिरवंड यतीत्यनुदः अनुचरः तादृशानुचरर
हितः एक एव त्वं ऋजिश्वना एतत्संज्ञेन राज्ञा पुरुहूतः परिवृष्टः शतानि शतानि संख्याकाः वंगृदस्य एतत्संज्ञस्यासुरस्य पुरः पुराणि नगरा

(82)

3,

णि अभि नतृ बिभि दिधिषेव यो ॥ ७ ॥ त्वमेतां जनराज्ञः । हे इंद्र श्रुतः प्रख्यातस्त्वं द्विर्दश विंशति संख्याकान् अबंधुना बंधुरहितेन सहाय
रहितेन सुश्रवसा एतन्नामकेन राज्ञा युद्धार्थमुपजग्मुषः उपगतवतः एतानेवं विधान् जनराज्ञो जनपदानामधिपतीन् । षष्टिमित्यादिना ते
षां राज्ञामनुचरसंख्योच्यते षष्टिं सहस्रा सहस्राणां षष्टिं नवतिं नव संख्योत्तरां नवतिं । तान्राज्ञः इदं संख्याकाननुचरांश्च रथसंबंधिना दु
ष्पदा दुःप्रपदेन शत्रुभिः प्राप्तुमशक्येनेत्यर्थः । ईदृशेन चक्रेण न्यवृणक् न्यवर्जयः व्याप्तवंतः । सुश्रवसो जयार्थं त्वमागत्य तदीयान् शत्रून
जौषीरित्यर्थः । जनराज्ञः समासांतविधेरनित्यत्वात् टजभावः । तज्जंच्छब्दो राजदीनामाबित्यस्मात् निप्रत्ययांतओ युदात्तः ॥ ७ ॥ त्वमा
विथ सुश्रवसं । हे इंद्र त्वं तवोतिभिः त्वदीयैः पालनैः सुश्रवसं पूर्वोक्तं राजानमाविथ ररक्षिथ तथा तूर्वयाणं एतन्नामानं तव त्राणैः त्वदीयैस्त्रा
यकैः पालकैः बलैः रक्षथेति शेषः । किंच त्वं महते पूने तरुणाय अस्मै सुश्रवसे राज्ञे कुत्सादीन् नूराज्ञः अरंधनायः वशमनयः । रध्यतिर्वशग
मने ति गमनेपि दृश्यत इति यास्कः ॥ ७ ॥ य उदृचीन्द्र । हे इंद्र ये वयं उदृचि उदर्के यज्ञसमाप्तौ वर्तमाना देवगोपाः देवैः पालितास्ते तव सखायः स
खिवत्सेवकाः अत एव शिवतमाः अत्यंतमतिशयेन कल्याणाः अभूम तेवयं यज्ञस्य समाप्त्युत्तरकालमपि त्वां स्तोषाम स्तवाम अ
स्माभिस्तुतेन त्वया सुवीराः शोभनपुत्रवंतः संतः द्राघीयः अतिशयेन दीर्घमायुर्जीवनं प्रतरं प्रकृष्टतरं यथा भवति तथा दधानाः धारयंतो भू
यास्म ॥ ७ ॥ मा नो अस्मिन् । हे मघवन् धनवन्निंद्र अस्मिन् परिदृश्यमाने अंहसि पापे पृत्सु एतन्नामसु पापफलभूतेषु संग्रामेषु च नोस्मान्मापर्ष
षीः रिति शेषः । यस्मात्तेतव शवसो बलस्यांतो नि वानप्राप्तुं न परिणशे परितो व्याप्तुं न हि शक्यते सर्वोपि जनस्त्वदीयं बलमतिक्रमितुं न
शक्नोतीत्यर्थः । तस्मात् स्वमंतरिक्षे वर्तमानो रोरुवत् दस्येथ शब्दं कुर्वन् घोनदीः वनात् संबंधीन्युदकानि वाक्रंदयः शब्दयसि क्षोणीः क्षोण्यः क्षो
णीति पृथिवीनाम तदुपलक्षितास्त्रयो लोकाः भियसा त्वद्रूपेण कथाकथं न समारतनन् संगच्छंते त्वदीयं बलमवलोक्यत्र योपि लोका बि
भ्यतीति भावः ॥ ७ ॥ अर्चा शक्राय । हे अध्वर्यो शाकिने शक्तियुक्ताय शचीवते प्रज्ञावते शक्राय इंद्राय अर्च । एवंविधमिंद्रं पूजय । किं कुर्वन्तु ८२
तीश्च शृण्वंते समीचीनेयं स्तुतिरिति जानंतं तं इंद्रं महयन् पूजयन् अभिष्टुहि आभिमुख्येन तस्य स्तोत्रं कुरु । इंद्रः धृष्णुना शत्रूणां धर्षकेण

शवसा बलेनउभे रोदसी द्यावापृथिव्यौ व्यंजते नितरां प्रसाधयति ऋजतिः प्रसाधनकर्मेति यास्कः । सः इंद्रः वृषा सेचनसमर्थः । वृष
ण्वान् वृषत्वेन अनेन वसेचनस्य सामर्थ्येन वृषभो वर्षिता कामानां । पद्यापृथ्वुदकानां । अर्च शपः पीत्वात् दनुदात्तत्वेन धातुस्वरः ॥ ७ ॥ अर्चा
दिवे बृहते । हे स्तोतः दिवे द्योतमानाय बृहते महते इंद्राय शूष्यं शूषमिति सुखनाम । तत्र साधु शूष्यं तादृशं स्तुतिलक्षणं वचः अर्च उच्चारय या
स्येंद्रस्य धृषतः शत्रून् धर्षयतः स्वक्षत्रं स्वभूतं धनमनो धृषत् धृष्णु भवतीति हि षः स हि खल्विंद्रः बृहच्छ्रवाः प्रभूतयशाः असुरः शत्रूनिरसिता
यद्वा असुः प्राणो बलं तेन तद्वान् मत्वर्थीयो रः असवः प्राणाः ते न चापोहि लक्ष्यंते प्राणा वा आप इति श्रुतेः । तान्राददातीति सुरः बर्हणा श
त्रूणां निबर्हता यो हरिभ्यां अश्वाभ्यां पुरस्कृतः पूजितः वृषभः कामानां वर्षिता रथो रहणशीलः ॥ ७ ॥ त्वं दिवो बृहतः । हे इंद्र त्वं बृहतो महतो
दिवो द्युलोकस्य सानु समुच्छ्रितं उपरिप्रदेशं अकोपयः अकंपयः धृषता शत्रूणां धर्षयिता त्मना आत्मना स्वयमेव शंबरं एतत्संज्ञक
मसुरं अवाभिनत् अवधीः । यद्यदा दिनः शत्रून् तून् मद्भुवा अवेप्रामान्यद्धावेदसमूहः अस्करसमूहवतो मायिनो मायाविनो सुराश्च दिनाहृष्टम
न धृषद्धृषता प्रागल्भ्यं प्राप्नुवता मनसा युक्तः त्वं निशिताती क्ष्णीकृताग्रं नसि हस्तेन गृहीतो ॥ युद्भागन्ने शिरितिर त्रिमनांतद्वती शत्रानी
वज्रं पतन्यसि तान् असुरान् जेतुं पतनारूपेणेच्छसि तान्प्रति प्रेरयसीत्यर्थः । तदानीं बृहतो दिवः सानु कोपय इति पूर्वेणान्वयः ॥ ७ ॥
नि यद्वृणक्षि ॥ हे इंद्र त्वं शोरुवन्मेघैरत्यर्थं शब्दयं श्वसनस्यांतरिक्षे श्वसतीति श्वसनो वायुः ॥ तेभ्रंदिनः स्वकिरणे राजम्रकलादीन्मृदुभा
वं प्रापयतः शुष्णस्य चित्ररसानां शोषयितुः तस्यापि मूर्धनि उपरिप्रदेशे शोषनादनान्युदकानि यद्यस्मात् नि वृणक्षि आवर्जयसि पातयसी
त्यर्थः ॥ यमुना सूर्यकिरणैश्च वृष्टाः आपः सूर्यस्योपरि पुनरवस्थाप्यंते तासां हृगवस्थापनमिंद्रः करोतीत्यपच्यर्यते प्राचीनेन प्रकर्षेण मं
त्राणां अपराङ्मुखेनेत्यर्थः ॥ बर्हणावता निबर्हयतीति बधकर्मसु पाठात् ॥ बर्हणा शत्रूणां हिंसा तद्वता एवंभूतेन मनसा युक्तस्त्वं यद्य
स्माद्यान्विदधापि कृण्वः घर्मकाले सूर्यस्योपरि भौमान् रसानवस्थापयसि वर्षासु च वर्षसीति यस्मादेवं चकर्षेत स्मात्कारणात् तां प

83

रिउपरिकोवर्ततेनकोपीत्यर्थः॥अतस्त्वमेवसर्वाधिकइतिभावः॥धृष्णक्षिरजिवर्जने।७।त्वमाविथनर्यंहेइंद्रत्वंनर्यादीनृत्रीनृशासःस्त्रा
विथरक्षितवथ।हेशातक्रतोबहुविधकर्मन्बहुविधप्रज्ञावात्वंवैय्यंवैय्यकुलजं।तुर्वीतिंनामानंराजानंआविथैस्वेव।अपिचत्वंरथंरंभणस्व
भावंमेतत्संज्ञकमृषिएतत्संज्ञकंधनेनेनचनिमित्तेसंग्रामेकृत्व्येकृत्येसतिआविथतिशेषः।यद्वापूर्वोक्तानाराज्ञांरथं।एतत्शब्दइत्यश्वना
मएतनश्वंचररक्षिथेतियोज्यं।यथात्वंशंबरस्यनवतिंनवनवोत्तरनवतिसंख्याकाःपुरःपुराणिदंभयः।अनीनशः।७।सघाराजा।सघस
खलुजनोजातोराजाराजमानःसत्पतिःसतांपालयितायजमानःशुशुवत्।आत्मानंवर्धयतियःइंद्रंप्रतिरातहव्योदत्तहविष्कः।शासंइंद्र
कर्तृकमनुशासनं।यद्वातस्यस्तुतिंइन्वतिव्याप्नोतिउक्थावा।उक्थानिशस्त्राणिवायःस्तोतारायसाहविर्लक्षणेनानेसहाभिर्दणा
तितस्याभिमुखीकरणायसूनसतिअस्मैस्तोत्रेदानुरभवत्।फलप्रदानेइंद्रउपराउपरिमेघान्।उपरइतिमेघनामसुचयास्केनैवं
निरुक्तः।उपरउपलमेघोभवेत्कपपरमंतेस्मिन्नभ्राण्युपरताआपइति।चेतितान्मेघादिवःसकाशात्सिन्वतेचेतपतिदोग्ध्रीतियावत्।
।७।असमंक्षत्रं।इंद्रस्यक्षत्रंबलमसमंअनकेनचित्समंसर्वाधिकमित्यर्थः।तथामनीषाबुद्धीश्चअसमानकस्यापिबुध्यासमानास
र्ववस्तुविषयेकरोतीत्यर्थः।तेमदइतिसर्वनामशब्दःएतच्छब्दसमानार्थः।तेमेएतेसोमपाःसोमस्यपातारोयजमानाःअपसाकर्मणा
प्रसंतुवृद्धाभवंतु।हेइंद्रतेतवदद्गुषोहविर्दत्तवतोयेयजमानेभ्योभागफलंदत्तवतस्तवेतियोजनीयं॥७।तुभ्येदेदेबकुला।हेइंद्रतु
भ्येत्तुभ्यमेवचसमाःचम्वंतेभक्ष्यंतइतिचमसाःसोमाः।एतेसोमाःत्वदर्थंसंपादिताःकीदृशाइत्याह।बकुलाःप्रभूताःअद्रिदुग्धाःअ
द्रिभिर्ग्रावभिःशभिषुताश्चनृषदश्चनृषुचमसेषुव्यवस्थिताःइंद्रपानाःइंद्रस्यपानेनकरवकराः।अतस्त्वताअस्तुहियाननुहियापच
एवात्वदीयानांनिद्रियाणांकामममभिलाषंतेत्तर्पयइरपेतियावत्।अथानंतरंवसूदेयायअस्मभ्यमभिप्रतिधनप्रदानायत्व
दीयंमनःकृष्वकुरुष्व।७।अपामतिष्ठत्।अपांह्युदकानांधरुणह्वरंधरुणंशब्दोधुरावचनःधारानिरोधकंतमोधकारप्रतिष्ठवत्रूअ
यनेवार्थः।स्पर्धीक्रियतेवृत्रस्यलोकत्रयमवस्तिदसुरस्यजठरेषुउदरप्रदेशुअंतर्मध्येपर्वतःपर्वणवानमेघोभूत्।अतस्तनोरूपेणवृत्रे
णमेघस्यावृतत्वात्।इध्युदकमप्यावृतमित्युच्यते।इमाःपूर्वोक्तानद्योनदीःअपःनदनानद्यइतियुस्मानदीशब्दोनापउच्यंते।वृण

५३

वत्रिणशावरकेणवृत्रेणाहिताःपिहिताविश्वाःव्यापिनीअनुष्ठाःअनुक्रमेणगतिष्ठतीः।एवंविधाःअपःइंद्रःप्रवणेषुनिम्नेषुप्र
देशेषुअभिजिघ्नतेअभिगमयति।७।सशेवृधमधिधाः।हेइंद्रसत्वंअस्मेअस्मासुद्युम्नंयशःअधिधाःआधिनिधेहि।कीदृशा
मित्याह।शेवृधंशंसमानंरोगाणांशमनेसतियद्वर्धतेतादृशं।तथामहिमहत्।जनाषाट्शत्रुजनानांअभिभवितृतथ्यंप्रवृद्धक्ष
त्रंबलंचअधिधाइतिशेषः।किंच।हेइंद्रनोस्मान्मघोनोधनवतःकृत्वारक्षपालयसूरीन्विदुषोनःपिपाहिपालयतथारायेधनाय
चस्यपत्येशोभनपुत्रयुक्तायइषेनायचनोस्मान्धाधेहिस्थापय।७।दिवश्चित्।अस्यइंद्रस्यवरिमाउरुत्वप्रभावंदिवश्चित्द्युलोका
दपिविपप्रथेविस्तीर्णंबभूवपृथिवीचनपृथिव्यपिचमह्नामहिम्नामहित्वेनइंद्रंनप्रतिभवतिभूमिरपीइंद्रस्यप्रतिनिधिर्नभवतित
तोपीद्रोगरीयानित्यर्थः।भीमःशत्रूणांभयंकरःतुविष्मान्त्सत्त्वावान्बलवान्वाचर्षणिभ्योमनुष्येभ्यःस्तोतृभ्यःतेषांमर्यायशत्रूणां
मालपःआसमंतात्तापकारीएवंविधःसइंद्रःवज्रंजनुशीलकार्ष्णिनापुधंतेजसेतैक्ष्ण्यायशिशीतेतनूकरोतितीक्ष्णीकरोतितत
त्रदृष्टांतःवननीयगतिमन्वृषभोयथास्वश्रृंगेयुद्धार्थंतीक्ष्णीकरोतितद्वत्।७।सोअर्णवोना।सइंद्रःसमुद्रियःसमुद्रवत्समुद्रादापद्र
तिसमुद्रमंतरिक्षंतत्रभवःसमुद्रियःएवंभूतःसन्वरीमभिःस्वकीयैःसंवरणैःयच्छउरुत्वैर्विश्रितःव्याप्ताःनद्योनदीःशब्दकारिणीः
वृत्रेणावृताअपःअर्णवोनसमुद्रइवप्रतिगृणातिस्वीकरोतिचवर्षतीतिभावः।सचेंद्रःसोमस्यपीतयेपानायवृषयतेवृषइवाचरतिहर्ष
युक्तोवर्ततेइत्यर्थः।तथासइंद्रःपुर्व्यःयोज्ञासनात्स्विरादेवायद्दासनातनःओजसाबलकृतेनवृत्रवधादिरूपेणकर्मणापनस्यतेप
नस्तोत्रमिच्छति।७।त्वंतमिंद्रपर्वतं।हेइंद्रत्वंभोजसेभोजनायपर्वतंपर्ववंतंमेघंनाकाथष्टःनहिहतोभुंक्षेइंद्रोहिवर्षणार्थंमेघंवज्रेणहंति
तथामहतःन्मात्मस्यधनस्यधर्मणांधारयितॄणांकुबेरादीनांइंद्रज्यसि।इंशिषेइंद्रज्यतीति।ऐश्वर्यकर्मा।सइंद्रोदेवतावीर्येणअतिशायित
इतिप्रचिकितोप्रकर्षेणास्माभिर्ज्ञातोबभूव।सचोग्रःउद्गूर्णःइंद्रःविश्वस्मैसर्वस्मैवृत्रवधादिरूपायकर्मणेदेवैःपुरोहितःपुरस्तादवस्था
पितः।७।सइद्वनेनमस्युभिः।सइत्सएववेइंद्रःवनेअरण्येनमस्युभिःनमस्तोत्रेणपूजयितृभिःवचस्यतेवचइच्छन्क्रियतेश्रूयतेइत्यर्थः।

(54)

यद्वा । वच्यस्तोत्रमात्मन: इच्छति स चेंद्र: आत्मीयेषु जनेषु इंद्रियं स्ववीर्यं प्रब्रुवाण: प्रकटयन् चारु विधत्ते नर्तनं । किं च स कामानां वर्षक: हर्यत: प्रेप्सावतो यक्षत: धृष्णु उपच्छंदयित्वा अवति यीयक्षतानां पुरुषाणां यागे रुचिमुत्पादयतीति भाव: । वृषा हविषां वर्षयिता हवि: प्रदातेत्यर्थ: । मघवा धनवानेवंभूतो यजमान: क्षेमेण इंद्रकृतेन रक्षणेन युक्त: सन् । यत् यस्य दाधेन यजमानेन कृता स्तुति: यद्यस्मात् इंद्र च्यति याति तस्मादिति योज्यं ॥७॥ स इन्द्र महानि । स इंद्र स एवेंद्रो युध्मो योद्धा महानि समिथानि महान्ति संग्रामान् मज्मना सर्वस्य शोषकेन ओजसा कृणोति करोति किमर्थं स्तोतृजयार्थं यद् इंद्रो बलवानिति पठ्यते तत्सत्यमेवेति सर्वे प्रतिपद्यन्ते महानि महान्तीत्यस्य नकारलोपश्छांदस: यद्वा महनीयानि पूज्यन इति महानि प्रशस्तानि धनार्थं कविदानमितिक: दानाय मन: हे सोम पावन् सोमस्य पात: इंद्र तेवदीयं मन: दानाय अस्मदभिमतफलप्रदानाय अस्तु भवतु हे वंदनश्रुद् वंदनानां स्तुतीनां श्रोत: हरीत्वदश्वौ अस्मद्यज्ञाभिमुख्ये आकृधि आभिमुख्येन कुरु हे इंद्र ते तव स्वभूता ये सारथय: संति ते यमिष्ठास: अतिशयेन यंतार: अश्वनियमकुशला इत्यर्थ: । यस्मादेवं तस्मात्केनापि प्रातिकूल्य हातारं कर्णय: स्वकीयायुधादीनां [illegible] तीक्ष्णा: शत्रवे त्वां नादभुवंति नहंतिसंति ॥७॥ अप्रक्षितं वसु । हे इंद्र त्वं अप्रक्षितं प्रक्षयरहितं वसु धनं हस्त्यो बिभर्षि स्तोतृभ्यो धारयसि तथा श्रुत: प्रख्यात भवान् [illegible] आत्मीये शरीरे षाळ्हं शत्रुभि: अनभिभूतं सहो बलं दधे धारयति त्वदीयास्तनयभि: कर्तृभि: वृत्रादेरसुरस्य वधं कुर्वद्भि: बलकृतै: कर्मभि: आवृतास: बलकृतानि सर्वाणि कर्माणि यस्य शरीरमावृत्यातिष्ठंते तत्र दृष्टांत: । अवता सोन अवत इति कूपनाम यथा कूपा: जलोद्धरणाय प्रवृत्तै: प्राणिभि: आव्रियंते तद्वत् यस्मादेवं तस्मात् हे इंद्र ते तव शरीरे शुक्रजव: कर्माणि भूरय: बहूनि विधंते ॥७॥ एष प्रपूर्वी: । पूर्वाणि: अता एष: इंद्र: नस्य यजमानस्य पूर्वी: प्रभूता: चत्रिष: चमूषु च चमसेषु अवस्थिता: सोमलक्षणा: इष: प्राचोदयन्त । प्रकर्षेण पानार्थं मुद्दरति तत्र दृष्टांत: अत्सो न यो षाय थाश्वो वडवां काम्यार्थमुपगच्छति स चेंद्र: हिरण्ययं स्वर्णमयं हरियोग हरिभ्यां युक्तं कल्पमुरु भासमानं तं माहत्यावल्गा महेमहते रथं वथा विरूपाय कर्मणे दक्षं प्रवृद्ध नास्मान सोमं पाययते पानं कारयति पूर्वी: प्रभूपालनपूरणयो: ॥७॥ तस्

नीयो: स्तोता यं जमानोरं नेमं निषद नमस्कारपूर्वं गच्छत: यद्वा नीतहविष्का: परीणास: परितो व्याप्नुवंत: एवं गुणविशिष्टा: यजमाना: तमिंद्रं स्तुतिभि: अधिरोहंति स्तुवंतीत्यर्थ: तत्र दृष्टांत: । सनिष्यव: सनिं धनमात्मानमिच्छंतो वणिज: धनार्थं सचरणे संचारे निमित्तभूते समितः मुद्रं न यथा नावा समुद्रमधिरोहंति एवं स्तोतारोपि स्वाभिमतधनलाभाय स्तुवंतीति भाव: । त्वच दक्षस्य विदथस्य यज्ञस्य पतिं पालयितारं सह: सहस्वंतं बलवंतमिंद्रं तेजसा देवता प्रकारेण स्तोत्रेण नु क्षिप्रं अधिरोहत स्तुहीत्यावत् । तत्र दृष्टांत: । ग्नाना: क्रांत: स्त्रिय: गिरिं न यथा पोर्वतस्याभिमत फलप्राप्त्यर्थं अधिरोहंति ॥७॥ स तुर्वणिर्महान् । स इंद्र: तुर्वणि: शत्रूणां हिंसिता क्षिप्रकारी वा तुर्वणिस्तूर्णवनिरिति यास्क: । तूर्णसंभजन इति तस्यार्थ: । महान् अरेणुश्च भवति तस्य इंद्रस्य शत्रवो बलपौंस्ये वीरै: पुरुषै: कर्तव्ये संग्रामे अरेणु अनवद्यं तु या शत्रूणां हिंसकं सत्व भ्राजते दीप्यते तत्र दृष्टांत: । गिरेर्भृष्टिन पर्वतस्य शृंगमिव यथा उन्नतं सदीप्यते तद्वत् । आयस: अयोमयाय यवयुक्तदेह: उग्रे: उग्राणां शत्रूणां धर्त्ता वस्थापयिता एवंभूत इंद्र: मदे सोमपाने नहर्षे सति येन बलेन शुष्णं सर्वस्य शोषकं मायिनं मायाविनं आ वृकार गृह्य हेतु सोमनिर्वर्षके निगडे निरामयनू । न्यवासयत् तद्बलमिति पूर्वेणान्वय: । तुर्वणि: तुर्वी हिंसार्थ: ॥७॥ देवी यदि तविषी । यु: इंद्र: धृष्णुना धर्षकेन त्रावसा बलेन तमस्तमोरूपं वृत्रादिमसुरं बाधते हि नेत्ति ऋतयेरणाय स्तोतृ धात्वया स्तोत्रा वर्धितं तमिंद्रं देवी तविषी द्योतमानं बलं यदि यदा सिषक्ति समवैति समय इति सेवित इति यास्क: सूर्य उषसं यथा उषोदेवतां सेवते नित्यसंबंधो भवतीत्यर्थ: । तदानी अहरिष्वनि: गृष्णुतो हरतीत्यर्थ: । रात्रव: तेषां यथोत्पादनेन स्वदयिता शत्रूव्यथिता इंद्र: रेणुरेषणां हिंसं हस्त्र तं इयत्ति प्रारनामयनि त्वार धालयावधूपिन इति यास्क: ॥७॥ वियत्तिरोधरुणो यच्छा तिर: वृत्रेण तिरोहितं धरुणं सर्वस्य प्राणिजातस्य धारकं अच्युतं विनाशरहितं रज: उदकं दिवो द्युलोकादन्तरिक्षात् [illegible]

दिवो धरूणं। हे इंद्र माहिनः प्रवृद्धस्त्वं दिवो द्युलोकात् पृथिव्याः सदनेषु प्रदेशेषु ओजसा बलेन धरुणं सर्वस्य जगतो धारकं दृश्जिलं शिषे दधि
षे ख्यापयसि यस्मात् त्वत्कृतस्य सोमस्य पानेन मदे हर्षे सति अपो जलानि अरिणाः मेघान्निर्गमयः वृत्रस्य आवरकं वृत्रं च समृणाः ध्वंसयः पाषा
शिलया पाषाणरूपया व्युरुज विशेषेण भाङ्क्षीः॥७॥ अमहिष्ठाय। महिष्ठाय महते दीनकर्मेति यास्कः। दातृतमाय बृहते गुणैर्महते बृहद्दिये महाध
नाय सत्यशुष्माय अवितथबलाय नवसे आकारतः प्रवृद्धाय एवंगुणविशिष्टायेंद्राय मितिं मननीयां स्तुतिं प्रभरे प्रकर्षेण संपादयामि यस्
येंद्रस्य बलं दुर्धरं अन्यैर्धर्तुमशक्यं तत्र दृष्टांतः प्रवणे निम्नप्रदेशे अपामिव यथा जलानां मेघः केनाप्यवरोद्धुं पूरयितुं न शक्यते तेन दत्तं तथा
राधो धनं विश्वायु सर्वेषु व्याप्तं स्तोतृणां बलाय पयेनैस्तोत्रेण पाश्रतं अपगतावरणं क्रियते तत्स्येंद्रस्येति पूर्वेण संबंधः॥७॥ अध ते विश्वं।
अध हअनंतरं हे वहे इंद्र विश्वं सर्वमिदं जगत् तेतव संबंधिने इष्टये यागाय अन्वभूत् अन्वभवत् यद्वा इष्टये हविरादिभिस्तव प्राप्तये इति योज्यं।
हविष्मतो यजमानस्य सवनानि सवनानि यज्ञजातानि निम्नेव निम्नानि भूस्थानानि आप इव ताः संभजंत इति शेषः। हर्यतः शत्रुवधं प्रेरयतः
इंद्रस्य हर्यतिः प्रेप्साकर्मेति यास्कः। यद्वा हर्यतः शोभनः। हिरण्ययो हिरण्मयः श्नथिता शत्रूणां हिंसनशीलः वज्रः पर्वते पर्वणि शिलोच्चये
वृत्रे वा येघ दानसुमद्रीलनतसं। स्वप्नोनाभवत् किंतु जागरितः संनद्धो धीरित्यर्थः। यदा इंद्रेण प्रेरितो वज्रः अप्रहतः सन् वृत्रमवधीत् तदा प्र
भृत्येव तं यष्टुं सर्वे यजमानाः प्रावर्तिषत इति भावः॥ अध्वर्यु भ्यं दस पत्यं॥७॥ अस्मै भीमाय। हे उषः उषो देवते शुभ्रे शोभने त्वं भीमाय शत्रूणां
भयंकराय पूर्तीयसे अतिशयेन स्तोतव्याय अस्मा इंद्राय अध्वरे हिंसारहिते स्मिन् यागे नेति संप्रत्यर्थे तथा च यास्कः। अस्तुपमार्थे
स्य संप्रत्यर्थे प्रयोग इहैव निधेहीति संप्रति दानीं नमसा नमो हविर्लक्षणमन्नं समाभर सम्यक् संपादय धामस्य सर्वस्य धारकं नाम स्तोत्र
श्रुनमनशीलं प्रसिद्धं वा इंद्रियं इंद्रत्वस्य परमैश्वर्यस्य योग्यं यस्येंद्रस्य एवंविधं ज्योतिः श्रवसे नायेह विलक्षणा नलाया अर्थ अयसे इतस्ततो
गमनाय अश्वा रिरिच्यते हरितो न यथा अश्वान् सादिनः स्वाभिलषितदेशं गमयंति तद्वदिंद्रोपि स्वाभिनत हविर्लाभाय स्वकीयं तेज्यो
गमयती तिभावः॥७॥ इमे त इंद्र ते वयं। हे इंद्र प्रभूवसो प्रभूतधन रनत एव पुरुष्टुत पुरुभिर्यजमानैः स्तुत ये च एवं त्वा त्वामारभ्य आश्रयं

५५

तितथा बलं च्यचरामसि तथा सो यागे वर्त्महे तद् इमे वयं तव स्व भूताः हे गिर्वणः गीर्भिर्वननीय इंद्र त्वदन्यस्त्वत्तोन्यः कश्चिदपि गिरः स्तुतीः न
हि त्वत् न हि प्राप्नोति अतस्त्वं नोस्माकं तत्स्तुतिलक्षणं प्रतिहर्य कामयस्व क्षोणीरिव यथा क्षोणीः पृथिवीः स्वकीया निभूतजातानि कामय
हे इंद्र ते तव वीर्यस्य सामर्थ्ये भूरि बहु नकेनापि आप्ये तु शक्यते तादृशस्य तव वपुस्तसिस्वभूता मघवान् हे मघवंस्त्वं अस्य
स्तोतुः त्वां स्तुवते यजमानस्य कामं मनभिलाषं आपृण आपूरय बृहती द्यौर्महा द्युलोकोपि तव वीर्यं अनुममने अन्वमंस्त इंद्रेण सहाधस्थाना
ता इयं च इयमपि पृथिवी ते तव अस्माजसे बलाय नेमे प्रह्वी बभूव बभूव दृढा ड्रीतासती अथ एवं वर्तते इति भावः॥७॥ त्वं तमिंद्र हे वज्रिन् वज्र
वन्निंद्र त्वं तं प्रसिद्धं महान् आयामतो महान्तं उरुं विस्तीर्णं पर्वतं पर्ववंतं मेघं वृत्राख्यं विवृश्चाणा पृथेन पर्वशः अतस्त्वास्तु पेन पेव केवलं
विश्वं व्याप्तं सहो बलं दधिषे धारयसि नान्यः कश्चिदिति यदेतत् स्व आसक्तमेव पर्वणि पर्वच चकर्थ शकलीचकृषी ते नमे घेन निवृता आ
वृता आपः सर्तवे सरणाय गमनाय अवासृज अवासृजः बमस्त्राक्षीः सत्रेति सत्यनाम सत्रा इत्येतित्तं नाम सत्यपाठात्॥ महां महांतं नका
र्यलोपश्छांदसः॥७॥ नूचित्सहोजाः। सहोजाः सहसा बलेन जातः बालेन अग्निर्हि बलेन मथ्यमानो रण्योः सकाशाज्जायते अमृतो म
रणरहितः एवंभूतोग्निः नूचिच्छिप्रमेव नितुंदते नितरां व्यथय। ते उसंन मात्रस्याग्नेः स्त्रद्युमत्रा क्षपत्वात्। यद्वा निगच्छति तुंदति गत्यर्थः
सौत्रो धातुः। यद् यदा होता देवानां नामाह्वाताहोमनि व्याह्वाकोवा अयमग्निः विवस्वतः परिचरतो यजमानस्य देवान् प्रतिपयजमानाय दूतो
भवतु हविर्हवने निर्युक्तो भवति तदा यं साधिष्ठेभिः समीचीनैः पथिभिर्मार्गैः गच्छंत्रजांतरिक्षलोकं विममे निर्ममे पूर्वं विधमानं मप्यंत
रिक्षं असत्कल्पमभूत्। इदानीं तस्य तेजसा प्रकाशमानं सत् उत्पन्नमिव दृश्यते। किंच देवता तेति यज्ञमनो देवतातादेवताः तो यद्वा हे
विषा चरुपुरोडाशादिलक्षणेन देवान् विवासति परिचरति॥७॥ ओस्य मन्म। अजरो जरारहितो यमग्निः तृषु क्षिप्रमेव अतसेषु प्रभूते
षु काष्ठेषु अतिष्ठेषु तिआरोहति। अत्र अतस शब्दः काष्ठवाची। अतसं नमुष्क मितिदर्शनात् तृषितस्य तृष्यमितस्तत प्रवृत्तस्याग्नेः ष्ट
छंदुपर्ये वृष्टिं तं ज्वालाजालं अस्मै नरोचं नेपथा सततगमनशीलो अश्वो भवद्द्रुतस्ततो गच्छतः शोभते एवमग्नेर्ज्वाला पिसर्वतो गच्छंती
शोभत इति भावः। तदानीं दिवो द्युलोकस्य सर्वं धिसानु समुच्छ्रितं अन्नं स्तनयन् शब्दयन् निवं अचिक्रदत् भीरस्त्राब्दमास्तानमचीकरत्॥७॥

क्राणा रुद्रेभिः। क्राणा हविर्वहनं कुर्वाणः रुद्रेभिः रुद्रैः वसुभिश्च पुरोहितः पुरस्कृतो होता देवानामाहूता निषत्तः हविःस्वीकरणीयदेव
यजने निषण्णः रयिषाट् रयीणां शत्रुधनानां अभिभविता अमर्त्यो मरणरहितः एवंभूतो देवः द्योतमानोग्निः विक्षु प्रजासु लौकिक
जनेषु रथो रथ इव आयुषु यजमानलक्षणेषु मनुष्येषु ऋंजसानः स्तूयमानः वार्याणि संभजनीयानि धनानि आनुषक् अ
नुषक्तं यथा भवति तथा व्यृण्वति विशेषेण प्रापयति। यद्वा वरणीयानि हवींषि स्वयं प्राप्नोति।७। वि वातजूतः वायुना प्रेरितः तुविष्व
णिः महास्वनः एवंभूतोग्निः जुहूभिः स्वकीयाभिः जिह्वाभिः सृण्या सरणशीलेन तेजसा सह हेन च युक्तः सन् कृषा। कृषेत्यनायासवच
नः कृषा अनायासेनैव अतसेषु उन्नतेषु वृक्षेषु वितिष्ठते विशेषेणातिष्ठति हे अग्ने यद्यदा वनिनो वनसंबंधान् वृक्षान् दस्पुर्वृषा
यसे वृषवदाचरसि दहसीत्यर्थः। हे रुशदूर्मे दीप्तज्वाल अजर जरारहिताग्ने तेनवा।७। तपुर्जंभो वने। तपुर्जंभः तपूंषि ज्वाला एव जंभा
आयुधानि मुखानि वा यस्य स तथोक्तः वातचोदितः वायुना प्रेरितः एवंभूतोग्निर्यूथे ज्वालासमूहे सति। अक्षितमक्षीणं रजः आईर
ष्मांतर्गतं उदकं पाजसा तेजोबलेन अभिव्रजन् आभिमुख्येन गच्छन् वने अरण्ये व्येसात्कान् सर्वमभिभवन् आभिमुख्येन अवधातित्याग्नो
ति। तत्र दृष्टांतः वंसगो वननीयगतिः वृषभः गौः यथा सर्वमभिभवन् गच्छति तद्वत्। यस्मादेवं तस्मात् सततत्रिणः पतनवंतोग्नेः सका
शाल्लब्ध्वा स्थावरं चरथं चरत् जंगमं च भयते बिभेति।७। दधुष्ट्वा। हे अग्ने त्वां मानुषेषु मनुष्येषु मध्ये भृगवः एतत्संज्ञा महर्षयः दिव्या
य जन्मने देवत्वप्राप्तये चेरयिं न शोभनं धनमिव आदधुः आधानसंभारेषु मंत्रेषु मंत्रैः स्थापितवंतः नमस्कुर्वन् कीदृशं जनेभ्यः सुहवं य
जमानार्थं आह्वातुं सुशकं होतारं देवानामाह्वातारं अतिथिं अतिथिवत्पूज्यं यद्वा देवयजनदेशेषु सततं गंतारं वरेण्यं वरणीयं मित्रं न
त्रेवं यथा सखा सुखकरो भवति तद्वत्सुखकरमित्यर्थः।७। होतारं सप्तजुह्वः सप्त सप्तसंख्याकाः जुह्वः होतारः वाघतः ऋत्विजः अध्वरे
षु यागेषु यजिष्ठं यष्टृतमं होतारं यमग्निं वृणते संभजंते विश्वेषां सर्वेषां वसूनां अरतिं प्रापयितारं तमग्निं पयसा हविर्लक्षणेनान्ने
न सपर्यामि परिचरामि। रत्नं रमणीयं कर्मफलं याचामि याचामि।७। अच्छिद्रा सूनो। हे सहसः सूनो बलस्य पुत्र बलेन हि मथ्य
मानोग्निर्जायते मित्रमहः अनुकूलदीप्ते मनू अग्ने नोस्मभ्यं स्तोतृभ्यः अद्यास्मिन्कर्मणि अच्छिद्रा अच्छिद्राणि कर्माणि स्कंधानि यव

५६

देहि। किंच हे ऊर्जो नपात् अन्नस्य पुत्र भुक्तेनान्नेन जठराग्नेः प्रवर्धनादग्नेः पुत्रत्वं एवंविधाग्ने गृणंतं त्वां स्तुवंतं आयसीभिः व्याप्तैः पद्वा।
अयोवद्दृढतरैः पूर्भिः पालनैः अंहसः पापात् उरुष्य रक्ष। उरुष्यतिः रक्षाकर्मेति यास्कः।७। भवा वरूथं। हे विभावः विशिष्टप्रकाशो अग्ने गृण
ते त्वां स्तुवते यजमानाय वरूथमिति गृहनाम वरूथं अरिष्टनिवारकं गृहं भव। हे मघवन् धनवन् मघवद्भ्यो हविर्लक्षणधनयुक्तेभ्यो य
जमानेभ्यः शर्म सुखं भव भवति यथा भवति तथा भव हे अग्ने गृणंतं स्तुवंतं अंहसः पापकारिणः शत्रोः उरुष्य रक्ष। धियावसुः कर्मणा बुध्या वा
प्राप्तधनोग्निः प्राप्तधनानि प्राप्तः इदानीमेव परेद्युरपि मक्षू शीघ्रं जगम्यात् आगच्छतु।७। वया इदग्ने। वयाः शाखाः वेतेर्वातायना
भवंतीति यास्कः। हे अग्ने ये अन्ये अग्नयः संति ते सर्वेपि ते तव वयाः शाखा एव बलेन त्वत्तोन्ये न संतीति भावः। किंच त्वे त्वयि सति विश्वे स
र्वे अमृता अमरणधर्माणो देवाः मादयंते हृष्यंति न हि त्वद्व्यतिरेकेण तेजः स्थितुं शक्यते। हे वैश्वानर विश्वेषां जनानां जाठररूपेण संबंधि
न् हे अग्ने क्षितीनां मनुष्याणां नाभिः संनद्धः असि अवस्थापकोसि अतस्त्वं उपमित् उपस्थापयितासन् यद्वा उपमिदिव स्थितः तद्दृष्टांतविशे
षणं जनान् उपयंयथ अधारयः। तत्र दृष्टांतः उपमित् उपनिखाता स्थूणेव वंशान् निखाते धारणाय स्तंभो यथा गृहे परिस्थितं वंशान् धारयति
तद्वत्।७। मूर्धा दिवो नाभिः। अयमग्निर्दिवो द्युलोकस्य मूर्धा शिरोवत् प्रधानभूतो भवति पृथिव्याः भूमेश्च नाभिः संनाहकः इत्यर्थः। अथा
नंतरं रोदस्योः द्यावापृथिव्योः अयं अरतिरधिपतिरभवत्। हे वैश्वानर त्वां तादृशं देवं दानादिगुणयुक्तत्वाद्देवासः सहदेवाः आर्या
य विदुषे मनवे यजमानाय वा ज्योतिरित् ज्योतिरूपमेव अजनयंत उत्पादयन्। मूर्तसमस्मिन्धीयत तमूर्धाभ्वं तुक्षन्नित्यादौ निपातना
त्तद्रूपसिद्धिः पृथिवीशब्दः।७। आ सूर्ये न रश्मयः। अग्नौ वैश्वानरे अग्नौ वसूनि धनान्यादधिरे आहितानि स्थापितानि बभूवुः। तत्र दृष्टां
तः ध्रुवासो निश्चलाः रश्मयः किरणाः सूर्येण आधीयंते तद्वत्। अतस्त्वं पर्वतादिषु यानि धनानि विद्यंते तस्य राजासि अधिपतिर्भवसि
।७। बृहती इव सूनवे। रोदसी द्यावापृथिव्यौ सूनवे पुत्राय वैश्वानराय बृहती इव महती इव प्रभूते इव भूतां वैश्वानरस्य द्यावापृथिव्योः पुत्र
त्वं मंत्रांतरे स्पष्टमवगम्यते। उभा पितरा महयन्नजायताग्निर्द्यावापृथिवी भूरिरेतसेति। महतो वैश्वानरस्य वस्तानायधायाष्ट
धियो विसृष्टो जातेत्यर्थः। किंच अयं होता दक्षः समर्थः पूर्वीः बहुविधाः बह्वीः महतीर्गिरः स्तुतीः वैश्वानराग्नये त्र प्रयुक्तेतिरोषणः

कीदृशाय स्ववर्यते शोभनगमनयुक्ताय सत्यशुष्माय अवितथबलाय नृतमाय अतिशयेन सर्वेषां नेत्रे तत्र दृष्टांतः। मनुष्येण यथा
मनुष्यो लोके कोर्वदी दातारं प्रभुं बहुविधपास्तुत्या स्तौति तद्वत्। ७। दिवश्चित्ते बृहतः। हे जातवेदः जातानां वेद वैश्वानराग्ने तेन त्वमहि
त्वं माहात्म्यं बृहतो महतः दिवश्चित्। द्युलोकादपि प्ररिरिचे प्रवृद्धोसि। किंच त्वं मानुषीणां मनोर्जातानां कृष्टीनां प्रजानां राजासि अधिप
तिर्भवसि। तथा वरिवः अस्करः अपहृतं धनं युद्धायुद्धेन देवेभ्यश्च कृथ देवाधीनमकार्षीः। ७। प्र नू महित्वं। अत्र वैश्वानरशब्देन म
ध्यमस्थानस्थो वैद्युतोग्निरभिधीयते पूरवः इति पूरवो मनुष्याः वृत्रहणं आवरकस्य मेघस्य हंतारं यं वैश्वानरं सचंते वर्षार्थिनः सेवंते तेन
स्य वृषभस्य अपां वर्षितुर्वैश्वानरस्य महित्वं माहात्म्यं नु क्षिप्रं प्रवोचं ब्रवीमि। किं तदित्यत आह। अयं वैश्वानरोग्निः दस्युं रसानां कर्मणां
वोपक्षितारं राक्षसादिकं अघन्वान् हतवान्। तथा काष्ठाः अपो वृष्ट्युदकानि अधूनोत्। अधोमुखान्यमानयत्। शंबरं तन्निरोधकारिणं मे
घं अवभेत्। अवाभिनत्। ७। वैश्वानरो महिम्ना। वैश्वानरीयाग्निर्महिम्ना महत्वेन विश्वकृष्टिः कृष्टिरिति मनुष्यनाम विश्वे सर्वे मनुष्याः य
स्य स्वभूतास्तथोक्तः भरद्वाजेषु पुष्टिकर हविर्लक्षणान्नेवत्सु यागेषु यज्ञाः एतत्संज्ञेषु ऋषिषु यजतो पष्टव्यः विभावा विशेषेण प्रकाशयि
ता सूनृतावान् सूनृता प्रियसत्या वाक् तद्युक्तः एवंभूतोग्निः शातवनेये शतनसंख्याकानूकतून् वति संभजत इति शातवनिः तस्य पु
त्रः शातवनेयः। तस्मिन् पुरुणीथे बहूनां नेतरि एतत्संज्ञके राजनि चश्रातिनीभिर्बह्वीभिः स्तुतिभिर्जरते स्तूयते। ७। वह्निं यशसं। वह्निं हविषां
वोढारं यशसं यशस्विनं विदथस्य केतुं यज्ञस्य प्रकाशयितारं सुप्राव्यं सुष्ठु प्रकाशनेन रक्षितारं दूतं देवैः हविर्लक्षणे दूत्ये नियुक्तं सद्योअ
र्थं यदा हवींषि जुह्वति सद्यस्तदानीमेव हविर्भिः सह देवानां नेतारं सद्योअर्थं अरणिं गमनं यस्य तं द्विजन्मानं द्व्योर्वा पृथिव्योररण्यो
र्जायमानं रयिमिव धनमिव प्रशस्तं प्रख्यातं एवंभूतमग्निं मातरिश्वा वायुः भृगवे एतत्संज्ञकाय महर्षये रातिं भरत् मित्रमहरत्। अकरो
दित्यर्थः। रातिना संभाषेत्यत्र रातिर्मित्रमिति कपर्दिनोक्तं। रातिः पुत्रमित्येके। एतदर्थप्रतिपादकं मंत्रांतरं भवति रातिं भृगूणामुशिजं क
विक्रतुमिति। ७। अस्य शासुः। शासुः शासितुः अस्य अग्नेः उभयासः उभये पि देवा मनुष्याश्च। यज्ञा स्तुतिभिः स्तोतारो यदा ये यजमानाश्च

५७

इममग्निं शासितारं सचंते सेवंते देवा उशिजः कामयमानाः हविष्मंतः हविषा युक्ताः ये च मर्त्याः मरणधर्माणो यजमानाः। यद्वा उशिज इति मे
धाविनाम उशिजो मेधाविनः स्तोतारः हविष्मंतो हविर्युक्ताः यजमानाः विशाजय होता होमनिष्पादकोग्निः दिवश्चित् अदिसादापि पूर्वः। उषःस्त
वर्त्तमानो भूत्वा अग्निहोत्रहोमार्थं विक्षु यजमानेषु न्यसादि अध्वर्युणा अग्न्यायतने न्यधायि स्थाप्यते। कीदृशं होता अप्रध्युः आप्रष्टव्यः पूजय
इत्यर्थः। विश्पतिः विशानां प्रजानां पालयिता वेधाः विधाता अभिमतफलस्य कर्त्ता। ७। तं नव्यसी। तं नव्यसी नवतरा स्तुतिः कृष्टकी नेयित्रीअ
स्मत् अस्माकं स्तुतिः हृदः हृद्यवस्थितान् प्राणाज्जायमानं उसघमानं अग्निर्विवायो रुसघते वा पुश्च प्राण एव यः प्राणः सचायुरित्याम्नायात्।
मधुजिह्वं मादयितृ ज्वालं एवंभूतं अग्निं अश्याः आभिमुख्येन व्याप्नोतु। ऋजने संग्रामे सति आयवो मनुष्याः यमग्निं जीजनंत यज्ञार्थमुदपा
दयन्। कीदृशाः मनुष्याः ऋत्विजः अंतौ काले यष्टारः मानुषासः मनुपुत्राः प्रयस्वतः हविर्लक्षणान्नोपेताः। ७। उशिक्पावकः। उशिक् कामयमानाः
पावकः शोधकः वसुः निवासयिता वरेण्यः वरणीयः एवंभूतोग्निः विक्षु यं गृहं प्रवृष्टेषु मानुषेषु यजमानेषु अधायि स्थाप्यते स चाग्निः दमूनाः
दक्षसां दमकारिणे मनसा युक्तो गृहपतिः गृहाणां पालयिता सन् दमे यज्ञगृहे रयिपतिः धनाधिपः आभुवत्। आसमंताद्भवति न केवलं एकस्य
यो अपि तु सर्वेषामित्याह। यद्वा रयीणामिति रयीणां मध्ये यदुत्कृष्टं धनं तस्य पतिरित्यर्थः। ७। तं त्वा वयं पतिं। गोतमनामा सो गोतमगोत्रोत्संनावयं
नोधासः स्तोतुरेकत्वे प्यात्मनि पूजार्थं बहुवचनं हे अग्ने रयीणां धनानां पतिं रक्षितारं त्वाहद्रां त्वा त्वां मतिभिर्मननीयैः स्तोत्रैः प्रशंसामः प्रक
र्षेण स्तुमः किं कुर्वंतः वाजंभरं वाजस्य हविर्लक्षणान्नस्य भर्तारं त्वां मर्जयंतः मार्जयंतः तत्र दृष्टांतः। आशुं न अश्वमिव यथा अश्वमिध्वरो हतः
पुरुषाः तस्य वहनप्रदेशां हस्तैर्निमृजंति तद्वत्। वयमप्यग्नेर्हविर्वहनप्रदेशान्निमृज्जंत इत्यर्थः। तथा चाग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्ना
तं। अथ मध्येतूष्णीमेवात्र समार्ष्टि यथा युक्तो प्रेदिवदेति ग्रजे दैवमेतदग्निं युक्तोपक्षिपति प्रेहि देवेभ्यो हव्यं वहते ति धियावसुः कर्मणा बुद्ध्या वा म
दाधनः सोग्निः प्रातश्चोभूतस्यान्तः प्रातःकाले मक्षु शीघ्रं जगम्याद् आगच्छतु। ७। अस्माइदु प्र। इदु इति निपातद्वयं पदपूरणे अथापि पदपूरणाः
मी मिद्वितीयास्कः। यद्वा। अवधारणार्थं तवसे प्रवृद्धाय तुरायत्वरमाणाय वृत्रदुर्विने शत्रूणां हिंसित्रे माहिनाय गुणैर्महते ऋग्वीषमाय ऋचां सम

58

मायया इन्द्रीस्तुतिः क्रियते तस्मा इत्यर्थः ॥ अध्रिगवे अध्रिगमनाय अप्रतिहतगमनायेत्यर्थः ॥ तथा च यास्कः ॥ अधृतगमनकर्मवानिंद्रोऽध्रिगुरुच्यते ॥ ए
वंभूताय अस्मै इंद्राय स्तोमं स्तोत्रं प्रहरामि करोमीत्यर्थः ॥ तत्र दृष्टांतः ॥ प्रयोनयुप्रय इत्यन्ननाम यथा बुभुक्षिताय पुरुषाय कश्चिदन्नं प्रहरति ॥ कीदृशं सो
मं ओहं वहनाय प्राप्णीयं वा अत्यंतोत्कृष्टमित्यर्थः ॥ न केवलं स्तोमं किंतु हवींषि ब्राह्मणि हविर्लक्षणान्यन्नानि ॥ कीदृशानि राततमा अतिशयेन यजमानैरतिशयेन दत्तानि इंद्रं स्तु
त्या हविषा च परिचरामेति भावः ॥ ६ ॥ अस्मा इदु प्रय इव प्रयंसि ॥ अस्मा इदु अस्मा एवेंद्राय प्रय इत्यन्ननाम प्रय इवान्नमिव प्रयंसि प्रयच्छामि इदं नैव स्पष्टीक्रियते बाधे बा
धूणां शत्रूणां बाधमानाय समर्थं सुवृक्तिं सुष्ठु आवर्जकं आंगूषं स्तोत्ररूपमाघोषं भरामि संपादयामि ॥ अन्येऽपि स्तोतारः प्रत्नाय पुरुणाय पत्ये स्वामिने इंद्राय हृदा
हृदयेन मनसा तदंतर्वर्तिनांतःकरणेन मनीषा शास्त्रजन्यज्ञानेन च धियः स्तुतीः कर्माणि वा मर्जयंत मर्जयंति ॥ ६ ॥ अस्मा इदु त्यमुपमं स्वर्षां ॥ अस्मा इदु अस्मा
एवेंद्राय अयं तं प्रसिद्धं उपमं उपमीयमानानां अनुपमं तं स्वर्षां सुष्ठु अरणीयस्य धनस्य दातारं सरिविपश्चितं इंद्रं वद्धधौवर्धयितुं सुवृक्तिभिः सुष्ठु आवर्जकैः समर्थै
रित्यर्थः ॥ मतीनां स्तुतीनां संबंधिभिः अच्छोक्तिः स्वच्छैर्वचोभिर्मंहिष्ठं अतिशयेन प्रवृद्धं एवं लक्षणमांगूषं आघोषं आस्येन मुखेन भरामि करोमीत्यर्थः ॥ ६ ॥ अस्मा
इदु स्तोमं ॥ अस्मा एवेंद्राय स्तोमं शास्त्ररूपं स्तोत्रं हिनोमि प्रेरयामि ॥ तत्र दृष्टांतः ॥ तसिनायसिनं मिं ननाम ॥ सिनमन्नं भवति सिनाति भूतानीति यास्कः ॥ तेन र
थेन सिनमन्नं यस्य स तथोक्तः ॥ तस्मै रथस्वामिने ॥ तष्टेव तष्टा तक्षको यथा रथं निर्मातारथं यथा प्रेरयति तद्वत् इदं वेत्येतत्सत्पूरणं तथा गिर्वाहसे गीर्भिः स्तुति
भिः उह्यमानाय इंद्राय गिरश्च शास्त्रसंबंधिनीः केवलाकृतश्च सुवृक्तिं शोभनमार्जवं यथा भवति तथा प्रेरयामि तथा मेधिराय मेधाविने इंद्राय विश्वमिन्वं विश्व
व्यापकं विश्वैर्व्याप्तं सर्वैः हविश्च सं हिनोमीत्यनुषंगः ॥ ६ ॥ अस्मा इदु सप्तिमिव ॥ अस्मा इदेवेंद्राय अर्कं स्तुतिरूपं अन्नं श्रवस्या अश्रवस्या अन्नेच्छया अन्न
लाभायेत्यर्थः ॥ जुह्वा आह्वानसाधनेन वागिंद्रियेण समंजे संक्लं करोमि एकीकरोमीत्यर्थः ॥ तत्र दृष्टांतः ॥ सप्तिमिव यथा अश्वलाभाय गंतुकामः पुमान्
अश्वं रथेन एकीकरोति तद्वत् एकीकृत्य च वीरं शत्रुक्षपणकुशलं दानौकसं दानानां मेकनिलयं प्रख्यातश्रवसं प्रख्यातकीर्तिं पुरां असुरपुराणां दर्माणं विदारयितारं ॥ ए
वंगुणविशिष्टमिंद्रं वंदध्यै वंदितुं स्तोतुं प्रवृत्तोऽस्मीति शेषः ॥ ६ ॥ अस्मा इदु त्वष्टा ॥ त्वष्टा विश्वकर्मा अस्मा इदु एवेंद्राय वज्रं कन्न कामायुधं रणाय युद्धार्थं तक्षः तीक्ष्ण
मकरोत् ॥ कीदृशं वज्रं स्वपस्तमं ॥ अतिशयेन शोभनकर्माणं स्वर्यं सुष्ठु शत्रुषु प्रेर्यं ॥ यद्वा स्तुत्यं तुजं छत्रं हिंसन् ईशानः ऐश्वर्यवान् क्रियेधाः बलवान् एवं गुण

राम

॥५८॥ अस्मा २

विशिष्टः इंद्रः वृत्रस्य चित् आवरकस्य असुरस्य मर्मस्थानं तुजता हिंसता येन वज्रेण विदत् आहार्षीदित्यर्थः ॥ ६ ॥ अस्येदु मातुः ॥ इदु रित्येतं निपातद्वयं पदपूरणं ॥
यद्वा अवधारणार्थं मातुः वृष्टिद्वारेण सकलस्य जगतो निर्मातुः महः महतो यज्ञस्य सवनेषु अवयवभूतेषु प्रातः सवनादिषु त्रिषु सवनेषु पितुः सोमलक्षण
मन्नं सद्यः पपिवान् यदा अपाः अपिबत् तदानीमेव पान् कृतवानित्यर्थः ॥ तथा चार्वना ॥ चारु रमणीयानि धानाकरंभादि हविर्लक्षणान्यन्नानि भक्षितवानिति शेषः ॥
किंच विष्णुः सर्वस्य जगतो व्यापकः अद्रिमस्तान् देववज्रस्य क्षेपकः एवंभूतः इंद्रः तिरः सतः इति प्राप्तस्येति यास्कः ॥ तिरः प्राप्तः सन्वराहं मेघं विध्यत् अताडयत् ॥
यद्वा विष्णुः सुत्यादिवसात्मको यज्ञः यज्ञो वै विष्णुरिति निलयनं विष्णुरूपं कृत्वेस्यान्नानां विष्णुः पचतं परिपक्वं असुरधनं यत् तन्मुषायत् अपाहरत् ॥ तन्नदत्त्वा इंद्रदीक्षो
परतात्मनां दुर्गरूपाणां सप्तानां नगानां परस्तादासीत् ॥ अद्रिमस्ता सहीयानि दुर्गाण्यतिरः ॥ प्राप्तः सन्वराहं उक्तरूपं दिवसरूपं तं यज्ञं विध्यत् ॥ तथा तैत्तिरी
यकं वराहोऽयं वाममोषः सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्ति इति ॥ स दर्भपिंजूलमुद्वृह्य सप्त गिरीन् भित्त्वा तं अहन्निति च ॥ ६ ॥ अस्मा इदु
ग्नाः ॥ अस्मा एवेंद्राय अहिहत्ये अहेर्वृत्रस्य हनने निमित्तभूते सति ग्नाः स्त्रियः गमनस्वभावा अपि स्थिताः देवपत्नीः देवानां पालयित्र्यो गायत्र्याद्या देवताः अ
र्कं अर्चनसाधनं स्तोत्रं ऊवुः समलंचक्रुरित्यर्थः ॥ स इंद्र उर्वी विस्तीर्णे पृथिवी द्यावापृथिव्यौ परिजभ्रे स्वतेजसा परिजहार अतिचक्रामेत्यर्थः ॥ ६ ॥
अस्येदेव प्ररिरिचे ॥ अस्येदेव इदिति पदपूरणः ॥ अस्यैवेंद्रस्य महित्वं माहात्म्यं प्ररिरिचे अतिरिच्यते अधिकं भवतीत्यर्थः ॥ अत्र उपसर्गो धात्वर्थस्यानिवृ
त्तिमाचष्टे ॥ यथा प्रस्मरणं प्रस्थानमिति ॥ कुतः सकाशात् प्ररिरिचे इत्यत आह ॥ दिवः द्युलोकात् पृथिव्याः भूलोकात् अंतरिक्षात् द्यावापृथिव्योर्मध्ये
वर्तमानादंतरिक्षात् लोकाच्च परि प्ररिरिचे इत्यर्थः ॥ त्रीन् लोकानतीत्य परि प्ररिरिचे इत्यर्थः ॥ इमे दमे गृह इति विषये स्वराट् स्वेनैव तेजसा राजमानः वि
श्वगूर्तः विश्वस्मिन् सर्वस्मिन् कार्ये उद्गूर्णः समर्थः ॥ यद्वा विश्वं सर्वं सर्वमायुधं गूर्तं उद्यतं यस्य स तथोक्तः स्वरिः शोभमानः शत्रुकः ॥ शोभनेः शत्रोर्हंत
येसतिहंता वीर्यवत्तम इति गम्यते ॥ यथा अकुवारि दिव्यं शासमिंद्रमिति ॥ अकुत्सितारिमिति हितस्यार्थः ॥ अमत्रः युद्धादिषु गमनकुशलः ॥ अमं
त्र आइ पत्न्याहरितो वा ॥ अमत्रो मात्रो महान्भवति अभ्यमितो वेति यास्कः ॥ एवंभूतः इंद्रो रणाय रणे युद्धे आववक्षे आ वहतिमे धा आपयति मेघः

89

परस्परं युद्धं कारयित्वा वृश्चिं च कारेति भावः। यद्वा युद्धाय स्वकीयान् भटानानयति ॥७॥ अस्येदेव शवसा। अस्यैवेंद्रस्य शवसा बलेन शुष्णंतं शु
ष्यंतं वृत्रं इंद्रो वज्रेण वृश्चत् व्यच्छिनत्। तथा चोरैरपहृता गाः। व्राणाः वृत्रेण आवृताः अवनीः रक्षणहेतुभूता अपो अमुंचत्। अवसृजत्।
तथा दावने हविर्दत्तवते यजमानाय सचेताः। तेन यजमानेन समानचित्तः सन् श्रवः कर्मफलभूतमन्नं अभिमुख्येन ददातीति शेषः ॥७॥ अस्येदु त्वे
षसा रंत। अस्यैवेंद्रस्य त्वेषसा दीप्तेन बलेन सिंधवः समुद्राः। यद्वा गंगाद्याः सरितः न घः रंत स्वस्वस्थाने रमंते। यद्यस्मादयमिंद्रो वज्रेण सीं एना
न्सिंधून्वज्रेण पर्ययच्छत् परितो नियमितवान्। अपि च ईशानकृत् वृत्रादिशत्रुवधेन आत्मानं ऐश्वर्यवंतं कुर्वन्निंद्रो दाशुषे हविर्दत्तवते यजमाना
य फलं ददत् अस्य प्रयच्छन् तुर्वीतये तुर्वणिः तूर्णं संभजनः तुर्वणिस्तूर्णवनिरिति यास्कः। यद्वा तुर्वणिः शत्रूणां हिंसिता एवंभूत इंद्रः तुर्वीतये एतत्संज्ञा
य उदके निमग्नाय ऋषये गाधं अवस्थानयोग्यं धिष्ण्यं प्रदेशं अकः अकार्षीत् ॥७॥ अस्मा इदु प्र भर। तूतुजानः क्षिप्रनामैतत् तूतुजानः त्वरमा
णः। यद्वा शत्रून् हिंसन् ईशानः ईश्वरः सर्वेषां। क्रियेधाः हे इंद्र एवंभूतस्त्वं अस्मै वृत्राय वज्रप्रहरणाय इमं शत्रुं वज्रेण प्रहरेत्यर्थः। प्रहरस्व च अ
र्वाणि वृषि जलानि इष्यन् तस्माद्वृत्रात् गमयत्वं अपांचरध्ये नासामपांचरणाय भूप्रदेशं प्रति गमनाय तस्य वृत्रस्य मेघरूपस्य पर्व पर्वा
णि अवयवसंधीन् तिरश्चा तिर्यगवस्थितेन वज्रेण वि रदत् विलिखत् छिंधीत्यर्थः। तत्र दृष्टांतः। गोर्न यथा मांसस्य विकर्तारो लोके केचित् पुरुषाः पशो
रवयवान् निजस्नतो विभजंति तद्वत्। अत्र निरुक्तं। अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति क्रममाणधा इति वा।
गोरिव पर्वाणि विरद मेघस्येष्यन्नपां स्यपांचरणायेति ॥७॥ अस्येदु प्र ब्रूहि। अस्येव। शस्तोः नव्यः स्तुत्यो यदिंद्र। अस्येदु अस्यैव तुरस्य युद्धार्थं त्व
रमाणस्येंद्रस्य पूर्व्याणि पुराणानि कर्माणि तत्कृतानि बलवंति कर्माणि हे स्तोतः प्र ब्रूहि प्रशंसाय। यदा युद्धे योधनाय आयुधानि वज्रादीनि
ष्वानः आभीक्ष्ण्येन प्रेरयन् ऋघायमाणः हिंसन् इंद्रो निरिणाति अभिमुखं गच्छति तदानीं प्र ब्रूहीति पूर्वेण संबंधः। पूर्व्यमिति पुराणना
नाम पूर्वं अह्नाय इति पुराणनामसु पाठात् ॥७॥ अस्येदु भिया। अस्यैवेंद्रस्य भिया भयहेतुभयेन गिरयः पर्वताः अभिदृढाः निश्चलाः स्वस्व
देशे वर्तिष्यंते जनुषः प्रादुर्भूतादस्माद्देवात् भीत्या द्यावाभूमी च द्यावापृथिव्यौ अपि तुजेते तुजिर्हिंसार्थो ऽयं कंपनीयेरते कंपेते इत्यर्थः।

किंच वेनस्य कांतस्य ओणिं दुःखं तस्यापनयनं रक्षणं उपो जोगुवानो भृशं स्तुवन् पुनः पुनः उपक्रम्य वयं नु पश्लोकयंतीत्यर्थः। एवं
भूतो नोधा ऋषिः सद्यः तदानीमेव वीर्याय वीर्यवत्त्वाय भुवत् वीर्यवान् अभवत्। द्यावा च भूमा। द्यावाभूमी इत्यनयोर्मध्ये चशब्दस्य पाठः छांदसः। दि
वो द्यावेति दिवशब्दस्य द्यावादेशः। सुपां सुलुगिति विभक्तेर्डादेशः ॥७॥ अस्मा इदु त्यदनु दायि। एक एव शत्रून् जेतुं समर्थः। भूरेर्ब
हुविधस्य धनस्य ईशानः स्वामी यत्स्तोत्रं वव्ने ययाचे एषां स्तोतॄणां संबंधी यद्वावक्ति व्यत्ययः एतेत्यत्तत्र सिद्ध स्तोत्रं अस्मा इंद्रा
य अनु दायि अकारीत्यर्थः। उत्तरार्धस्य इयमाख्यायिका। स्वश्वो नाम कश्चिद्राजा स च पुत्रकामः सूर्यमुपासांचक्रे तस्य च सूर्य एव पु
त्रो बभूव तेन सह एतशो नाम्नो महर्षेः युद्धं जातमिति तदेतदिहोच्यते। अयमिंद्रः सौवश्व्ये स्वश्वपुत्रे सूर्ये पस्पृधानं स्पर्धमानं सु
ष्विं सोमेनाभिषोतारं एतशं एतत्संज्ञं ऋषिं प्रावत् ररक्ष ॥७॥ एवा ते हारियोजना। हर्योः अश्वयोर्योजनं यस्मिन्नर्थे सत
थोक्तः। तस्य स्वामित्वेन संबंधी हारियोजन इंद्र। गोतमासः गोतमगोत्रोत्पन्ना ऋषयः सुवृक्ति सुष्ठु आवर्जकानि अभिमुखीकरणकु
शलानि ब्रह्माणि स्तुतिरूपाणि मंत्रजातानि ते तव ब्रह्म अकृषत। एषु स्तोत्रेषु विश्वपेशसं बहुविधरूपयुक्तं धियं धाः धिया
लभ्यत्वात् धीर्धनमुच्यते येषु धीशब्दः कर्मवचनः पश्वादि बहुविधरूपं धनं अग्निष्टोमादि बहुविधरूपं कर्म वा आधाः धेहि स्थापय।
प्रातः इदानीमेव परेद्युरपि प्रातःकाले धियावसुः बुध्या कर्मणा वा प्राप्तधन इंद्रः मक्षु शीघ्रं जगम्यात् अस्मद्रक्षणार्थमागच्छतु।
॥ ॥ इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणामात्येन विरचिते माधवी
ये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके चतुर्थोध्यायः समाप्तः ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ हस्ताक्षरं रघुनाथपंठकरेण लि
खितं ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ छ॥ छ॥

[OrderDescription]
,CREATED=25.08.20 15:15
,TRANSFERRED=2020/08/25 at 15:23:52
,PAGES=60
,TYPE=STD
,NAME=S0003548
,Book Name=M-1130-TRIKSANHITA BHASYA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,